CC0. In Public Domain, Digitizagtion by eGangotri

गीतानन्तरसम्



अनन्तरसः श्रीगौरहरिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५-।

गीतानन्तरसम्

पूज्य कविवर श्री रतिनाथ झा-
महोदय करकमलयोः
सादरमर्पयति-
बटोही
26.3.200

प्रमाता

बटोही झा

प्रवक्ता

केन्द्रीय-संस्कृत-विद्यापीठम्
विशाल-खण्डम्-४
गोमतीनगरम्
लखनऊ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

© सुरक्षितम्

सुमनःप्रकाशनम्

प्रकाशन-तिथिः
मकरसंक्रान्तिः
१६६८ ई.

मूल्यम्-३० रूप्यकाणि

मुद्रक : शिवम् आर्टस २११ निशातगंज, लखनऊ। दूरभाष : ३८६३८६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिचयः

विप्राः श्रीमुनिवत्सगोत्रजननख्याताः स्वतो भारते
केषाञ्चिन्मिथिलापुरीतिरहुते तेष्वस्ति सज्जीवनम् ।
श्रीमूले पलिवारहाटिविमले गोत्रेऽत्र तत्संततौ
ग्रामे वै पनिचोभनाम्नि हरिजः फूलस्ततो 'गोकुलः' ।।१।।

'खराजग्रामो' वै परिमितमितिर्भाग्यसुमिति-
र्द्विजाः शुद्धा बुद्धाः परमिह वसन्ति प्रकृतितः ।
विवाहात्संस्कारात्सरलकुलमूले 'ह्यनरिये'
खराजे 'भोकर्णः' प्रथमतनयो गोकुलपितुः ।।२।।

स्वर्गश्रियं त्यजति पुत्रमणिः सुमातु-
र्भक्तश्च कोऽपि लभते वसुधां स्वमातुः ।
ग्रामेऽत्र मातुलविलब्धधरानिवासी
कर्णो भुवश्च 'मधुकान्त'सुतं विलेभे ।।३।।

कान्ता भूमिर्जगति मधुना जायते पुष्पपुञ्जै-
स्तत्तुल्योऽसौ सरसहृदयः सौम्यभावस्तितिक्षुः ।
तस्माज्जातः सरहदसुतागर्भतः 'सूर्यकान्त-'
स्तस्यार्कश्रीः शुभकरपुरी'गुञ्जना' नाम जाया ।।४।।

स्थाने पार्थिवशैवपूजनधराऽवत्सा विमाता गृहे
रेजे, नन्दति 'वैद्यनाथ'कृपया यस्मात्कुमारस्तयोः ।
सा सूर्यस्य सरस्वतीरतिमयी पत्न्याश्च दिल्लीपुरे
प्रीतिर्नन्दकुमारतष्टुनटुनख्यातिं तनोति प्रियाम् ।।५।।

भ्राता नन्दकुमारस्य बटोही सोदरोऽग्रजः ।
'गीतानन्तरसं' दोग्धि नन्दनन्दनगीतये ।।६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्मृतिः

सर्वप्रथमं 'खराज'नामा जन्मग्रामो नम्यस्तद्वासिनश्च सर्वे प्रणम्याः। 'तपस्विनी' नाम्नी स्वर्गीया श्रद्धेया पितामही, वर्षेऽस्मिन्नेव दिवङ्गतः पूज्यपिता 'श्रीसूर्यकान्तझा' 'गुञ्जेश्वरी' नाम्नी वन्द्या जननी च स्नेहप्रीतिवात्सल्यामृतनिधिभूधरक्षमाप्रतिमाः, यत्तपोभिर्जन्मग्रहणादारभ्य महता कष्टेन यत्नेन च लालनपोषणरक्षणपूर्वकं वर्धितः शिशुरयम्। ग्रामपाठगृहे प्रथमोऽध्यापकगुरुर्ग्रामीण एव पूज्यश्रीसूर्यनारायणझा, तस्य च स्थानान्तरेण नवीनाध्यापकः श्रीजागेश्वरलालदासनामा समागतः। तस्य भोजनावासव्यवस्थां बालहितमनाः पिता सामान्यगृहस्थोऽपि स्वगृहे कतिपयमासं यावच्चकार। बहुवर्षाणि खराजेऽध्यापयन् दिवङ्गतः सोऽध्यापकगुरुः सर्वथा प्रणम्यः संस्मरणीयश्च मत्समावरवयसां खराजबालानाम्।

ग्रामस्य पश्चिमोत्तरदिशि प्रायः क्रोशद्वयदूरं 'पचाढीमहन्तस्थानम्'। बहुकालपूर्वं बाबासाहबरामदासः कश्चिन्महातपास्तत्रागत्य निजतपोवासस्थानं चक्रे। स कृत्वा दन्तधावनं यद्भूमौ रोपितवान्, तदेवोद्गतो महान् पर्कटीवृक्षो नानाशाखाभिर्वर्षैर्बहुमूलो भूत्वा संजीवति दर्शकानाञ्च विस्मयमावहति। तच्छिष्यपरम्परायां वंशीदासः, राजेश्वरदासः, रामकृष्णदासः, जगदीशदासः सियारामदासश्च (अन्तिमौ तदानीं वर्तमानौ)। तस्मिन् पचाढीमहन्तस्थाने 'वंशीराजरामकृष्णसंस्कृतोच्चविद्यालयः' पाठशालानाम्ना बहुवर्षैः ख्यातयशाः सम्प्रत्यपि विकलावस्थायां विलसति। तत्काले प्रधानाध्यापकपदे पण्डितश्रीकपिलेश्वरझा छात्रचयनार्थं 'निःशुल्कशिक्षा-निःशुल्कप्रवेशो'द्घोषणया ग्रामेषु द्वारे-द्वारे चाटन्नासीत्। तथोपश्रुत्य चाधुनिकशिक्षाव्ययभारचिन्तया विकलः पिता लब्धवानवलम्बनम्, किन्तु समाजस्य पाठशालापद्धतौ हीनविचारान्दोलितः पण्डितजीति पदेन ख्यातं स्वग्रामीणं शरणं जगाम।

पण्डितश्रीशिवनाथमिश्रमहाभागो नानाशास्त्रभाषापारङ्गतः सदाचारवान् कुलीनजनः साधनासिद्धमहापुरुषस्तदानीं सिक्किममध्ये महाविद्यालये संस्कृताध्यापकश्चासीत्। तञ्चावकाशे ग्राममागतं पिता स्वबालविषये संस्कृतपठनोहापोहं प्रकटितवान्। तस्य महापुरुषस्य सम्यक् समाधानप्रदानेनाश्वस्तः पिता पचाढीसस्कृतपाठशालायां प्रबोधद्वितीयं पुत्रं प्रवेशितवान्। स्वर्गतस्य तस्य विदुषो महापुरुषस्य विषये ममोद्गारः-खराजग्रामस्य सकलकल्याणविधानार्थम्- 'जातः सदाशिवभवः शिवनाथमूर्तिः'। अधुना कलकत्तानगराद् गिरीशनामा तदात्मजः पितृप्रतिमप्रकृतिस्तत्सकलकृतिं संहृत्य 'शिवनाथपदावली' नाम्ना प्रकाशयन्नस्ति। 'वन्दे महापुरुष! ते चरणारविन्दम्' यन्माध्यमेन संस्कृतशिक्षायां प्रवेशितोऽयं बालः प्रबोधद्वितीयः कतिपयमासान् ग्रामस्थितात्तस्माच्चानुवादशिक्षां जग्राह। तस्मै ग्रामविद्वद्गुरवे नमो नमः। ग्रामीणाय चापराय तस्मै श्रीहरिश्चन्द्रझासज्जनायापि नमस्तथाङ्ग्लभाषानुवादबोधकाय।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीप्रबोधझा बालस्य पितामहश्रेणीको वर्षैकज्येष्ठोऽपि समवयस्कः। 'सप्तपदी मैत्रीति' परं तेन सह बालोऽयं सप्तवर्षाणि यावत्प्रतिदिनं पचाढीपाठशालां पठितुं गतवान्। कस्मादपि कारणाद्यदि प्रबोधः पठितुं न गतस्ततो बालोऽपि चैकाकी न गतः। प्रवेशिकातो मध्यमां यावद्द्वयोः सोदरसमानं सहाध्ययनमेकेनैव पुस्तकभरेण जातम्। बालस्य कोऽप्यग्रजो नासीत्परं प्रबोधोऽध्ययनविषये तस्याग्रजभूमिकां सर्वथा पूरितवान्। हा दैवम्! वर्षद्वयपूर्वमकाले दिवङ्गतस्य तस्य पूज्यस्य शुद्धमनसः सुहृदः श्रद्धाञ्जलिरूपं संस्मरणं करोमि। समवयसो महात्मनः प्रबोधस्य सौहार्दं मां सदैवाधमर्णं बोधयिष्यति।

पचाढीपाठशालागुरवः - सकलशास्त्रनिष्णातः श्रीकपिलेश्वरझा, वैदिकः श्रीपरमानन्दझा, वैयाकरणः श्रीमहेशझा, ज्योतिषी स्व.श्रीरामावतारमिश्रः, वेदान्ती स्वश्रीमाधवझा, चाधुनिकभाषाध्यापकेषु श्रीजयकुमारझा, श्रीउपेन्द्रझा, तथाङ्ग्ल-भाषाध्यापकः श्रीसुरेन्द्रलालदासश्च। ते सर्वेऽधुना कृतज्ञतापूर्वकं प्रणम्यन्ते, स्मर्यन्ते च लालीभगतहेमहर्षितप्रभृतीनि मित्राणि।

जानन्ति सर्वे श्रीमन्मण्डनसञ्चालितं दिल्लीस्थं संस्कृतविद्यापीठम्। यस्याद्यच्छात्रेष्वन्यतमः केवटाग्रामवासी श्रीसुरेन्द्रझा। केवटाग्रामे पितुर्भगिनी वसति। तत्र गतः पिता श्रीसुरेन्द्रजीमुखाद् विद्यापीठपठनव्यवस्थां चोपलभ्य पुनर्लब्धावलम्बः परमानन्दद्वितीयं पुत्रं पठनाय दिल्लीमहानगरं विसर्जितवान्। वृद्धपितुः सेवार्थं प्रबोधस्तु ग्रामेऽतिष्ठत्। बालस्य दिल्लीविद्यापीठप्रवेशकोऽयं श्रीसुरेन्द्रझा सर्वथा कृतज्ञतापूर्वकं वन्द्योऽस्ति। करमौलिग्रामवासी श्रीपरमानन्दझा बालस्य प्रबोधसममित्रम्। षड् वर्षाणि यावद् विद्यापीठच्छात्रावासे सहशयनभोजनाध्ययनैर्द्वयोरभिन्नता। स हार्दिकाऽभेदः सम्प्रत्यपि। अन्येऽपि सुहृदः श्रीतृप्तिनारायणदेवनारायणविश्वम्भरादयो बालस्य सहकक्ष्याः, श्रीनवीनदिनेशसुरेन्द्रनाथादयः समकक्षाः, मनोरञ्जकमित्रेषु श्रीशालिग्रामत्रिपाठि-रविशङ्करमेननप्रभृतयः, सर्वेऽधुना प्रीत्या स्मर्यन्ते।

विद्यापीठस्य शास्त्रिकक्षागुरवः-श्रीरमेशचन्द्रचतुर्वेदी-श्रीमती सुमेधाविद्यालङ्कारा-श्रीब्रह्ममित्रोऽवस्थी-स्व.श्रीमूलचन्द्रशास्त्री-श्रीरघुवीरशरणव्यथित- श्रीमतीदिलीपकौर-बख्शीप्रभृतयः। साहित्याचार्ये गुरवः-विभागाध्यक्षः कविवरश्रीयुत- अमीरचन्द्रशास्त्री, श्रीहर्षनाथमिश्रपादः श्रीलालबहादुरशास्त्री च। प्रशिक्षणे गुरवः-विभागाध्यक्षश्रीहरिहरझा-श्रीश्रीधरवाशिष्ठ- श्रीविनयकुमाररायप्रभृतयः। अभिज्ञानशाकुन्तलं काव्यप्रकाशञ्च कतिपयदिवसं स्वयं श्रीमण्डनमिश्रश्चास्मान् पाठितवान्। एतदतिरिक्तं व्याकरण-विभागाध्यक्षः स्व.श्रीमणिनाथझा, वेदे- स्व.श्रीशिवदासमिश्रः, ज्यौतिषे स्व.श्रीविश्वनाथझा, न्याये स्व.श्रीधीरानन्दमिश्रः, वेदान्ते - स्व.श्रीगोपानन्दझा तथा शास्त्रान्तरेष्वपि शिष्यप्रिया विद्वांसः। सर्वेऽत्र विनीतशिरसा प्रणम्यन्ते कृतज्ञहृदयेन च स्मर्यन्ते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्मृतिः

सर्वप्रथमं 'खराज'नामा जन्मग्रामो नम्यस्तद्वासिनश्च सर्वे प्रणम्याः। 'तपस्विनी' नाम्नी स्वर्गीया श्रद्धेया पितामही, वर्षेऽस्मिन्नेव दिवङ्गतः पूज्यपिता 'श्रीसूर्यकान्तझा' 'गुञ्जेश्वरी' नाम्नी वन्द्या जननी च स्नेहप्रीतिवात्सल्यामृतनिधिभूधरक्षमाप्रतिमाः, यत्तपोभिर्जन्मग्रहणादारभ्य महता कष्टेन यत्नेन च लालनपोषणरक्षणपूर्वकं वर्धितः शिशुरयम्। ग्रामपाठगृहे प्रथमोऽध्यापकगुरुर्ग्रामीण एव पूज्यश्रीसूर्यनारायणझा, तस्य च स्थानान्तरेण नवीनाध्यापकः श्रीजागेश्वरलालदासनामा समागतः। तस्य भोजनावासव्यवस्थां बालहितमनाः पिता सामान्यगृहस्थोऽपि स्वगृहे कतिपयमासं यावच्चकार। बहुवर्षाणि खराजेऽध्यापयन् दिवङ्गतः सोऽध्यापकगुरुः सर्वथा प्रणम्यः संस्मरणीयश्च मत्समावरवयसां खराजबालानाम्।

ग्रामस्य पश्चिमोत्तरदिशि प्रायः क्रोशद्वयदूरं 'पचाढीमहन्तस्थानम्'। बहुकालपूर्वं बाबासाहबरामदासः कश्चिन्महातपास्तत्रागत्य निजतपोवासस्थानं चक्रे। स कृत्वा दन्तधावनं यद्भूमौ रोपितवान्, तदेवोद्गतो महान् पर्कटीवृक्षो नानाशाखाभिर्वर्षैर्बहुमूलो भूत्वा संजीवति दर्शकानाञ्च विस्मयमावहति। तच्छिष्यपरम्परायां वंशीदासः, राजेश्वरदासः, रामकृष्णदासः, जगदीशदासः सियारामदासश्च (अन्तिमौ तदानीं वर्तमानौ)। तस्मिन् पचाढीमहन्तस्थाने 'वंशीराजरामकृष्णसंस्कृतोच्चविद्यालयः' पाठशालानाम्ना बहुवर्षैः ख्यातयशाः सम्प्रत्यपि विकलावस्थायां विलसति। तत्काले प्रधानाध्यापकपदे पण्डितश्रीकपिलेश्वरझा छात्रचयनार्थं 'निःशुल्कशिक्षा-निःशुल्कप्रवेशो'द्घोषणया ग्रामेषु द्वारे-द्वारे चाटन्नासीत्। तथोपश्रुत्य चाधुनिकशिक्षाव्ययभारचिन्तया विकलः पिता लब्धवानवलम्बनम्, किन्तु समाजस्य पाठशालापद्धतौ हीनविचारान्दोलितः पण्डितजीति पदेन ख्यातं स्वग्रामीणं शरणं जगाम।

पण्डितश्रीशिवनाथमिश्रमहाभागो नानाशास्त्रभाषापारङ्गतः सदाचारवान् कुलीनजनः साधनासिद्धमहापुरुषस्तदानीं सिक्किममध्ये महाविद्यालये संस्कृताध्यापकश्चासीत्। तञ्चावकाशे ग्राममागतं पिता स्वबालविषये संस्कृतपठनोहापोहं प्रकटितवान्। तस्य महापुरुषस्य सम्यक् समाधानप्रदानेनाश्वस्तः पिता पचाढीसस्कृतपाठशालायां प्रबोधद्वितीयं पुत्रं प्रवेशितवान्। स्वर्गतस्य तस्य विदुषो महापुरुषस्य विषये ममोद्गारः-खराजग्रामस्य सकलकल्याणविधानार्थम्- 'जातः सदाशिवभवः शिवनाथमूर्तिः'। अधुना कलकत्तानगराद् गिरीशनामा तदात्मजः पितृप्रतिमप्रकृतिस्तत्सकलकृतिं संहृत्य 'शिवनाथपदावली' नाम्ना प्रकाशयन्नस्ति। 'वन्दे महापुरुष! ते चरणारविन्दम्' यन्माध्यमेन संस्कृतशिक्षायां प्रवेशितोऽयं बालः प्रबोधद्वितीयः कतिपयमासान् ग्रामस्थितात्तस्माच्चानुवादशिक्षां जग्राह। तस्मै ग्रामविद्वद्गुरवे नमो नमः। ग्रामीणाय चापराय तस्मै श्रीहरिश्चन्द्रझासज्जनायापि नमस्तथाङ्ग्लभाषानुवादबोधकाय।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीप्रबोधझा बालस्य पितामहश्रेणीको वर्षैकज्येष्ठोऽपि समवयस्कः। 'सप्तपदी मैत्रीति' परं तेन सह बालोऽयं सप्तवर्षाणि यावत्प्रतिदिनं पचाढीपाठशालां पठितुं गतवान्। कस्मादपि कारणाद्यदि प्रबोधः पठितुं न गतस्ततो बालोऽपि चैकाकी न गतः। प्रवेशिकातो मध्यमां यावद्द्वयोः सोदरसमानं सहाध्ययनमेकेनैव पुस्तकभरेण जातम्। बालस्य कोऽप्यग्रजो नासीत्परं प्रबोधोऽध्ययनविषये तस्याग्रजभूमिकां सर्वथा पूरितवान्। हा दैवम्! वर्षद्वयपूर्वमकाले दिवङ्गतस्य तस्य पूज्यस्य शुद्धमनसः सुहृदः श्रद्धाञ्जलिरूपं संस्मरणं करोमि। समवयसो महात्मनः प्रबोधस्य सौहार्दं मां सदैवाधमर्णं बोधयिष्यति।

पचाढीपाठशालागुरवः - सकलशास्त्रनिष्णातः श्रीकपिलेश्वरझा, वैदिकः श्रीपरमानन्दझा, वैयाकरणः श्रीमहेशझा, ज्योतिषी स्व.श्रीरामावतारमिश्रः, वेदान्ती स्वश्रीमाधवझा, चाधुनिकभाषाध्यापकेषु श्रीजयकुमारझा, श्रीउपेन्द्रझा, तथाङ्ग्ल-भाषाध्यापकः श्रीसुरेन्द्रलालदासश्च। ते सर्वेऽधुना कृतज्ञतापूर्वकं प्रणम्यन्ते, स्मर्यन्ते च लालीभगतहेमहर्षितप्रभृतीनि मित्राणि।

जानन्ति सर्वे श्रीमन्मण्डनसञ्चालितं दिल्लीस्थं संस्कृतविद्यापीठम्। यस्याद्यच्छात्रेष्वन्यतमः केवटाग्रामवासी श्रीसुरेन्द्रझा। केवटाग्रामे पितुर्भगिनी वसति। तत्र गतः पिता श्रीसुरेन्द्रजीमुखाद् विद्यापीठपठनव्यवस्थां चोपलभ्य पुनर्लब्धावलम्बः परमानन्दद्वितीयं पुत्रं पठनाय दिल्लीमहानगरं विसर्जितवान्। वृद्धपितुः सेवार्थं प्रबोधस्तु ग्रामेऽतिष्ठत्। बालस्य दिल्लीविद्यापीठप्रवेशकोऽयं श्रीसुरेन्द्रझा सर्वथा कृतज्ञतापूर्वकं वन्द्योऽस्ति। करमौलिग्रामवासी श्रीपरमानन्दझा बालस्य प्रबोधसममित्रम्। षड् वर्षाणि यावद् विद्यापीठच्छात्रावासे सहशयनभोजनाध्ययनैर्द्वयोरभिन्नता। स हार्दिकाऽभेदः सम्प्रत्यपि। अन्येऽपि सुहृदः श्रीतृप्तिनारायणदेवनारायणविश्वम्भरादयो बालस्य सहकक्ष्याः, श्रीनवीनदिनेशसुरेन्द्रनाथादयः समकक्षाः, मनोरञ्जकमित्रेषु श्रीशालिग्राममत्रिपाठि-रविशङ्करमेननप्रभृतयः, सर्वेऽधुना प्रीत्या स्मर्यन्ते।

विद्यापीठस्य शास्त्रिकक्षागुरवः-श्रीरमेशचन्द्रचतुर्वेदी-श्रीमती सुमेधाविद्यालङ्कारा-श्रीब्रह्ममित्रोऽवस्थी-स्व.श्रीमूलचन्द्रशास्त्री-श्रीरघुवीरशरणव्यथित- श्रीमतीदिलीपकौर-बख्शीप्रभृतयः। साहित्याचार्ये गुरवः-विभागाध्यक्षः कविवरश्रीयुत- अमीरचन्द्रशास्त्री, श्रीहर्षनाथमिश्रपादः श्रीलालबहादुरशास्त्री च। प्रशिक्षणे गुरवः-विभागाध्यक्षश्रीहरिहरझा-श्रीश्रीधरवाशिष्ठ- श्रीविनयकुमाररायप्रभृतयः। अभिज्ञानशाकुन्तलं काव्यप्रकाशञ्च कतिपयदिवसं स्वयं श्रीमण्डनमिश्रश्चास्मान् पाठितवान्। एतदतिरिक्तं व्याकरण-विभागाध्यक्षः स्व.श्रीमणिनाथझा, वेदे- स्व.श्रीशिवदासमिश्रः, ज्यौतिषे स्व.श्रीविश्वनाथझा, न्याये स्व.श्रीधीरानन्दमिश्रः, वेदान्ते - स्व.श्रीगोपानन्दझा तथा शास्त्रान्तरेष्वपि शिष्यप्रिया विद्वांसः। सर्वेऽत्र विनीतशिरसा प्रणम्यन्ते कृतज्ञहृदयेन च स्मर्यन्ते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततो दिल्लीमध्ये रमेशनगरस्थे ब्रह्मलीनयोगिराजश्रीरामनाथमहोदयेन संस्थापिते श्रीमोतीनाथसंस्कृतमहाविद्यालये साहित्यविषये स एवाऽयञ्चाध्यापको जातः। यथा योगिमहोदयो दयालुः साधुवरस्तथाऽत्र प्राचार्यपदे सकलशास्त्रपारङ्गतः पण्डितप्रवरः श्रीवेदानन्दझा-महानुभावः। तथासततशास्त्राध्यापनावेशः पण्डितः कुत्रापि नावलोकितः (दिल्लीविद्यापीठे नियमिताध्यापनानुग्रही विद्वद्गुरुःश्रीहर्षनाथमिश्रः)। अव्यक्तरूपेण ततोऽध्यापनानुरागः प्रभावितवान्। तत्राध्यापकेषु कतिपये दिल्लीविद्यापीठस्नातकाः संस्मरणकर्तुः सहाग्रजाध्यायिनः न्याये- श्रीमित्रनाथयोगी, वेदान्ते- श्रीवैकुण्ठप्रियदासः, व्याकरणे - श्रीभैरवझा, श्रीभवेन्द्रझा, वेदे-श्रीकालीनाथझा तथा चान्ये साहित्ये-श्रीजगत्नारायणपाण्डेयः, व्याकरणे-श्रीलीलानन्दझा, भाषाध्यापकः-श्रीधवलजी, श्रीमानसिंहः, आङ्ग्ल-भाषाध्यापकः-श्रीदिलेरामजी, साहित्ये च श्रीपातीरामजी मित्रञ्च श्रीदेवरामझा। सर्वे ते श्रद्धाप्रीतिपवित्रहृदयेन स्मर्यन्ते।

श्रीलीलानन्दभवेन्द्रभैरवैः सहैकस्मिन्नेव प्रकोष्ठे कतिपयवर्षाणि सहभोजनावासपूर्वकं व्यतीतानि। आद्यद्वयश्रोत्रियविप्रसुस्निग्धसङ्गपावितोऽयं श्रीभैरवासङ्गतः संस्कारान्तरं प्रापितः। 'सङ्गः प्रभावी भवतीति' तत्फलं प्रस्तुतमेव। श्रीकालीनाथमहोदयस्य चाग्रजतुल्यप्रीतिः स्तुत्या। विद्यालयच्छात्रेषु चि.धीरेन्द्रशिवकान्तपरमानन्दप्रभृतयः संस्कारिणो गुरुशिक्षागौरव-गुणगुणिताः सुवृत्त्या मोदन्ते।

महाविद्यालयेऽत्र चूडामणिपदे तदानीं वर्तमानः श्रीरमेशचन्द्रशुक्लमहोदयो विनम्रविद्वान् सरलहृदयः साधुस्वभावो नानाकाव्यकर्ता चासीत्। अदृष्टपितामहोऽहं यथा ततो वात्सल्यमास्वादितवान् तथाऽधुना दशवर्षैर्विद्यापीठाध्यापने संस्मरामि। स च महात्मा प्रपौत्रं दृष्ट्वा दिवङ्गतः। अहो ज्ञानवयोवृद्धस्य निसर्गबन्धुरबन्धुता। भूयो भूयः प्रणमामि साधु मनसा दिवङ्गतं श्रीशुक्लमहाशयम्।

पञ्चदशवर्षाणि तत्राध्यापनेन प्रविष्टो लक्ष्मणपुरस्थकेन्द्रीयसंस्कृतविद्यापीठे साहित्यविषये। अत्रापि दशवर्षाणि व्यतीतानि। अत्राद्यः प्राचार्यः श्रीचक्रधरविजलवान् महोदयः। अमुष्य मार्गनिर्देशने शोधकार्यं सम्पन्नम्। गुरुवरं तं श्रद्धया नमामि। कतिपयमासं प्राचार्यपदे चात्र श्रीगयाचरणत्रिपाठिमहोदयः सहृदयशिरोमणिः, सोऽप्यत्र नम्यः। अन्ये विद्यापीठविद्वांसः पुरस्ताद् विद्यन्त एव, न युज्यते तेषां नामग्रहणस्मृतिः। तद्दैनिकदर्शनलाभेनैव भूमिकामियतीमारोपितः। दिवङ्गतः साहित्यविभागाध्यक्षः स्व.श्री-इन्द्रदेवद्विवेदिमहाभागः सर्वथाऽधुना श्रद्धया स्मरणीयः। साहित्यधुरन्धरः श्रीकृष्णमूर्तिमहाभागो रचनाकतिपयांशं स्वयं पठितवान् श्रुत्वा च पदप्रकृतिव्यवस्थामुक्तवान् (मौनो मौनाश्चेत्यादिकमप्रयोज्यम्)। सोऽयं सुप्रीतिपात्रम्।

वर्तमानप्राचार्यः श्रोत्रियप्रवरः श्री-उमारमणझामहोदयः सर्वथा वन्द्यः, नहि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केवलं तत्राचार्यत्वे परं विद्यापीठसमागततद्गुरोर्वङ्गविदुषः श्री-अनन्तलालठाकुरमहानुभावस्य प्रसादादिदं श्रीगौराङ्गाऽमृतस्रोतो 'गीतानन्तरसं' कलेवरं दधौ।

दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानस्य निदेशकपरम्परायां वन्द्याः सन्ति श्रीरामकरणशर्मा-श्रीमण्डनमिश्र-श्रीठाकुरप्रियदर्शिनो यथा, तथा वर्तमाननिदेशकः परमसहृदयो मधुरहृदयः श्रीकमलाकान्तमिश्रमहोदयो नम्यो यन्निदेशकत्वे विद्यापीठेषु कृतिनः कर्मणि सन्नद्धाः संतिष्ठन्ते।

पत्रप्रबोधकेषु गुरुपण्डितेषु चान्यतमो मूर्धन्यो गुरुः श्रीहरिहरझामहाशयोऽत्र वन्द्यते।

अदृष्टमातामहं ज्यौतिषधर्मशास्त्रकर्मकाण्डपौरोहित्यपुराणेतिहासायुर्वेदविदं पण्डितश्रीरामनारायणचौधरीनामानं श्रद्धया चिन्तयामि। संस्कारः कुलक्रममनुयातीति। कन्यापिता श्रुतमिच्छतीति सर्वदाऽभ्युदयानुशंसी दिवङ्गतः श्वसुरः श्रीत्रियुगीनारायणझा सज्जनोऽत्र संस्मरणपूर्वकं वन्द्यते। अन्ते सपरिवारो निजानुजः चिरञ्जीविनन्दकुमारोऽपि धन्यवादार्हः, यत्पितृमातृसेवाकार्यात्तथानिश्चिन्तीकृतसमयात्कृतिरियं समजनि।

गार्हस्थ्यैकसहचरी सुमेधा तत्संततयो मिहिरप्रतिभासुमनसः सहजौदार्ययोगदानेन कृतिस्वरूपदर्शनोत्सुका वस्तुतो धन्यवादपात्राणि। प्रकाशनयोगप्रदर्शकश्च श्रीसोहनलाल-पाण्डेयजी सुहृत्साधुवादभाजनम्।

'पञ्चमी साहित्यविद्या' 'श्रीभागवतसहस्रनामस्तोत्रम्' 'श्रीसप्तशतीसहस्रञ्चेति' कृतित्रयं समुद्भाव्य प्रस्तुतप्रकाशनावसरेऽस्मिन् सोऽयं 'बटोही' (श्रीरघुवीरशरणव्यथितमत्या - वर्त्मारोही, पण्डितश्रीवेदानन्दप्रतिभया - वटम् - आतपश्रान्तः पादपच्छायाम् ऊहते - तर्कयति, श्रयितुं मृगयते) ज्ञाताज्ञाताखिलच्छायां श्रद्धयाऽधुना संस्मरति। असंख्येयानि शिष्टानि सन्ति श्रद्धेयनामानि प्रीतिभाजनपदानि, द्रव्याभावदरिद्रः पृष्ठसंख्यावृद्धिभीतस्तानि नोल्लिखति, परं कृतज्ञताभावसमृद्धहृदयः (प्रतिसूर्यसंक्रान्तौ पिता श्रीसूर्यकान्तो द्विजवरं प्रीत्या भोजयति स्म, प्रथमपुत्रीजन्मतिथिश्च मकरसंक्रान्तिः) विगताश्विनशुक्लप्रतिपदि दिवङ्गते पितरि सूर्ये तुलास्थे चाद्य पुनः कांक्षति-

पितामही पिता माता गुरवः सुहृदस्तथा।
अनुजस्त्रीकुटुम्बञ्च निश्छलं स्मरणीकृताः।।१।।

ऋणी कृतो ध्रुवं सर्वैः सवात्सल्यशिवाशिषा।
तथानुग्रहकर्तारः सन्तु जन्मनि जन्मनि।।२।।

सत्सङ्गाकांक्षी
बटोहीझा

राधाष्टमी
श्रीराधाजयन्ती
२३-१०-१९९७ ई.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसार्पणम्



(स्वर्गीयश्रीसूर्यकान्तझा)

तनयः पथिको निःस्वः स्वर्यातताततृप्तये।
विसर्जयति सर्वस्वं 'गीतानन्तरसं' रसम्।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमद्गुरुगीताशीः

नवदिल्लीस्थ- श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विद्यापीठे मदीयाध्ययनकाले साहित्यविभागाध्यक्षाः प्रख्यातकविवरा गीतिकादम्बरीप्रभृतिकाव्यप्रणेतारः पूज्यश्री-अमीरचन्द्रशास्त्रिपादा गुरवश्चासन्। येऽधुना पञ्चाशीतिवर्षीयाः श्रीवृन्दावनमध्ये स्वनिर्मितश्रीराधिकाकृपाकुञ्जशरणे धर्मपत्न्या सह निवसन्ति। तत्पादमूले 'गीतानन्तरसस्य' संक्षिप्तपरिचयेन सहितं तदाशीर्वचांसि लब्धुं पत्रं प्रेषितम्। अमृतसन्निभं यदुत्तरं भाषागतं तद्द्वारा लेखितपत्रमधिगतम्, तदनुवादोऽत्र दीयते—

प्रियझाजी!

सस्नेहशुभाशंसनम्।

श्रीजयदेवस्य गीतगोविन्दम्, श्रीप्रबोधानन्दस्य सङ्गीतमाधवम्, गीतिकादम्बरीगतम् सङ्गीतवृन्दावनम् (एतच्च स्वयं श्रीशास्त्रिपादप्रणीतम्) चेत्यादिगीतिकाव्यपरम्परायां भवता 'गीतानन्तरसम्' प्रणीयैकमतिश्लाघनीयं कार्यं विहितम्। तच्च श्रीप्रभुदत्तब्रह्मचारिविरचितां भाषागतां श्रीचैतन्यचरितावलिमाधृत्य श्रीचैतन्यमहाप्रभोः परमपावनचरित्रं प्रतिपाद्यविषयमुररीकृत्य यन्निजलेखनी पवित्रा रससिक्ता च कृता, तदस्माकं गौरवस्य विषयः। यतः समयादाकर्णितं (वार्धक्यातिशयात् स्वयं लेखने-पठनेऽक्षमास्ततश्चाकर्णितमिति लेखितं न तु पठितमिति) ततो गीतानन्तरसमिति नाम स्मृतौ चारूढमस्ति। साधुशिरोमणि-श्रीतुलसीदासभणितौ-

सुमिरिय नाम रूप बिनु देखें।
आवत हृदयँ सनेह बिसेषें।। (मानस-बालकाण्ड-२०-२१)

रूपमनवलोक्यापि स्वप्रियनामसंस्मृतेः।
आगच्छति हृदि स्नेहो विशेषस्तुलसीहृदः।।

एवमत्र दशा विद्यते। वस्तुतश्चैतद्दर्शनोत्सुकता वर्धमानाऽग्रेसरति। सम्भवतः श्रीचैतन्यमहाप्रभुसमाना तस्येयं सरसा यशोगाथाऽपि नहि श्रीवृन्दावनक्षेत्रस्पर्शमेव, किञ्च क्षेत्रप्रवेशमपि कर्तुं ह्युत्कण्ठिता प्रतीयते तथा निजप्रणेतारमपि सपरिवारं श्रीवृन्दावनमानिनीषति। अतः -

'गीतानन्तरसं' पथिक! त्वं वृन्दावनमुपनय हे।
जरसा जर्जरममीरचन्द्रं तं त्वरितं पायय हे'।।

श्रवणकालाच्चैवंविधानेकगीतपङ्क्तयो हृत्तंत्रीमध्ये सहसा स्फुरन्ति, किन्तु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षणात्प्रबोधमायाति तमसा लङ्घ्यते पुनः।
निर्वास्यतः प्रदीपस्य शिखेव जरतो मतिः।।

एवं ता गीतपङ्क्तयस्तस्मिन् विस्मृतितमसि लुप्यन्ते। कदाचिच्च भगवतः श्रीश्यामसुन्दरस्य गोविन्दमाधवादीनि पूर्वकविप्रयुक्तानि नामानि विहाय त्वत्कृतं तस्य 'अनन्तेति' नाम्नश्चयनक्रियायामपि विचारः समुद्गच्छन्नासीत्। एकवारं 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यत्र अनन्तमिति पदेन सह श्रीश्यामसुन्दरस्य 'अनन्त' इति नाम्नः समानतापि त्वदीयचयनस्य कारणं प्रतीता, तथा कदापि 'रसो वै स' इत्युपनिषदस्तद्रसस्य 'अनन्तताऽपि त्वदीयचयनमूले लक्षिता। वास्तविकत्वेन 'अनन्तेति नाम्नि', त्वत्प्रीतिकारणं तु त्वमेव ज्ञापयिष्यसि। एवमादिनिखिलं तर्कवितर्कः, ऊहापोहः, प्रश्नोत्तरम्, शङ्कासमाधानञ्चेत्यादि मिलिते त्वयि स्वयमेव समाहितं भविष्यति। तस्मात्पत्रेणानेन त्वां श्रीवृन्दावनागमनानुरोधं (आदेशं) विसर्जयामि।

त्वदीयस्नेही गुरुः
अमीरचन्द्रशास्त्री
१६-१०-१९९७ ई.
श्रीराधिकाकृपाकुञ्जः
(मुंगेरमन्दिरसम्मुखः)
मथुरारोड, वृन्दावनम्

(पत्रस्यास्य श्रीगोवर्धनवासी
श्रीहेतिलालत्रिपाठिमहोदयो
लेखकः प्रेपकश्चेति तत्कार्तज्ञ्यं
हृदयेन वहामि।)

पत्रमिदं लब्ध्वा चातुरमनास्त्वरितं श्रीवृन्दावनं गोपाष्टमीतिथौ लब्धवान्। तत्र सरलतया श्रीगुरुवासगृहमुपेत्य बहुकालानन्तरं तदीयपावनदर्शनमधिगम्य धन्यो जातः। सर्वथाऽपि स्वस्थस्तु दर्शनविकलस्तथैव सुखयतीति तुष्टिं गतः। परस्मिन् दिवसे अक्षयनवमीतिथौ श्रीवृन्दावनपरिक्रमाऽपि भक्तमण्डलीयोगेन कृता। परिक्रमायां श्रीगौराङ्गस्य बहूनि श्रीमन्दिराणि दृग्गोचरीकृतानि। पूर्वं ६-१-१९९६ दिनाङ्के पत्रद्वारा यत्कांक्षितम्-

"अहो वृन्दारण्ये नयनहृदयालोकरसदौ
वसन्तौ सानन्दौ प्रकृतिपुरुषौ दम्पतिगुरू।
वटोही गत्वा तौ मुदितमनसोर्भद्रवरतः
प्रवक्तुं 'श्रीराधे' प्रभवति कदा कृष्णकृपया।।"

तत्परिक्रमया पूर्णम्। वृद्धाऽपि स्वयं श्रीगुरुमाता पाकं विधाय यथा भोजितवती, तद्गतस्नेहवात्सल्यं पारम्परीण-गुरुकुलस्वरूपं बोधयामास, स्मरणीयञ्च स्थास्यति। रात्रौ दिने च गीतानन्तरसाख्यानं गुरुसम्मुखे चोक्तवान्। आदितः कतिपयांशं गीतानन्तरसं गीतवान्। कुत्रचिच्च परिवर्तनं (हाससाहसः - हास्यसाहसः) संशोधनमपि तैर्निर्दिष्टम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समयाभावात् तदीयावस्थानुरोधात् सम्पूर्णशोधनं नहि सम्भूतम्। प्रकाशनविषये तदीया कालप्रतीक्षासम्मतिर्मे ऽसत्या (श्रीठाकुरानन्तलालवार्धक्यात्), ततो मम प्रार्थनया प्रकाशनानुमतिः प्रसन्नमनसा तैर्वितीर्णा। तदीयाशीर्वचांसि च-

"पथिकोपाध्याय - (बटोहीझा) विरचितस्य गीतानन्तरसनाम्नः काव्यस्य प्रथमखण्डं श्रुतमवधारितञ्च। तदिदं गीतगोविन्दादिवद् रसभावभरितैः सालङ्कारैर्गीतैर्वृत्तैश्च परिवृतं रचनासौष्ठवेन न केवलं सहृदयहृदयानि विनोदयति, अपितु श्रीचैतन्यमहाप्रभोर्महिमानं प्रकाशयत्प्रेमभक्तेरविरलया धारया तानि प्रमोदभरतुन्दिलान्यपि विरचयति, नोदयति च तानि महाप्रभुप्रवर्तिते प्रेमपथे प्रसर्तुं तं महापुरुषं चानुसर्तुम्।

दिव्यं भव्यमभूद्यस्य जन्म कर्म च सर्वथा।
प्रवृत्तिश्च निवृत्तिश्च यस्याभूतां प्रशस्तये।।१।।
स महापुरुषः साक्षाच्छब्दचित्रेषु चित्रितः।
'गीतानन्तरसे' ह्यस्मिन् काव्ये नव्ये कवीन्दुना।।२।।
बटोहीझाऽभिधानेन काव्याकाशप्रकाशिना
तत्सुधां परिपीयाऽहं न तृप्यामि चकोरवत्।।३।।
अमीरचन्द्रशास्त्र्यस्मि तुष्टः कविगुरुर्भृशम्।
अन्तेवासिबुधेन स्याद् गुरोर्हि विमलं यशः।।४।।"

वाचस्पतिः
श्रीअमीरचन्द्रशास्त्री
(राष्ट्रपति-सम्मान-पुरस्कृतः)
पूर्वाचार्यः
श्रीलालबहादुरशास्त्रिराष्ट्रिय-
संस्कृत-विद्यापीठम् नवदिल्ली।

श्रीवृन्दावनम्
अक्षयनवमी
६-११-१६६७

(अत्र गुरुवाक्ये श्रीपथिकोपाध्यायेत्यत्र श्रीपदं विरहितं तथा तृतीयपद्यस्य प्रथमचरणः 'श्रीबटोहीझेति नाम्ना' चेति परिवर्तितो मया, तत्कृतश्रीपदप्रयोगकारणात्।)

(श्रीशास्त्रिपादस्य हरिद्वारगताध्ययनावधौ गुरवो मैथिलविप्रपण्डितशिरोमणयो मधुवनीमण्डलान्तर्गतराँटीग्रामवासिनः 'श्रीकृष्णलालझा'विद्वत्पादाः। ततोऽस्य मैथिलशिष्यस्य शास्त्रिबुधस्य मिथिलामैथिलनिसर्गानुरागः।)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनन्तरसः श्रीगौराङ्गो विजयतेतराम्

मङ्गलानुस्मृतिः

भानुजाजीवनाधारश्यामनौभवनाविकः ।
यथाकल्परसस्त्रोतोभारतगोधरावनः ।।१।।
भवभैरवसंयोगयोगोद्दीपितसद्रुचिः ।
अखण्डप्रभुदत्ताप्तस्वाध्यायव्रतसत्पथः ।।२।।

१. पार्थिवशिव ! कुरु मिथिलाभूमौ, वैदेहीजागरणम् ।

मथनोद्गतशिशुमिथिलासितभूपतिविदेहरसवल्ली
सीरोत्कषणवसुन्धरोदिता क्षमामयी भूदुहिता ।
यद्गुणवशिता ऽवधरामा ऽखिलमानववानरमुदिता
लङ्का ऽशोकवनस्थिततिपसा शोधितरक्षोवृत्तिः ।। पार्थिव.

२. मिथिले ! संस्मर संस्कृतिरूपम् ।

पर्वणि पर्वणि संस्मृतियज्ञश्रुतिसंरक्षितसृष्टिम्
पञ्चसुरार्चनमायाजननीसेवारसवात्सल्यम् ।
मीमांसा ऽऽगमसाधनविधिना सात्त्विकजीवनमुक्तिम्
शिववरविद्यापतिपिककूजितराधामाधवभक्तिम् ।।

यत्सूर्यात्मजगुञ्जनाशिशुशिवध्यानाप्तविद्यालता-
गीता ऽबोधहृदः स्फुटञ्च सुमनः स्वाध्यायगन्धोन्मुखम् ।
श्रेयःप्रीतियुतं तदेव रसितं श्रीभैरवाध्यायतः
कल्याणव्रतशुद्धभागवतभासौहार्दकाव्यद्रवात् ।।३।।

अखण्डानन्दाप्ता प्रभुविषयिणी कृष्णधिषणा,
पपाठ स्वच्छन्दं स्फटिकसमचैतन्यचरितम् ।
त्रिवारं, संयोगात्पथि परिणतं विभ्रमफलं
यदन्तःसंक्षोभं सरलमनसो ऽद्यापि कुरुते ।।४।।

चैतन्यचन्द्रकिरणे हृदि सन्निविष्टे ।
रागोदयो दृढतया भवति प्रकृत्या ।।
पान्थस्ततः श्रवणकीर्तनचिन्तनाद्यै-
र्बद्धो मुकुन्दरससंस्मरणप्रमाता ।।५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वङ्गादनन्तललितात्स्वगताभिवन्द्यं
पान्थो निदेशमधिगम्य यतोऽस्ति गातुम् ।
चैतन्यचारुचरितं प्रभुदत्तगीतं
श्रीकृष्णभारततया भवभावपथ्यम् ॥६॥
'महाभारतपात्रेषु व्यासगाङ्गेयवैदुरम् ।
सकलमथवाऽप्येकं ययातिचरिताऽऽधृतम् ॥७॥
शास्त्रालङ्कारसंगत्या महाकाव्यं विधेहि तत्'
ठाकुराऽनन्तलालस्य प्रेरणादेशमन्त्रितः ॥८॥
कवित्वप्रतिभाहीनो नैपुण्याभ्यासनिर्बलः ।
सारस्वतकृपादीनो वृद्धगौरवयन्त्रितः ॥९॥
धराधामस्थितेऽनन्ते दयालौ वरदायके ।
शीघ्रं कर्तव्यमस्तीति संभावनाऽनुमोदितः ॥१०॥
चैतन्यकल्पवृक्षस्य प्रभुभाषावनीरुहः ।
'गीतानन्तरस'च्छायामाश्रितो हास्यसाहसः ॥११॥
चैतन्यो राधिकाकृष्णो गौरः प्रेमपयोनिधिः ।
कलौ प्रेमपयो दातुमवतीर्णो हरिर्भुवि ॥१२॥
प्रेमा ब्रह्म जगत्प्रेमा भक्तश्च भगवत्तथा ।
प्रेमा मुक्तिश्च भक्तिश्च प्रेमा जीवश्च जीवनम् ॥१३॥
बाल्यं कैशोरतारुण्ये प्रेमैव प्रौढिमा तथा ।
ब्रह्मचर्यञ्च गार्हस्थ्यं संन्यासः प्रेम केवलम् ॥१४॥
सौहार्दं प्राणिमात्रेषु मानवप्रेमदर्शनम् ।
हरिविश्लेषवैक्लव्यं चैतन्यचरिताऽमृतम् ॥१५॥
काव्यं श्रव्यञ्च दृश्यञ्च महत्खण्डञ्च मुक्तकम् ।
चम्पूगद्यकथाऽऽख्यानं गुणाऽलङ्कारसंयुतम् ॥१६॥
रसान्वितञ्च निर्दोषं सुबोधं पुरुषार्थदम् ।
कवितज्ज्ञयशोनन्दं जायते प्रतिभाबलात् ॥१७॥
वाल्मीकिं कविपुङ्गवं सहृदयश्लाघ्यञ्च रामायणं
व्यासं भागवतञ्च भारतजयं वेदादिशास्त्रप्रभाम् ।
काव्यात्मप्रतिभासुगन्धसरसां साहित्यविद्यालतां
वन्दे भारतभारतीं मतिमतां सर्वं सतां सौभगम् ॥१८॥
आद्यं नाट्यं भरतभरितं काव्यशास्त्रीयतत्त्वं
साऽलङ्कारं सुपदघटनारीतिलीलं गुणाभम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मौचित्यं ध्वनिरसमितं वक्रताव्यक्तिचित्रं
मन्ये सर्वं कविनिपुणतालोचनाप्तं कटाक्षम् ॥१९॥
औपम्यं रससिद्धिरीतिगुणितं श्रृङ्गारमाधुर्यदं
लालित्यं पदतोऽर्थगौरवभरं साधारणीपाटवम् ।
कारुण्यं भवभावनाध्वनिवरं वात्सल्यरागात्मकं
येषां तत्प्रतिभावतां सुमनसां वन्दे यशःसागरम् ॥२०॥
विद्याज्योतिर्वाणी देवी बाधाहर्ता गौरीपुत्रः ।
सूर्यो विष्णुर्दुर्गा रुद्रः सिद्धिप्रीतिं मे यच्छन्तु ॥२१॥

३. वसुधे! कुरु मानवकल्याणम् ।

मलविक्षेपावरणग्रसितं विषयासक्तं चित्तम्
अहंताममतारागद्वेषविकलं मरणत्रस्तम् ।
क्षुधापिपासाऽऽकुलितं विश्वं वासनादिजर्जरितम्
अन्नवारिधनधारणकल्पं देहि स्मृतिप्रबोधम् ॥ वसुधे.

४. चञ्चल! शान्तिस्त्यागान्नियतम् ।

साधुजनानां सद्व्यवहारे कुरु त्वं स्वनिक्षेपम्
व्रणसेवासमदेहपोषणं स्नानं व्रणमलशोधः ।
अन्नग्रहणं भेषजतुल्यं वस्त्रं तस्याऽऽवरणम्
भिक्षावृत्तिः स्तुतिनिन्दासममौनी सत्सन्तुष्टिः ॥

अनिकेतः श्रीचरणनिकेतः साधुः शतशो नम्यः
भूमारः क्षपितो यद्भाराच्छ्वसनाद्वायोः शुद्धिः ।
गृहिणस्तद्भिक्षान्नदानतो धन्याः पानादापः
सूर्यस्तुष्यति तत्प्रकाशनाच्छैत्यदानतश्चन्द्रः ॥

आत्मज्ञानमसारविरक्तिर्भगवद्रागासक्तिः
स्वच्छान्तःस्थितहरिभिः सद्भिः क्रियते गगनं शान्तम् ।
नानासुकृतैस्तदनुवर्तनं सुलभं हरिकृपया वा
सत्सङ्गाज्ज्वलते हरिरत्नं मनसस्ततः प्रशान्तिः ॥ चञ्चल.

चैतन्यचारुचर्चायां प्रभुदत्तप्रशंसिताः ।
अवश्यं साधवो नम्या वाञ्छितार्थप्रसिद्धये ॥२२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पोद्दारश्चिरजीविना हनुमता तुल्यः प्रसादः सतां
गीताप्रेसविधेः प्रजाहितकरः कल्याणसम्पादकः ।
श्रद्धाभक्तिहृदा हरेरनुचरः सद्ग्रन्थसंमुद्रको
द्रव्याल्पव्ययतो यतो हि जनताक्रीतो हरिर्भारते ।।२३।।

हनुप्रसादसन्दिष्टप्रभुभाषाऽवतारिता ।
चैतन्यचरितं गङ्गा दुष्टान्नयति पावकान् ।।२४।।

बाबा साधुशिरोमणिर्जनमनोहारी हरिर्भारते
श्रद्धाभावभरेण यस्य कथनं कुर्वन्ति वै साधवः ।
गङ्गावन्धतटे च पावनकुटी विद्योतते श्रीहरे-
र्यन्मध्ये प्रभुदत्तसाधुरचितं चैतन्यचर्चाऽमृतम् ।।२५।।

गङ्गायाः पुलिने हरेरनुचरैः संकीर्तनं साधुभिः
कुट्यां तत्र कृतं तथैव बहुशश्चैतन्यसंकीर्तनम् ।
बाबूलालमतेन तत्र हरितो लब्ध्वा च रामेश्वरा-
च्चैतन्याखिलजीवनीं सुचरिताऽऽलेखं चकार प्रभुः ।।२६।।

श्रीबाबाहरिमानसे वसति वै गौराङ्गदेवो हरि-
श्चैकोऽभीष्टतयाऽपि तन्मयदशा तुल्या महत्ता द्वयोः ।
पूतं तच्चरितं पवित्रमनसाऽधीतञ्च यातं स्वयं
तल्लीलापथि संगताश्च हरिणा तत्प्रेमिणो भूयसा ।।२७।।

बाबाऽन्योऽप्युडिया हि साधुनिवहैर्नम्यश्च सारस्वता-
नन्दब्रह्मचरैर्हृदाऽतिविमलैः सोऽप्यत्र लब्धस्तदा ।
चैतन्योऽपरचेतनो हरिहरः साधुश्च वेदान्तधीः
कालाऽऽकाङ्क्षितदर्शनः प्रणयतो दैवात्तदोपस्थितः ।।२८।।

आरब्धं प्रभुणा चरित्ररचनं मार्गस्य राकातिथौ
'गीतानन्तरसस्य' जन्ममधुदा श्रीपूर्णिमा फाल्गुनी ।
गौरः प्रेमनिधिः सतां भगवतः प्रेमावतारो रस-
स्वादो भागवताभचारुचरितप्रेमद्रवं वर्षति ।।२९।।

५. चेतश्चिन्तय चेतनचरितम् ।

स्वादुरुचिररससागरकल्पं युगपर्यन्तमनन्तम्
प्रेमविशुद्धं भावुकगम्यं विरहमयं सम्पूर्णम् ।
अनुपमकृष्णवियोगाऽऽकारं प्रकटं परमानन्दम्
नीरसजीवनरससंजीवनभुवनाऽमरवरदानम् ।।जीवन.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वन्द्यास्ते प्रभुदत्तसाधुमनसा पूर्वञ्च यैश्चित्रितं
चैतन्याऽऽचरितं मुरारिविदुषा वृन्दावनस्वामिना।
दासैर्लोचनठाकुरैश्च शिशिरश्रीकृष्णदासादिभि-
र्लब्धा वङ्गसुबन्धुबन्धनविधौ यत्तेन तन्माधुरी ।।३०।।

६. जीवन! धारय कृष्णसुवर्णम्।
कृपाकटाक्षैर्मोहविनाशं नमतां मङ्गलमूर्तिम्
सच्चिद्रूपं घनमानन्दं निर्धनजनसर्वस्वम् ।
निर्मलमानसजलजाऽऽवासं सज्जनहृदयाऽऽधारम्
रसवर्षकसंतापविनाशकनवनीरदनीलाभम् ।। चेतः

७. राधा दयितानुग्रहवित्ता।
दयितवियोगजनितसंतापा गतनिद्राविश्रामा
कृष्णागमनाभावाकुलिता नानातर्काक्रान्ता ।
विरहज्वालातापितदेहा ललिताकांक्षादीना
श्यामवियोगास्वादुजीवना दासोद्धारव्यग्रा ।राधा.

८. रसने! राधामाधवमारस।
राधाविभ्रमबर्हापीडं राधावस्त्राभासम्
राधाभक्त्या विद्युत्कान्त्या तर्जितकोटिमनोजम् ।
राधानुग्रहसेवकचिन्ताभूषणशोभितदेहम्
राधासम्मुखविस्मितरूपं राधाधाराधारम् ।। रसने.

९. जाने कृष्णात्परं न तत्त्वम्।
लोचनविषये सततं तिष्ठतु वंशीभूषितहस्तः
श्यामजलदकरुणारसवृष्टिर्विद्युद्वसनाऽऽलोकः ।
भक्तफलोन्मुखसस्मितवदनो विकसितनयनसरोजः
भावकभावोद्दीपितभावः संस्मृतिरसनासिद्धः ।। जाने.

१०. साधो! वृन्दावासं साधय।
भानुसुतातटवनलीलारतबालमनोहरलासम्
भवयमुनाजलविभ्रमसर्पाकर्षणशोधितजीवम् ।
व्रजबलबालसहितगोचारणदर्शितबन्धुसुभावम्
मुरलीवादककृष्णचित्तहरगानश्रुतिविश्रामम् ।। साधो.

११. मोहन! कुरु मम मानसबन्धम्।
देहासक्तिविनाशितसंस्मृतिविस्मृतनिजपरिणामम्
तृष्णाज्वालाकवलितरूपं मिथ्यामोहग्रस्तम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जाग्रत्स्वप्नसुषुप्तिमायया ऽविद्याध्वस्तविवेकम्
चारुविचारजनितसंतोषं कुरु निजसेवापात्रम् ।। मोहन.

१२. अम्बर! गौरस्वरमुद्घोषय।
तीर्थाटनरसवृन्दामार्गे हरिसंकीर्तनघोषम्
भक्तदयितभुवनैकबन्धुहरिकृष्णकरुणरससिन्धो !
जीवननाथमनोनटनर्तकभक्ता ऽऽलोकनभानो !
रसनारसकांक्षितंशुभदर्शनविकलप्रभुचैतन्यम् ।। अम्बर.

अज्ञानं गिरतीति सत्पदगुरुः सत्पात्रविद्योदया-
त्सूर्यो रात्रितमो विभिद्य किरणैश्चक्षुष्मतां भासते ।
व्याप्नोति प्रतिभा चराचरमिदं ह्यौदार्यभावात्कवे-
रन्तर्बाह्यतया स्थिता ऽस्य करुणावृष्टिस्ततो नौमि ताम् ।३१।

राधाकृष्णौ हृदयवचनौ यस्य गौरप्रभुं तं
श्रीचैतन्यं भजनचरितं तच्च तत्कारकञ्च ।
व्यासाभासं प्रभुनुतिरतं ब्रह्मचर्यव्रतं तं
भक्ताग्रण्यं परमपरमं भागवन्तं नतो ऽस्मि ।।३२।।

आख्यानैः स्वरसं महात्मतपसां नानापुराणा ऽमृतं
वाल्मीकिप्रणुतञ्च कृष्णरसितं रामायणं भारतम् ।
अन्तःसाक्षितया बहिः समतया साधुः स्वयञ्चेश्वरः
सद्भिस्तत्र यथा तथा सुचरितं स्वाद्यं हि गौरप्रभोः ।।३३।।

आदौ रविः स्वकिरणैर्गगनं विधत्ते
रक्तं ततस्तपति मध्यगतश्च विश्वम् ।
अन्ते स एव विलयं सहजं प्रयाति
स्थाने करोति विकलं सकलं हि कालः ।।३४।।

रामानन्दगुरुः कबीरमणिदो वैराग्यमूर्तिः सुधीः
सामान्यां जनतां चकार धनिकां भक्त्या हरेर्दानतः ।
मन्तव्या जनता जनार्दनतया सन्तो जगुर्भारते
श्रीरैदासकबीरदासमधुरश्रीनामदेवाः स्फुटम् ।।३५।।

वन्द्यो नानकदेवजी प्रथमतः शिष्यैस्तथा शिक्षितैः
सिक्खैर्भारतगौरवप्रहरिभिर्लेभे गुरोर्गौरवम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सामर्थ्यं शिवराजतोऽत्र विततं श्रीरामदासस्य वै
भक्तिर्विट्ठलनाथगा सुविमला ख्याता तुकारामतः ।।३६।।

वात्सल्ये व्रजमण्डने भगवति श्रीवल्लभे वल्लभा-
चार्यो गोकुलनाथपुष्टिकृपया तेने दृशिं वैष्णवीम् ।
एतेषां हरिभक्तिरक्तमनसां प्राकट्यकालोत्सवे
वङ्गे "गौरशशी" वसन्तमधुरो माधुर्यभावोऽजनि ।।३७।।

वङ्गप्रान्तधरा हि कीकटतया क्षिप्ता पुराणे यत-
स्तद्भक्तान् सुषुवे ततोऽत्र भुवि सा ख्याता सुपुत्रैः स्वतः ।
देवेन्द्रो जगदीशचित्तविजया बन्धुर्भुवो बान्धवा
भक्ता देशसमाजलोकमनसां दीप्ताश्चरित्रैः स्वकैः ।।३८।।

'वन्दे मातरमत्र बंकिमकृतं विद्यासमुद्रो बुधो
नेताजी ह्यरविन्दचिन्तकवरश्चन्द्रोज्ज्वलः केशवः ।
ख्याता शिष्यबलेन किं गुरुकृपा हंसो विवेकोऽद्भुतो
रामो ब्रह्मसमाजकृत्कविवरो वङ्गे तथा ठाकुरः ।।३९।।

भावार्द्रा हृदयप्रधानललितश्रीशक्तिसेवारता
वङ्गप्रान्तजनाः प्रियप्रकृतयो विद्यासु मेधाविनः ।
चैतन्योदयपाविता भुवि परं वङ्गे नवद्वीपभू-
र्भक्तिप्रेमगुणाम्बुधिप्रभुभुवा वृन्दावनश्रीधरी ।।४०।।

शक्तिः पूज्यतमा शिरोमणितया राष्ट्रस्य पूर्वोत्तर-
क्षेत्रे, वैष्णवता विभाति बहुला मध्ये परप्रीतिदा ।
शैवी दक्षिणमूर्तिसेवनरतिर्दाक्षिण्यशैलीप्रिया
वङ्गे भुक्तिविमुक्तिभक्तिरसदा श्यामायिताऽऽराधना ।।४१।।
बुद्धिः संस्मृतिविभ्रमात्पतति तद्भ्रष्टश्च राज्यच्युतः
प्रायश्चित्तमतिः सुबुद्धिनृपतिः प्राणार्पणायोद्यतः ।
वृन्दावासहरिस्मृतेः प्रथमतो गौरप्रभौ सम्मुखे
बुद्धिर्नश्यति संगतः सदसतोरुच्चैः प्रमाणं कलौ ।।४२।।
वङ्गे द्वीपनवे तदा सुरनदीतीरे प्रशस्ते महद्-
विद्यास्रोतसि संस्कृते स्म वहति न्यायार्थसच्चिन्तनम् ।
न्यायात्कण्ठकृतात्ततान मिथिलाविद्याभुवः सर्वतो
दृश्यं दर्शकसार्वभौमदृशितः श्रीवासुदेवोऽखिलम् ।।४३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गङ्गादासमहेश्वरौ नयविदो नीलाम्बरः पण्डिता
विद्याद्वैतधियो मुरारिगुरवः श्रीसार्वभौमप्रभाः ।
गङ्गापावितभूजलाग्निमरुतां योगान्नभोव्यापना-
न्यायाद् ब्रह्मरसोऽत्र वङ्गविदुषां सिद्धो हि जज्ञे प्रभुः ।।४४।।

वंशपरिचयः

१३. धरणी क्षमते पर्वतभारं गङ्गोद्गमभावनया
खिद्यति नो नीरधिनिर्घोषान्मत्वा माधवशङ्खम् ।
सहते वारिदकरकावृष्टिं सस्योत्पादनहेतुम्
वहते खलदुर्दमदुर्भारं साधुजनं परिलब्धुम् ।।

१४. जननी धन्या मान्या दिव्या सूते यदि सुतरत्नम्
प्रसवः स्वाद्यो लोकग्राह्यः फलितस्तत्सद्वंशः ।
वंशो दीव्यति सत्सुतरत्नैर्यद्वहनाद्भूगुरुता
भूमौ शशिशीतलशुभचरितैर्नृत्यति हि ब्रह्माण्डम् ।।

प्रान्तानामसमो हि भारतधराभागोऽसमो वस्तुतो
मालक्ष्मीयुतमाधवः स्फुटतया भात्यत्र वर्णाढ्यतः ।
श्रीहट्टे नगरेऽत्र वङ्गनिकटे गोत्रं भरद्वाजजं
श्रीलोपेन्द्रसुतान्महाप्रभुशिशुं लेभे जगन्नाथतः ।।४५।।

श्रीहट्टञ्च विहाय संस्कृतपथा विद्यां जगन्नाथजी
लब्धुं पण्डितगाङ्गदासशरणं द्वीपे नवे चागतः ।
शास्त्रे काव्यपुरन्दरात्मपदवीयुक्ताय विद्यावते
श्रीचक्रस्तनयां शचीं परिणयान्नाथाय तस्मै ददौ ।।४६।।

विद्याप्राप्तिधिया गतो नवधरां मायाशचीभावितः
काव्यस्थायिनिवासभावरसिकः सिद्धो जगन्नाथजी ।
लक्ष्मीं प्राप्य हरिः समुद्रशरणो मायापुरीवासतः
संसारस्य शचीधराऽमृतरसं चैतन्यचन्द्रं ददौ ।।४७।।

मायाद्वीपपुरे च पण्डितशचीपाण्डित्यदाम्पत्यतो-
ऽष्टौ कन्या जनिताश्च दिक्षु विलयं याताः प्रभोर्मायया ।
धैर्याम्भोधिजविश्वरूपतनयो जातः प्रमोदस्तयो-
श्चैतन्योदयपूर्णिमामधुतिथिर्विश्वम्भरायां बभौ ।।४८।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रादुर्भावः

१५. खगगण! तनु हरिकीर्तननादम्।
प्रेमरसोदधिगौरमहाप्रभुचरितं भक्ताचरणम्
तीर्थाटनवृन्दाऽमृतमन्दरनीलाचलरथलीलम् ।
भजनानन्दं नित्यानन्दं दिव्योन्मादावस्थम्
गौरपदाम्भोरुहकृतनिलयं भारतभक्तभ्रमरम् ।।

श्रीकृष्णं प्रथमं निशीथसमये कुन्तीसुतश्चैकदा
ध्यानस्थं सहसा विलोक्य चकितो ध्येयः कथं ध्यायति ?
पृष्टः सस्मितमुक्तवान् हि भगवान्मां ध्यायतः सर्वदा
ध्याताऽहं शरतल्पगस्य जगतो भीष्मस्य वा साम्प्रतम् ।।४६।।

विश्वे कर्मठतानिरुपणधिया कर्मप्रियः शासको
विद्याज्ञानबुधोऽमृतं गुरुतपास्तप्तुं विरक्तो मुनिः ।
भावार्द्रे जनमानसे प्रभुरसश्रद्धानदीवाहकः
प्राकट्यं लभते स्वयं भुवि हरिश्चक्रे तथा गौरतः ।।५०

मासानां कुसुमाकरो मधुनिधिः सर्वप्रियः फाल्गुनो
वासन्तोत्सवमादकोऽत्र न तथा शीतोष्णबाधा मनाक् ।
प्रह्लादाग्निपरीक्षिका मधुमयी राकाऽनुरागा तिथि-
स्तस्यां भक्तिनदीप्रवाहतरणीकैवर्तगौरोऽजनि ।।५१।।

ग्रस्तेन्दुग्रहहोलिकादहनजप्रह्लादसाधुस्वर-
व्यक्तिर्भागवती स्तुतिर्नमनतः श्रीवासुदेवात्मिका ।
जाता सत्ययुगे, कलावतमसं चन्द्रं यथा सौहृदं
गौरः श्रीहरिबोलकीर्तनमहं कर्ता शचीह्लादकः ।।५२।।

गोसद्ग्रन्थतपोधने तुलसिकाश्यामे द्विजप्राङ्गणे
राकाचन्द्रशचीसुतप्रसवतः पूर्वं तमोवेदना ।
गङ्गाद्वीपनिवासिनां हरिहरिस्नानप्रसङ्गान्तगा
गौराङ्गं सुषुवे शुभग्रहयुतिर्ज्योतिर्महामानवम् ।।५३।।

अद्वैतधर्मवनिता समभावचित्ता
श्रीवासभक्तगृहिणी च शचीवयस्याः ।
श्रुत्वा सहोदरजनिं शिशुविश्वरूपा-
द्दृष्ट्वा हृदा मुमुदिरे शिशुविश्वरूपम् ।।५४।।

श्रीनीलाम्बरचक्रवर्तिगणितज्योतिर्विदा शंसितं
'बालोऽयं भविता महोत्तमनरो राजग्रहैर्ज्ञायते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रेयोऽसंख्यनृणां भविष्यति भुवि प्रेमावताराददतो
लोके भागवती रतिः प्रचरिता नूनं भवेदद्भुता' ।।५५।।

निमायि–नामकरणम्

१६. मन्मथ! कार्तज्ञ्यं त्वयि दध्मः।

विषयासक्तः प्राणी धावति नानेन्द्रियवाहनतः
कामोत्पादितरतिर्वासना लोकं भ्रमयति विषये ।
बहु कमनीयः काव्ये चोक्तः कामो देवो लोके
निजसौन्दर्यात्तस्य मनोऽपि प्रत्यक्षं ह्यवतीर्णः ।
मथ्नाति श्रीकृष्णस्तस्मान्मन्मथमन्मथरूपः
भूमौ भगवद्दर्शनहेतुः कामस्त्वमपि स्तुत्यः ।।

कौशल्याऽवधराजयोर्हृदि यथा मोदश्च रामोदया-
ज्जाते कंसवधे विलोक्य तनयं पित्रोश्च कालाद्बहोः।
वार्धक्ये मुदितौ हि विश्वसुभगं लब्ध्वा सुतं दम्पती
स्थाने लोकविलक्षणं तदनजुं दृष्ट्वा तथा मोहितौ।।५६।।

गर्भाद्वै नवमेऽथवा हि दशमे मासे शिशुर्जायते
गौराङ्गो जनितस्त्रयोदशरविक्रान्तौ शचीगर्भतः ।
जातो वर्षवयास्ततः स वपुषा पुष्टः सुवर्णोपमः
सर्वाङ्गैः सुभगस्तथा सुघटितः सिद्धोऽद्वितीयः शिशुः।।५७।।

पद्माभं वदनं प्रफुल्लनयने नासा मुखं जिघ्रती
दीर्घाः श्यामलकुञ्चिताश्च वदने पद्मेऽलयः कुन्तलाः।
माता पुत्रमुखं पुनः पुनरपि स्वास्वाद्य तन्माधुरीं
लीना विस्मयसागरे सुभगताज्योत्स्नाचकोरी शची।।५८।।

निष्क्रान्ता जननी प्रसूतिभवनान्मासे गते वत्सला
स्नातुं गाङ्गतटं गता सहसखी क्रोडे गृहीत्वा शिशुम्।
स्नाता गाङ्गपदं समर्च्य शिशुकश्रेयो विधातुं शची
श्रद्धाभक्तिभरेण पूजितवती षष्ठीञ्च देवीं सतीम्।।५९।।

चाञ्चल्यं सह वर्धते हि शिशुना ज्येष्ठश्च शान्तोऽधिक-
-स्तत्तुल्यो लघुसोदरोऽतिचपलश्चिक्रीड नानाविधम् ।
क्रन्दन्तं बहु चैकदा तु जननी प्रोवाच तत्सान्त्वने
'ब्रूहि(बोल)त्वं हरिमाधव' श्रवणतःशान्तो बभूव द्रुतम्।।६०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युक्तिं तामधिगम्य बालजननी प्रीता प्रभोः कीर्तनं
बालाक्रन्दनसान्त्वने परिणतं चक्रे सखीभिर्मुदा ।
श्रीबालो हरिकीर्तनात्किलकिलाव्यक्तस्वरो हर्षितः
श्रीगोविन्दमुकुन्दमाधवहरिव्यक्तौ नुनोदाङ्गनाः ।।६१।।

संस्कारे जनकश्च नामकरणे मासे चतुर्थे शिशो-
र्वेदज्ञैः श्रुतिपाठहोमविधिना यज्ञञ्चकार द्विजैः ।
दैवज्ञः शिशुजन्मकालगणनां कृत्वा च 'विश्वम्भरं'
भव्यं नाम 'निमायि' तत्र सखीभिर्माता चकार प्रियम् ।।६२।।

सद्योजातशिशुं हरिश्रवणतो मौनं ततो रोदना-
न्निम्बाभं कटुकं यमोऽपि विजहौ नाम्ना निमायीकृतः ।
द्रव्यास्त्रान्नपदार्थभूषणभराद् हस्तं समीक्ष्याऽऽदधौ
स्थाने भागवते निमायिशिशुकस्तज्जन्मना पण्डितः ।।६३।।

प्रेम-प्रवाहः

१७. मानुष! भावय भावुकभावम् ।
हर्षविषादसमस्थितिरूपं करुणारसपरिपूर्णम्
संसृतिचेतोविश्रमवासं जरसाऽहार्यस्वादम् ।
कालावरणाऽक्षतविश्रम्भं शारदमाधवमोदम्
वसुधाममतास्नेहागारं भाग्यवदेकसुबोधम् ।।

वैरं कुत्र भवेत्तथा यतिहृदोऽहिंसास्वभावे स्थिरे
किं वा प्रेमरसश्चराचरजगद् व्याप्नोति विश्वात्मनः ।
क्रूराः सिंहसमास्तपस्विसविधे तिष्ठन्ति शान्ता वने
ध्यानस्थस्य हि नानकस्य तनुते छायामहिर्भीषणः ।।६४।।

नारीणां हरिबोलकीर्तनमहो नित्यं शचीप्राङ्गणे
गौराङ्गस्मितविश्वमोहनदृशा दत्तोत्सवं वर्धते ।
माता बन्धुजनोपहारवसनैः सम्भूष्य बालं शची
याता रन्धनकर्मणि स्वयममुं दत्त्वाऽग्रजायैकदा ।।६५।।

एकाग्रेऽध्ययनेऽग्रजे स तरसा सर्पन्निमायी शिशु-
श्चैकान्ते स्थितभाग्यशालिनमहिं क्रीडासुहृल्लब्धवान् ।
पाके सक्तवपुस्तथापि मनसा बालं शची ध्यायती
पृष्ट्वाऽप्राप्य शिशुं सविश्वजननी शङ्काकुला मूर्च्छिता ।।६६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चीत्कारोऽजनि तत्र लोकनिवहः श्रुत्वा क्षणादागतः
क्रीडायामहिना विलोक्य शिशुकं भीतो रतं विस्मितः ।
किंकर्तव्यविमूढलोकमतिसु स्नेहेन कृष्णं तथा
नागान्मोक्तुमियेष किन्तु जननी सर्पो बिले प्राविशत् ।।६७।।

क्रीडामित्रमहिश्च यस्य स शिशू रूपेण रम्यो हृदा
सौम्यः सिध्यति तत्र शुध्यति कथं चौरो न भूषाहरः?
यन्नामश्रवणस्मृतिर्हि मनसः शुद्धिं तनोति स्पृशि-
श्चेतश्चोरयते च शोधयति तच्चौरावुभौ संगतौ ।।६८।।

यद्गर्भाब्धि विलक्षणः सुतमणिर्जातो जगद्द्योतकः
पुण्या मातृशिरोमणिर्भुवि शची शुक्तिः सुरत्नाऽर्भका ।
बालाऽलौकिकभावमोहितमतिर्माता विमुग्धा शची
भ्रान्ता चिन्तयते गृहेऽर्भकतया देवः कथं क्रीडति? ।।६९।।

माता पश्यति चैकदा स्वभवने तेजोभिरालोकिते
दिव्याः सत्पुरुषा निमायिशिशुकस्तुत्यर्चनां कुर्वते ।
त्रस्ता, मध्यगृहे पुनश्च शयितं शान्तं स्वकं बालकं
लब्ध्वा मिश्रमुवाच, सोऽपि तनयख्यातिं तथाऽऽख्यातवान् ।।७०।।

श्रीपद्मध्वजवज्रपादपदकैः संशोभितं स्वाङ्गणं
दृष्ट्वा मुग्धशची प्रणम्य शिरसा पत्या समं विस्मिता ।
गोपालो गृहठाकुरो भ्रमति किं साक्षान्मम प्राङ्गणे
लब्ध्वा तानि शिशोः पदेऽस्य विभुताबोधश्च जातस्तयोः ।। ७१।।

दम्पत्योर्वचनं निमायिपदयो रेखा निशम्य स्वयं
दृष्ट्वा जातकपत्रिकास्मरणतः स्वोक्तं दुरुक्तं पुनः ।
बालो लोकविलक्षणश्च नियतं रेखाविदेत्यर्थतः
पित्राऽऽस्वादितमेकदा ध्वनिसुखं दिव्यं विना नूपुरम् ।। ७२।।

चाञ्चल्यं जननीहृदो वितनुते हर्षं विषादं तथा
गेहे नास्ति परञ्च सञ्चितधनं बालस्य तुष्टिर्यतः ।
मातुः खेदविमोहनं सुचरितैर्भिन्ते क्षणाच्छ्रीफलैः
स्वस्थां प्रार्थयति क्षमां वितरितुं बालोऽपराद्धा यथा ।। ७३।।

नैवेद्यं जगदीशपण्डितगृहे श्रीठाकुरार्थाय यत्-
तन्मां देहि निमायिबालकहठग्रस्तावुभौ दम्पती ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोगो भागवतेऽर्चने सुमनसो दत्तः प्रसादो भुवः
श्रुत्वा तन्मुदितार्पितांशभजनात्तुष्टो हि गौरः शिशुः ।। ७४ ।।
माता बालहठं तथैव विविधं सञ्चिन्त्य शङ्काकुला
मत्वा भूतपिशाचबाधितसुतं देवीं हृदा याचते ।
प्राप्ते पञ्चमहायने च जनकस्तस्याक्षरारम्भणं
कृत्वा यल्लिखितुं ददौ, स चपलस्तेने ततः क्रीडनम् ।। ७५ ।।

'दक्षाः पुस्तकवाचने द्विजसुतास्त्वत्तुल्यबालाः परं
वर्णालेखनशिक्षणेऽपि नहि ते क्रीडाप्रियस्य क्षणः' ।
इत्थं मातृगिराऽपि सस्मितमुखो बालैर्वयस्यैः समं
सुक्रीडाहरिबोलनृत्यनिपुणो विद्वत्त्रपामातनोत् ।।७६ ।।

बाल्यभावः

१८. वत्सलरसमास्वादय दशमम् ।

मुनिसम्मतदर्पणतलविततं वत्सलतास्थिरभावम्
जगदीश्वरसाधारणीकरणभावकहृदयाऽऽस्वाद्यम् ।
पुत्राकल्पितबालालम्बं चपलाचरणोद्दीपम्
तल्लालनसम्भाषणभावं सञ्चरितामितमोदम् ।।

कैवल्यं ननु लोकतुल्यललितं, बालस्वभावो यथा
लाभालाभपरं विहाय मननं क्रीडासु बद्धादरः ।
सक्तो वै रमते क्षणेन विरतो निर्द्वन्द्वनिर्वासनः
प्राज्ञः संस्मृतिलाभतो विरमते बालः स्वतो विस्मृतेः ।।६६ ।।
स्थाने लौकिकबालकाः प्रकृतितः क्रीडामनोहारिणो
दिव्यत्वे यदि ते विनोदपरमानन्दा न चित्रं तथा ।
आदौ तत्र जना विदुर्न ललितं गूढञ्च तत्त्वं शिशो-
र्माधुर्येण निमायिनः प्रभवतः सार्धं क्रमाद्वै स्फुटम् ।।७८ ।।
नग्नं धूलिमलीमसं स्थितममुं मार्गे च चीरावृतं
रेखाभिर्वदने ललाटफलके दीर्घञ्च कालायितम् ।
मत्तं गानमदे जनाच्छ्रुतवती माताऽऽगता वत्सला
प्रेम्णौचित्यमुवाच तज्जनमनोहारी निवृत्तो नटः ।।७९ ।।
तद्बालोचितलीलया विहगगोवत्सग्रहैः प्रीतिदो
नारीणां फलदञ्च नृत्यमकरोन्मिष्टान्नलुब्धः शिशुः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बालैर्यत्क्रियते मुरारिचरितं गौरोऽपि मृद्भक्षणं
चक्रे तत्क्रमतो हि वत्सलरसा भूमिर्यशोदा शची ।।८०।।

बाललीला

१६. जननी वत्सलरसनाव्यक्तौ सूते भावालम्बम् ।
स्नानस्वच्छं पङ्काऽऽलिप्तं दामोदरमीक्षन्ती
अन्तर्हसिता कृत्रिमकुपिता मातोवाच यशोदा ।
सूकरोऽसि गतजन्मनि किं त्वं पङ्कपूतनापावक!
मुरहन्ता तत्सस्मितवदनो वर्षति वत्सलमोदम् ।।

बालानां प्रकृतिः स्वभावमधुरा लोके सतां भाव्यते
तेषां कस्यचिदत्र दिव्यगुणितं चाञ्चल्यमाभासते ।
मिश्राऽऽहूतविशिष्टसाधुभजनाऽऽतिथ्यप्रसङ्गोऽद्भुतो
यत्रालौकिकता निमायिचरिता वात्सल्यभक्तिप्रदा ।।८१।।

साधुर्मिश्रगृहस्थभावमुदितो निर्माय पाकं गृहे
नैवेद्यं निदधाति तद् भगवते प्रेम्णा हृदा ध्यायति ।
तत्रागत्य कुतोऽपि भक्तरसने लीनं शिशुं निश्छलं
दृष्ट्वा तद्ध्वनितो हरे! किमभवच्छ्रुत्वा विषण्णो गृही ।।८२।।

त्रस्तः पितृभयाच्च मातृशरणो ज्ञातापराधो यथा
बालः साधु सुरक्षितो मधुगिरा विप्रेण कोपात्पितुः ।
पाके साधुविनिर्मिते पुनरपि क्रोधोद्गतौ चापला-
च्छ्रीमिश्रस्य निमायिनो जलनिभस्नेहोऽतिथेर्वत्सिमा ।।८३।।

दृष्ट्वा विश्वविमोहनं विनयिनं विद्यालयात्साम्प्रतं
प्राप्तं देवकुमारकान्तिसदृशं साधु प्रणम्य स्थितम् ।
निर्मायी स्फुरति श्रिया स्ववपुषो मायी च निःशेषत-
श्चापल्याद् गृहिणः सुतद्वयमहो मुग्धो बभूव द्विजः ।।८४।।

ज्ञात्वा स्वानुजचापलं द्विजसतो भोगार्पणे विश्वदा
नम्रो दीनतया तृतीयपचनं कर्तुं ययाचे द्विजम् ।
तद्वाचः प्रणयेन तद्विनयतः साधुः समाकर्षितो
मुग्धो भोजननिर्मितौ रसदृशा ब्रह्मा प्रवृत्तो यथा ।।८५।।

बद्धः सम्प्रति रज्जुतोऽग्रजशचीमध्ये निमायी विभुः
सुप्ते सर्वजने निशीथसमये भोगे द्विजप्रस्तुते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यक्तस्तत्र चतुर्भुजो मधुहरो दृष्टोऽष्टबाहुः पुनः
शङ्खाद्यैर्नवनीतभुक्तिमुरलीवाद्यप्रियो लक्षितः ।।८६।।

'आहूतो मुदितः प्रसादरसने ज्ञातो न बालस्त्वया
दाताऽभीष्टवरस्य तत्त्वमधुना पश्य स्फुटं स्वात्मदम्' ।
उक्तस्तत्प्रभुणा 'निरञ्जन! विभो! ते मायया मोहिते
मूर्तिस्तिष्ठतु मञ्जुला मनसि मे' तन्मात्रमूचे द्विजः ।।८७।।

नैवेद्यग्रहणे निमायिमिषतो लब्ध्वा प्रसादं द्विजो
यातो दर्शनलोलुपः प्रतिदिनं तद्दर्शनाकांक्षया ।
सत्प्रेमप्रतिमः सुतो हि जगतीपितृत्वसंदीपको
यन्मूलं गृहवैष्णवाऽभिगमनं, धन्यो गृहस्थः पिता ।।८८।।

निमायिचाञ्चल्यम्

२०. मानव! धन्यस्त्वं यदि लभसे भूतलरत्नं पुत्रम्।
सुरभितशीतच्छायापुत्रात्सेव्यं द्रुमगार्हस्थ्यम्
नयनोल्लासं हृदयानन्दं वितरति पुत्रालोकः ।
शैशवशब्दाऽस्फुटताऽऽस्वादो जनयति कर्णामोदम्
मधुरं मधुरतरं श्रुतिसिद्धं मधुरतमं सुतपुष्पम् ।।

चाञ्चल्यात्तनुते प्रमोदमतुलं पित्रोर्निमायी सुतो
वार्धक्याम्बुनि विश्वदा दृढयति स्थैर्यं गभीराकृतिः ।
सौन्दर्यं जनमोहनं समतया चालिङ्गतः सोदरौ
प्रेमालौकिकमातनोति परमं किञ्चानुजो लाघवात् ।।८९।।

स्नानं दैहिकसंस्कृतिर्भुवि नृणां दैनन्दिनी भोजना-
त्पानाच्चापि बलप्रदाऽधिकतया ह्यायुर्विदा संमता ।
गङ्गावारिणि तच्च भौमजनतास्वर्ग्यामृतानन्ददं
ते धन्या भुवि भारते सुकृतिनो ये सन्ति गङ्गातटे ।।९०।।

मिश्रो ज्येष्ठसुतेन गाङ्गपुलिनं स्नानाय नित्यं द्विजः
प्रातर्याति ततोऽनुगच्छति शिशुः कूर्दन्निमायी च तौ।
सन्ध्यावन्दनसूर्यतर्पणविधिं पद्मासनस्थोऽर्भक-
स्तत्सर्वं ह्यनुकुर्वते स कुतुकी तीरे यथा कुर्वतोः ।।९१।।

ब्रूते तज्जननीं गृहाङ्गणगतो गौरस्तथा दर्शको
नारीणां निजलाघवाभिनयतो हास्यं तनोत्यद्भुतम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पित्रा सार्धमसौ गतो भगवतः श्रीचन्दनं मन्दिरे
सद्यो भक्षितवान् प्रसादसदृशं जिह्वाप्रसादः शिशुः ।।६२।।
एकाकी गृहनिर्गतश्च पुलिने क्रीडां वयस्यैः समं
गङ्गायाञ्च करोति वारितरणं श्रुत्वा पिता क्रोधितः ।
यातस्ताडयितुं तथा जनमुखाद् ज्ञात्वा निमायी ततः
कृत्वा शीघ्रपलायनं पथि शचीक्रोडाञ्चलान्तर्हितः ।।६३।।
चापल्याज्जनकः करोति बहुधा क्रुद्धस्तथा तर्जनां
पश्चात्खिद्यति चेतसा तदपि तद्विद्याग्रहे चिन्तितः ।
'चिन्ता माऽस्तु विलक्षणोऽस्ति तनयः' स्वप्नोत्तरं दत्तवान्
'धर्मः पश्यति केवलं सुतहितं साध्यं हि लोके पितुः' ।।६४।।
कान्तिर्दीव्यति चायुषा प्रतिदिनं देहोऽस्य पुष्टः समं
तस्माद्धृष्यति लोकलोचनपुटं त्र्यस्यन्ति बालास्ततः ।
बाला गाङ्गतटेऽर्चनाय मिलिता मार्गेऽस्य लावण्यतो
मुग्धास्तद्बहुशंसिताः प्रमुदिता नैवेद्यमस्मै ददुः ।।६५।।
तास्वेका द्विजकन्यकाऽतिसरला लक्ष्मीर्निमायीदृशा
सव्रीडा भवति स्म भावसहिता मौनत्वमालम्बिता ।
एकस्मिन् दिवसे निमायिनुदिता स्रक्चन्दनाद्यैर्मुदा
चक्रे पूजनमस्य तत्पतिवराज्जाताऽस्य चाद्या प्रिया ।।६६।।
बालानां बलबुद्धिवर्धितगुणैः सेनापतिर्भूयसा
तीरे स्रोतसि तैर्निजप्रहसनं चक्रे जनावञ्चनम् ।
प्रायस्ते मुदिता हृदा वचनतः क्रुद्धाश्च नार्यो नराः,
सोपालम्भमुखाः शचीकथनतः प्रीता'स्तवायं सुतः' ।।६७।।
वर्षे सम्प्रति पञ्चमे ह्यवरजो ज्येष्ठस्तथा षोडशे
पित्रोः प्रीतिकरोऽनुजोऽतिचपलः सौम्योऽग्रजो वृद्धयोः ।
ग्रामे लोकभरे चपलतावार्ता च पित्रोर्मुखे
गम्भीराकृतिसौम्यताऽनुरसनं चित्ते सुधीनां द्वयोः ।।६८।।
'नायातस्तव विश्वदा गृहमिति त्वं गच्छ विद्यालयं
वेलाऽतिक्रमते हि भोजनविधेर्मातुर्निदेशाद्द्रुतम् ।
गौरो हेमरविप्रभासमतनुर्नग्नः कटीवस्त्रत-
श्छन्नस्कन्धशिशुर्दृशोऽनुहरणं कुर्वञ्जगामाग्रजम् ।।६९।।
उत्सङ्गे स्वनुजं निधाय विनयी ह्याचार्यदेवं नम'
स्नेहेनाग्रजविश्वदा नुदितवान् तत्सस्मितव्रीडया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आचार्यो हृतमानसो हरिमतिर्नत्वा निमायीदृशा
जिज्ञासु'स्तव सोदरः शिशुरयं'? पप्रच्छ शिष्यं गुरुः ।।१००।।
'शान्तस्तिष्ठति सन्निधौ हि भवतां भ्राताऽनुजो विद्धि मे
गङ्गायाः पुलिने गृहेऽतिचपलः किञ्चाधिकः कौतुकी' ।
आचार्यं विनिवेद्य यान्तमनुगो नत्वाऽग्रजं बालको
दृष्ट्वा द्वित्रिदृशा चकार विदुषश्चैतन्यशून्यं मनः ।।१०१।।

अद्वैतपण्डितवरः शिशुदर्शनाद्वै
नो वेद मे कथमसौ स्वदते नु बालः ।
गौराङ्गपार्षदवरः प्रथितस्तदन्ते
तस्मादमुष्य गुरुता परिचीयतेऽग्रे ।।१०२।।

अद्वैताचार्यः

२१. लोके महतां सङ्गोऽमोघः।

नानाजन्मार्जितबहुपापं नश्यति गङ्गाऽऽसक्त्या
चण्डभानुकरकृतसंतापं हन्ति निशायां चन्द्रः।
निर्धनताजनितं जनदैन्यं कल्पतरुर्नहि सहते
पापं तापो दैन्यं निखिलं सत्सङ्गादतिबिभ्यति।।

अद्वैतः प्रभुगौरधर्मभवनस्तम्भः प्रधानः सुधी-
स्तल्लीलाप्रथनप्रवर्तनपटुर्वृद्धोऽपि तद्भक्तिमान् ।
तत्पूर्वं भुवि जन्मधारणकृता गौराङ्गतो भारते
लीला भक्तिमयी बहुप्रकटिता पश्चात्ततोऽन्तर्हितम् ।।१०३।।

श्रीहट्टेऽसममध्यगे नृपतिषु श्रीदिव्यसिंहोऽभिधः
शास्ता लाउडभूमिपो नरगुणग्राही सुधीमानदः ।
अद्वैतस्य पिता कुबेरमहिमश्रीतर्कपञ्चाननः
सिंहाऽऽस्थानकराजपण्डितपदे विख्यातनैयायिकः ।।१०४।।

अर्थेनापि कुबेरताविलसितः खिन्नो विना सन्ततिं
श्रीलाभावनिताप्रजा ह्यसमये यत्तस्य मृत्युं गताः ।
हित्वा ग्रामनवं स शान्तिपुरभूवासी विलेभे ततः
पुत्रं,यः कमलाक्षतो मतिमतामद्वैतनामा बभौ।।१०५।।

पद्माक्षो विनयी सुशीलचतुरो मेधायुतो बालको
वङ्गे वाममतेन शाक्तचरितं सेहे ततं नो मनाक्।
'सद्बुद्धिं जनमानसे वितरतु श्रीविष्णुदेवो यया
भक्तिर्हिंसनवर्जिता प्रसरतां' भक्तो ययाचात्मना ।।१०६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्भीको नृपसन्निधौ शिशुरयं श्रीकालिकामण्डपे
श्रीदेवीप्रणतिं विनाऽऽसनधरो दृष्ट्वाऽतिहिंसोत्सवम् ।
'नेदं शिष्टजनोचितं' नृपतिना पित्रा तथोक्तः शिशु-
'र्माता सन्ततिवत्सला शिशुमता, हिंसाप्रिया राक्षसी ॥१०७॥

आनन्दो जगदीश्वरो मतिमतां सच्चित्स्वरूपो मतो
नानावासनया जनैर्हि घटिता नाना भुवो देवताः ।
आद्यां तां करुणामयीं भवपयोदात्रीं नमामि श्रियं
शिष्टोऽस्मीति' जगौ यतः परिषदा तद्बुद्धिराशंसिता ॥१०८॥

वर्षे द्वादशमे गतस्य जनकात्तृप्तिर्न विद्याग्रहे
तत्साङ्गश्रुतिनव्यदर्शनगतिः शान्त्याऽस्य वैदुष्यदा ।
यातौ शान्तिपुरे तथाऽस्य पितरौ ख्यातस्य विद्यावत-
श्चक्रे श्राद्धमसौ सुशीलसुमतिः पुत्रो गयायां पितुः ॥१०९॥

पित्रोः स्वर्गतयोस्तदस्य सहजो यूनोऽद्य भक्त्यङ्कुरो
विद्याऽऽसक्तिविरक्तिभाववशितो युक्तो जनश्रेयसि ।
तीर्थेषु भ्रमणे गतश्च मदुरां काञ्चीञ्च रामेश्वरं
मध्वाचार्यतपोवने स मिलितः श्रीमाधवेन्द्रं ततः ॥११०॥

आद्यो भागवतीं रतिं हि यतिषु श्रीमाधवेन्द्रः पुरी
सोपास्तिप्रमुखां स्वयं विहितवान् प्रख्यातशिष्यैस्तथा ।
ब्रह्मानन्दनपुण्डरीकपरमानन्दाश्च विद्यानिधिः
शिष्या रङ्गरघू तथेश्वरपुरी गौराङ्गदीक्षागुरुः ॥१११॥

अद्वैतस्य विनम्रतापरिचितः श्रीमाधवेन्द्रो गुरुः
श्रीकृष्णस्य ततान चेतसि नवप्रेमोदयं दीक्षया ।
श्रुत्वा तन्मुखतो हरिर्हि धरणीभारापहारी मृदु-
र्यातः शान्तिपुरं व्रजाटनपथा पद्रेणुपूतो गुरोः ॥११२॥

शिष्याकर्षितमाधवेन्द्रगुरवो गौडावनीयात्रया
प्राप्ताः शान्तिपुरे च शिष्यभवने तस्यातिथित्वं गताः ।
अद्वैतो नरसिंहपण्डितसुते ह्युद्वाह्य सीतां सतीं
गार्हस्थ्यं सुखतो निनाय वनितायुक्तो गुरोराज्ञया ॥११३॥

शास्त्रार्थेऽतिविवादनीरसमतिख्यातिप्रतिष्ठापनं
तत्काले विदुषां बहु प्रचलितं तद्दिक्षुयात्राप्रथा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्वैताय न रोचते तदिति तद्भक्तिप्रभाभावितः
शाक्तो दिव्यनृपोऽस्य शिष्यपदतः कृष्णार्पितात्मा गतः ।।११४।।

प्राज्ञः कृष्णकथाप्रियो मृदुमनाः संकीर्णतादोषतो
मुक्तोऽद्वैतमतिः परं सहृदयोऽद्वैतो महामानवः ।
यस्माच्छ्रीहरिदासनामयवनो बाल्ये शरण्यं गतो
लेभे भागवतादिशास्त्ररसनं कृष्णप्रियत्वाद्गुरोः ।।११५।।

आचार्यः सुतलोचनो हरिजने सोऽप्यस्य पादानतः
श्रद्धालुर्लभते च वत्सलतया गेहस्थितो भोजनम् ।
विप्राणां यवनात्मजद्विजवृषव्याप्तौ विरोधेऽमुना-
वादि 'ब्राह्मणकोटिभोजनफलं दासस्य भुक्त्या हरेः' ।।११६।।

२२. पुरुषः समलङ्कुरुते भुवनं क्रियया सद्भावनया।
पशवो मूर्खा लोके शून्याः शास्त्राध्ययनज्ञानात्
शास्त्रज्ञानमसद्भावनया क्रियया कुरुते कलहम् ।
भावज्ञानक्रियायोगतो भवबन्धोऽमरमुक्तिः
निर्बाधं सुकृतैरिह कृतिनां भावः सूते सत्त्वम् ।।

अद्वैतो हरिभक्तिकीर्तनरतो ज्ञानी क्रियासंयुतो
ग्रन्थाधीतिकुतर्कपण्डितजनाद्भिन्नोऽद्वितीयः सुधीः ।
शास्त्राध्यापनकर्मतोऽस्य दिवसस्तद्भिन्नविद्यालये
सन्ध्या वै हरिदासमुख्यसुजनैर्यातो हरेः कीर्तनात् ।।११७।।

पुत्रप्राप्तिवराच्च मिश्रभवने श्रीविश्वरूपोऽजनि
श्रेष्ठो वै भविता तथाऽस्य वचनाद् गौरः शचीगर्भतः।
मिश्रो विश्वसुतं ददौ सुगुरवे सत्पात्रयोगे ततो
ज्ञानं भक्तिविरक्तियोगघटितं शिष्ये गुरोरद्भुतम् ।।११८।।

विश्वरूपस्य वैराग्यम्

२३. जीवास्तुल्या लोके वपुषा भिन्ना मनसो भावात्।
भोगायतनं देहस्वरूपं दृश्यं सर्वसमानम्
भिन्नवासनाकर्मचक्रतो भिन्नः खलु संस्कारः ।
संस्कारान्मनसस्स्थितिरसमा वस्तुधारणा भिन्ना
वस्त्ववस्तुनोर्भेदचिन्तने केचित्कृतिनो धन्याः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञानं भक्तिमयं हि कर्मजगतो दिव्यप्रकाशात्मकं
ज्ञानस्थानरविश्च भक्तितुलितश्चन्द्रो दिवा वै निशा ।
कालः कर्म करोति भानुशशिना चैतन्यतेजोदृशा
संसारः प्रकृतिश्च जीवजगती चाविद्यया कल्पिताः ।।११९।।

ज्ञानं पावनवस्तु सर्वविदितं तत्तुल्यमन्यन्नहि
श्रेष्ठं कुत्र भवेत्ततोऽत्र हि रवौ तेजोऽपरं भासते?
ज्ञानाग्नौ ज्वलतीह वस्तु निखिलं संजायते भस्मसा-
द्विद्यामुक्तिकरी नरस्य सुकृतैर्विद्योतते कस्यचित् ।।१२०।।

ज्ञानाग्निर्ज्वलते परं दहति नो ज्ञानी सुखाद्भौतिकाद्-
दूरं प्रव्रजते शरीरमनसोश्चैतन्यवृत्त्याऽऽत्मनि ।
सारासारविवेकतो हि रमते सारस्वरूपात्मनि
ज्ञात्वाऽसारसमस्तवस्तु जगतस्त्यागी स्वयं केवले ।।१२१।।

त्यागाच्छान्तिरनन्तरं हि वचनं गीतोक्तसिद्धं परं
सृष्ट्यादौ सनकादिसिद्धपुरुषास्त्यागप्रमा नैष्ठिकाः ।
आत्रेयस्त्वृषभश्च नारदशुकौ व्यासस्तथा वामन-
स्त्यागस्य प्रतिमा विभान्ति कपिलो विद्यातपोतेजसा ।।१२२।।

जाते कर्दमतोषिताद्भगवतो नेत्राश्रुपाते भुवः
क्षेत्रे बिन्दुसरः प्रतीकमथवा प्रीतेः स्वमायौजसः ।
ज्ञानी त्यागमयोऽपि भूतलरविः कल्याणकार्ये रतो
बद्धानामिह मुक्तये विहरतेऽनासक्तचित्तः स्वतः ।।१२३।।

ज्ञानात्तत्त्वरतिः स्वतो हि विरतिः पुंसोऽसतो जायते
तत्त्वं ब्रह्मपरात्मनौ च भगवान् ज्ञानात्मकं ह्यद्वयम् ।
बुद्ध्या ब्रह्मणि युज्यते हि विरतः संन्यस्य सर्वं जग-
द्योगादात्मनि भावतो भगवति स्थानेऽविरक्तो द्विधा ।।१२४।।

पुत्रौ मिश्रशचीतपःप्रसवितौ धीरो यथा चञ्चल-
स्तद्व्यक्तौ सुतरामुभौ मतिहृदोः प्राधान्यतां रक्षतः ।
अव्यक्तो मितवाग्गभीरहृदयः श्रीविश्वरूपस्तथा
बाल्यादेव सुलक्षितोत्कटभवासङ्गाद्विरक्तः सुधीः ।।१२५।।

योगभ्रष्टयतिर्हि जन्म दधते प्रायः शुचीनां गृहे
तद्गीतावचनाच्च विश्वसुभगः सल्लोकजीवो ध्रुवम् ।
पुण्यं पूरयितुं पुनश्च भुवनं प्राप्तोऽल्पवर्षावधिं
पित्रोः शुभ्रयशो गुरोश्च गुरुताख्यातिं प्रदातुं यतिः ।।१२६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मन्वाते पितरौ परं निजसुतं साधारणं वत्सलौ
ज्ञात्वा सम्प्रति षोडशायुषममुं तौ तद्विवाहोद्यतौ ।
स्वोद्वाहस्य पितुर्मनोरथमसौ श्रुत्वा विरक्तोऽधिक-
व्यग्रः किं गृहसङ्गतो हि जगतो मुक्तिर्हृदा शङ्कितः ।।१२७।।

वर्षैकाल्पवयाश्च मातुलसुतः श्रीविश्वरूपप्रिय-
प्राणाः केवललोकनाथसुमनास्तुल्यस्वभावो मृदुः ।
गम्भीरञ्च विलोक्य पृच्छति 'कथं म्लानः सदा लक्ष्यसे
स्वोद्वाहाद्यदि गन्तुमिच्छसि गृहाच्छायां कथं त्यक्ष्यसि? ।।१२८।।

भावं वेद्मि तवाधिकं कथमपि स्वप्नायिते जीवने
स्वेच्छाप्रीतिविवाहबन्धनगृहासक्तौ नहि प्रस्तुतः ।
तद्याचे प्रणयेन मां स्वनुचरं पादानतं मा जहि'
'प्राणास्त्वं मम लेकनाथ! सुहृदस्त्यागः कथं युज्यते'? ।।१२९।।

आश्वस्तं स्वगभीरभाववचसा कृत्वा च विश्वस्तथा
प्रायो गूढविचारसागरजले विद्यालये मज्जते ।
मायाचिन्तनमग्नपुत्रहृदयं विद्यारतं मन्यते
माता केवलभोजनाय गृहगं चाचार्यसक्तं पिता ।।१३०।।

तारुण्यं ननु मानवस्य बहुधाऽज्ञातञ्च लब्धुं त्वरो-
त्कण्ठं तन्नवसङ्गलाभममताबद्धं गृहे शाम्यति ।
किं माता जनकोऽनुजो गृहधनं पत्नी कुटुम्बं सुताः
संसारो, ह्यथवाऽऽत्मचिन्तनबलाद्विश्वस्य लक्ष्यं परम् ।।१३१।।

प्रारब्धस्य वशेऽखिला हि जनता रात्रिंदिवं मोहिता
नानाकर्मरता विवेकरहिता कीटोपमा लक्ष्यते ।
एवं बान्धवमोहतो विरहितः श्रीविश्वरूपो युवा
प्राज्ञो गीतमिदं जगौ हरिकृतं भूयो जगच्चिन्तनात् ।।१३२।।

२४.स्वार्थी विरतो लोके निरतो विद्याऽविद्याभेदात् ।
सङ्गं त्यक्त्वा लोकसंग्रहं कुरुते विद्याविरतः
लौकिकवस्तुपरिग्रहचित्तो भ्रमतेऽविद्यानिरतः ।
विद्यासूर्यो वसुधादीपोऽविद्या भवखद्योतः
मुक्तानां किं पञ्जरभवनं? गगनं विहरणलोकः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विश्वरूपस्य गृहत्यागः

२५.ममता जनयति रागद्वेषौ यत्कृतप्रियताऽप्रियता।
स्वस्थश्चेतनसाक्षी पुरुषो दृश्यं तस्य कुटुम्बम्
देहगेहधनधामासक्तः सीमितममताबद्धः ।
क्रौञ्चविलापः प्राचेतसहृदि तनुते करुणाकाव्यम्
कुलिशकठोरं कुसुमकोमलं लोकोत्तरजनचित्तम् ।।

संसारी च यतिः सदा ममतया चित्तेन पादेन वै
लोके विभ्रमतो निजस्य जगतः प्रीत्यै तथा श्रेयसे ।
विश्वं रूपयितुं विशालमनसा श्रीविश्वरूपः कथं
शालायां भविता स्वबन्धुनियतः शालायते यद्धरा ।।१३३।।

वैराग्यं बहुधा भवार्तिजनितं कामार्थदारिद्र्यतो
बद्धं बन्धनशैथिलाद्विगलितं गाढं हि रक्तायते ।
माता यस्य पिताऽनुजोऽर्जुनकुलं मित्रं गुरुर्बान्धवा
रागोत्पत्तिकरास्ततोऽस्य विरतिर्ज्ञानात्मविद्योदयात् ।।१३४।।

श्रद्धेयौ पितरौ सहोदरशिशुः स्निग्धो गुरुर्नैष्ठिक-
स्ते चोद्वेगकरा विवेकिहृदये सन्तीति नो निश्चितम् ।
सेव्याः शास्त्रमतेन सज्जनजनैः कर्तव्यबुद्ध्या तथा .
किञ्चात्मप्रमुखः प्रलोभनभयस्त्रीसंततेस्त्रस्यति ।।१३५।।

त्यक्तुं निश्चितमानसः स्वजननीं ब्रूते सुधीश्चैकदा
'मातर्धारय पुस्तकं स्मृतियुते स्थाने निमायी यदा ।
स्वाध्यायप्रवणो भवेच्च नियतं देहीदमस्मै ततः'
'प्राज्ञस्त्वं स्वयमेव दास्यसि, गृहस्थाता तदा त्वं नहि? ।।१३६।।

'स्थाताऽहं यदि तत्र, विस्मर नहि त्वञ्चापि' सा वत्सला
मुग्धा विश्वमनोगतं नहि तदा जग्राह संकेततः ।
'विश्वात्मा मम विश्वसुन्दरयुवा त्यक्त्वा भविष्णुर्गृहं
भूयो लोचनगोचरो न भविता सम्प्रत्ययं चातिथिः' ।।१३७।।

रात्रौ सुप्तिगते जने च शिशिरे काले महाभीषणे
जागर्त्येव हि संयमी दृढमनाः श्रीविश्वरूपस्तथा ।
दृष्ट्या पश्यति मातरं क्षणमसौ सुप्तां निमायीयुतां
खट्वासुप्तपितुर्विलोकनतया धीरश्चकम्पे हृदा ।।१३८।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धः श्वेतशिराः कपोलशिथिलो गार्हस्थ्यचिन्ताकृति-
र्निद्रायामपि निर्धनस्य मुखभा चिन्ताकुला लक्ष्यते ।
तद्दृष्ट्वा तरुणः सुतो विचलितो धैर्यात्तथा निश्चयाद्-
'वृद्धो मे जनकोऽनुजोऽतिलघुको गेहं कथं यास्यति' ।।१३९।।

एवं खिन्नमनाः कुटुम्बभरणे स्थाने विवेकी सुतो
जातः किञ्च पुनः क्षणेन मनसा याथार्थ्यबोधं जगौ ।
'पृथ्वीपालनभारवाहकहरिर्विश्वम्भरो यत्र वै
जागर्ति स्वयमेव, तत्र मम का चिन्ता नु मोक्षार्थिनः' ।।१४०।।

बुद्ध्याऽव्यग्रमनास्तथा व्यवसितो नत्वा हृदा मातरं
सुप्तां प्रीतिदृशाऽनुजग्रहणतो मन्दं गृहान्निस्सृतः ।
संकेतात्पुरतश्च गाङ्गपुलिने तल्लोकनाथः स्थित-
श्चान्योन्यं मुदितौ हृदोर्मिलनतस्तत्पारयानत्वरा ।।१४१।।

निर्भीकौ तरुणौ जनग्रहणतो भीतौ च नावं विना
पापोद्धारसमर्थगाङ्गजननीक्रोडे मुमुक्षू गतौ ।
गङ्गातीरनिवासिनो हि तरणं जानन्ति बालास्तथा
पाथेयावनतश्च मज्जति जनस्तौ तद्विना पारगौ ।।१४२।।

निर्विघ्नं जलपारगौ च शिशिरे क्लिन्नाम्बरौ तत्पुनः
खिन्नौ नो ममताविहीनहृदयौ निर्द्वन्द्वमग्रेसरौ ।
एतच्छान्तिपुरेतिवृत्तसहितौ ज्ञातञ्च पश्चादिदं
विश्वः संन्यसनादरण्यगुरुताऽरण्याख्यया शङ्करः ।।१४३।।

लोकं शिष्यमवाप्य शङ्करयतिस्तीर्थो हि तीर्थेष्वटन्
देहं विट्ठलनाथदर्शनरतस्तत्याज पण्ढ्रापुरे ।
तेजः स्वं निदधौ पुरेश्वरपुरीदेहे स तत्संक्रमो
नित्यानन्दतनौ बलावतरितो नित्यस्ततः स्तूयते ।।१४४।।

२६.-लोचन! हृदयसरो मा शोषय, अश्रुमोचनव्याजात् ।

एकस्मिन् गतवत्यपरः किं स्थास्यति गेहे बद्धः?
सुतसंन्यासे भर्तुर्मरणे किं न्यूनाधिकभेदः?
याति दिवं प्रथमा गृहलक्ष्मीः परलाभात् किं सौख्यम्?
भगवत्पादसरोजजीवने सञ्चय हृद्रसनीरम् ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२७.नारी वसुधातोऽपि श्रेष्ठा साध्वी शचीसमाना।
वसुधा धत्ते जीवसमूहं शची विश्वचैतन्यम्
विश्वगौरजननी सा धीरा दत्वा जीवति दातुम्।
मौनविरागं चपलन्यासं द्विविधं भक्तिस्रोतः
त्वं द्विपथगा भक्तिप्रवाहा त्यागप्रेमोदारा।।

आदौ मिश्ररविर्जहाति शयनं किञ्चाग्ररूपारुणं
नो लेभे सुतसारथिं गृहरथादारुढपृथ्वीरथम् ।
शय्यायां यदि नास्ति गाङ्गपुलिने यातो, न, वस्त्रे स्थिते
वृद्धश्चेतयते मतिं स्ववनितां बुद्धो निमायी ततः ।।१४५।।

संतप्ता वनिता द्रुतं स्मरति तत्क्रोडाञ्चलं पैतृकं
प्रायः शास्त्रविचारणाय रमते विश्वो हि लोकं प्रति ।
दौहित्रो भुवि पाल्यते ममतया मातामहैः पुत्रव-
न्मिश्रश्चक्रगृहं गतो विदितवान् लोकोऽत्र वै मृग्यते ।।१४६।।

पर्यायौ ननु विश्वलोकसुहृदौ नाप्तौ गुरोः सन्निधौ
तच्छोकाब्धिनिमग्नमिश्रसदनं ज्ञात्वा द्वयोर्निर्गमम् ।
आचार्यो निजशिष्यवर्गसहितो मित्राणि मिश्रालये
विश्वो निष्क्रमितो गृहादिति गताः संभावनां चक्रिरे ।।१४७।।

'प्राप्तो घोरकलिः सतां न जनतामानो द्विजानां तथा
नष्टप्रायमहो हि धर्मसुकृतश्रीवैष्णवास्था जने ।
विश्वाऽऽदर्शितमार्गपथ्यसरणं तत्कार्यशेषो हि नः
कल्या निष्ठुरता सुरूपहृदयात्त्यक्तो निमायी यथा ।।१४८।।

मिश्रोऽधोमुखमण्डलो नयनयोर्वाष्पाम्बुसिक्तां धरां
पश्यन्नस्ति 'धरेव किं मम सुतं चक्रे निजान्तर्गतम्' ।
लोकानां वचनं तथैव सुहृदामाश्वासनं नो मनाक्
तत्कर्णौ श्रृणुतः कथं प्रतिवचो विश्वात्मयुक्तात्मनः ।।१४९।।

मातुः क्रन्दनचीत्कृतिश्रवणतस्तत्तद्गुणाख्यानतो
ग्रामे प्रस्तरमानसं विदलति स्रोतो नदीनेत्रयोः ।
'वृद्धस्ते जनकः स्मृतो न, ममता माताऽपि ते विस्मृता
विश्व! त्वं खलु निर्दयस्त्यजसि यद्बालाद्वितीयानुजम्' ।।१५०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मातुः क्रन्दनदर्शनाच्छिशुरसावुच्चै रुरोद स्वरै-
र्वेद भ्रातृवियोगमत्र दशया पित्रोर्निमायी स्फुटम् ।
संज्ञाशून्यशिशुं विलोक्य वनिता नीरेण तच्चेतना-
बोधार्थञ्च शचीप्रबोधवचसा चक्रुः प्रयासं समम् ।।१५१।।

'धैर्यं धारय रोदनं कुरु नहि त्वत्पुत्रविश्वोऽधुना
चक्रे गौरववर्धकं हि सुमतिः कार्यं महच्चोज्ज्वलम्' ।
तद्वाचाऽपि शची निमायिदशया शान्ता च शुश्राव तं
'मातर्मा कुरु शोचनं तव सुतः स्थाता' निमायिस्वरम् ।।१५२।।

अन्वेष्टुं जनवर्गमुत्सुकमतः श्रुत्वा वदन्तं तथा
मिश्रश्चोर्ध्वदृशिः कठोरहृदयो भूत्वा जगादाऽद्भुतम् ।
'विश्वो नास्ति हि बालको गृहगतो व्यर्थं तदन्वेषणं
संन्यासे हृदयं चकास्तु सुमतेश्चाशीस्तथा दीयताम्' ।।१५३।।

लोका विस्मितमानसाः स्वभवनं मिश्रस्य वाचा ययु-
र्धन्यौ तौ जनकात्मजाविति वचो लोकोत्तरं चक्रिरे ।
एवं तौ पितरौ शनैः समयतो धैर्यं दधानौ दिवा-
रात्रं पुत्रवियोगकातरहृदौ संसारयात्रारतौ ।।१५४।।

मिश्रो विद्धमनास्तु विश्वविरहे तेनैव चैकाकिना
गार्हस्थ्याचरणव्रणेन जगतो वर्षैश्च कैश्चिद्ययौ ।
वृद्धा सा जननी परं वसुमतीतुल्या ततश्चाधिका
काले भाविनि गौरयोगविरहस्वादव्रणा स्थास्यति ।।१५५।।

२८. हनुमन्! सन्तो लोके धन्याः ।
मोदविनोदोदन्ता बहवो यद्यपि गृहिणां लोके
दुःखोदन्ताः सन्त्यपि ते ते स्मरणाद्विदलति वक्षः ।
प्रियतमविरहव्यथिता ब्रूते, सीताऽशोकवनस्था
नम्यास्ते वनिनो भुवि सन्तः प्रियताऽप्रियतामुक्ताः ।।

निमायिनः पठनार्थमाग्रहः

२९. पितरौ! सन्ततिशिक्षाग्रहणात् सिध्यत्यभिभावकता ।
अक्षरशिक्षायामधिकारी मानवमात्रप्रकृतिः
शिक्षा शिक्षितवृत्तिं वितरति चास्ति व्यवहृतिदीपः ।
शिक्षाक्रमतो विद्यालाभः तदविद्यातो मुक्तिः
शिक्षाविद्याऽविद्यामुक्तिः मानवतोत्तमसिद्धिः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मायाचित्रमिदं यतोऽबुधसमाः सम्मोहिताः पण्डिता
विद्याज्ञानयुता भवन्ति विकलाः कर्तव्यकर्मच्युताः ।
मिश्रो विश्ववियोगभीतहृदयो विद्याञ्च तत्कारणं
मत्वा तज्जनको निमायिपठने धत्ते न गाढ़ां रुचिम् ।।१५६।।

यो बालैः सह खेलने रतमनाः पाठे न दृष्टो रतः
संन्यस्ते गृहतोऽग्रजे तदनुजो भावान्तरं प्रापितः ।
क्रीडातो विरतो रतश्च पठने त्यक्त्वा जनोपद्रवं
पित्रोर्मानसरोचकव्यवहृतिर्लक्ष्यो निमायी परः ।।१५७।।

हर्षस्थाननिमायिभावरसनात्तप्तः पिता चेतसा
'पूर्वं यन्मनसा कृतं तदधुना नूनं स्फुटं लक्ष्यते' ।
प्राज्ञस्तज्जनको निमायिधिषणां जानाति विश्वोपमां
'विश्वादर्शतयाऽधिकाध्ययनतः पुत्रोऽप्यसौ यास्यति' ।।१५८।।

मिश्रः स्निग्धहृदा स्वसन्निधिकृतं ब्रूते निमायीसुतं
'मन्तव्यं ह्युचितं भवेदनुचितं यद्वा तथा ब्रूमि ते ।
मुञ्च त्वं पठनं न तत्र महती मे रोचते ते रुचिः'
श्रुत्वा तच्च पितुर्वचः सशपथं पुत्रोऽपि जग्राह तत् ।।१५९।।

विश्वो यद्दिनतो गतस्तदनुजो यत्नेन पित्रोर्मन-
स्तोषायाचरति प्रियं विनयतः श्रुत्वा निमायी पितुः ।
'तत्कुर्यां भवतो यथाभिलषितं' चोक्त्वा गृहाभ्यन्तरे
तत्सर्वं जननीं निवेद्य पठनं तत्याज सर्वांशतः ।।१६०।।

आरेभे निजचापलं पुनरपि प्राचीनमित्रैः समं
गङ्गायां तरणं जनोपहसनं नारीजनोपद्रवम् ।
लोकानां मुखतस्तथाऽस्य करणं श्रुत्वा पिता स्नेहतो
ब्रूते 'किं श्रृणुमोऽधुना जनमुखादारब्धमेव त्वया' ।।१६१।।

'किं कार्यं, प्रतिषेधितं हि पठनं, बालैः समं क्रीडनं
शेषं केवलमत्र मे' सुतगिरा मौनी पिता जायते ।
बद्ध्वा लोचनपट्टिकां प्रतिगृहं भिक्षार्थमन्धो यथा
धृत्वा बालककन्धरां भ्रमितवान् मित्राग्रणीश्चैकदा ।।१६२।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'मातस्ते भगवान् सदा हितकरो भिक्षाप्रदानाच्च मे
स्यादन्धाय' तथा वचःश्रवणतश्चोच्चैर्हसन्ति स्त्रियः ।
माता चास्य शची सुतव्यवहृतेः खिन्ना गिरा निन्दति
'त्वं मूर्खाद्द्विजबालकात्कथमितः शिष्टक्रियां वाञ्छसि' ।।१६३।।

माता धीरगभीरवाक्यरसनात्सिक्ताश्रुनेत्रा द्रुतं
क्रोडीकृत्य सुतञ्च लालितवती मिष्टं शिशुभ्यो ददौ ।
स्नातं तञ्च विधाय भोजितवती भावार्द्रचित्ता शची
माता वै ममतादयारसनिधिस्रोतस्विनी वत्सला ।।१६४।।

विक्रेतुः फलमिष्टवस्तुनिवहं भोक्तुं पुनर्वाञ्छति
द्रव्यं तज्जननी ददाति तरसा नो चेत्तदा क्रन्दति ।
माता निर्धनतां गृहस्य शनकैर्ब्रूते प्रबोधाय त-
'च्छिक्षा यस्य न दीयते गुरुगृहे कर्ता तथैवं शिशुः' ।।१६५।।

'अस्मादस्य वरं सुतस्य पठनं' निश्चित्य भूयः शची
स्मृत्वा विश्वसुतं ततोऽस्य पितरं वक्तुं बिभेति स्वतः ।
क्रुद्धोऽशुद्धमृदा विलिप्य. वपुषं भाण्डैर्भुजौ मस्तकं
सज्जीकृत्य चतुष्पथे जनभरैर्दृष्टो निमायी पुनः ।।१६६।।

माता वारयति 'द्विजस्य शिशवः कुर्वन्ति नैवं क्रियां'
'शुद्धाऽशुद्धविवेचको हि पठनान्मूर्खो निमायी कथम्' ।
गङ्गास्नानगता निशम्य वनिताः सञ्चिन्त्य बालव्यथां
'भाग्याद्वै पठनग्रहस्तव सुते' स्थाने वदन्ति स्म ताः ।।१६७।।

ताभिः सम्प्रति बोधिता च जननी भावान्तरं प्रापिता
प्रीत्योवाच 'तथैवमस्तु पितरं वक्ष्यामि तत्ते ध्रुवम्' ।
विश्वस्तो जननीगिरा गृहगतो गङ्गाजलस्नापितो
'विद्या मात्रविरक्तिदाऽन्यदपि' तज्ज्ञातुं निमायीच्छति ।।१६८।।

'द्वीपे चात्र नवे सहस्रसुधियश्छात्राश्च तत्संख्यकाः
संन्यासी नहि कोऽपि तेषु जनितो भाग्यानुसारं हि तत् ।
तत्सर्वे यतिनो भवन्ति भुवि नो विद्यार्थिनो ब्राह्मणा
लोके चात्र न शोभते द्विजसुतो मूर्खस्तथाऽपण्डितः ।।१६९।।

भाग्ये चेल्लिखितं तदेव, न वयं रोद्धुं तथा शक्नुमः
स्वामिन्! यच्छतु सम्मतिं हि पठितुं माता शिशोर्याचते' ।
तल्लोकाग्रहतोऽपि पुत्रपठनादेशं ददौ पण्डित-
स्तद्विद्यापठने निमायिचरितः पित्रोर्निदेशाद्रतः ।।१७०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताम्बूलस्य च भक्षणाच्छिशुरयं नैवेद्यतश्चैकदा
चैतन्याद्रहितः पुनः प्रकृतितां प्राप्तो जगाद स्फुटम् ।
'विश्वोऽदर्शि मयाऽग्रजः स वदति-त्वं गच्छ संन्यासतां,
दद्याऽहं शिशुको न वेद्मि विरतिं पित्रोश्च भाविव्रती' ।।१७१।।

'यामः सम्प्रति मातरं वदतु मे पादप्रणामाञ्जलिं'
वार्तां विश्वगतां निमायिमुखतः श्रुत्वा च पुत्रस्मृतेः ।
अश्रुक्लिन्नमुखी जगाद जननी चालिङ्ग्य तं वक्षसा
'त्वन्मात्रं शरणं हि, विश्वपथगो मा भूच्च वृद्धान्धयोः' ।।१७२।।

व्रतबन्धः

३०. व्रतिनो भूमौ देशे वंशे मानवधर्मस्तम्भाः।

ईशमुहम्मदनानकमनवो भूप्रकृतेः संस्काराः
वैष्णवशैवशाक्तमतपथिका देशजहार्दिकभावाः ।
रामकृष्णसौगतसत्तीर्था मानववंशाऽऽलोकाः
गौरव्रतहरिबोलकीर्तनं हृद्वसुधारसधारा ।।

यत्कालाच्च शिशुर्विहाय जननीक्रोडाञ्चलं क्रीडति
स्वेच्छातो वसुधाञ्चले च कुरुते तच्चिन्तनं वै पिता ।
स्वस्थः पुष्टवपुस्तथाहि नवमे वर्षे निमायी गतः
स्थाने षोडशतामवाप्ततरुणस्पष्टोपमो लक्ष्यते ।।१७३।।

तस्मादस्य च कर्तुमिच्छति शिशोर्यज्ञोपवीतं पिता
संस्कारान्नरजीवने हि नियमः संगृह्यते संयमः ।
संस्काराः खलु षोडश द्विजकृते गर्भाच्च मृत्योः पुरा
तद्वर्णाश्रमधर्मतश्च करणाच्चित्तप्रभावोद्गतिः ।।१७४।

संस्कारो व्रतबन्धनाम कथितो यज्ञोपवीतस्ततो
वेदारम्भपवित्रितः श्रुतिपथे बालोऽधिकारी द्विजः ।
वेदाधीतिकृते शिशोर्गुरुगृहे नीतस्य तत्सद्गुरोः
शौचाचारविधिक्रियोपनयनं पश्चात्समावर्तनम् ।।१७५।।

श्रीमिश्रो व्रतबन्धयज्ञमनसा यज्ञोपवीतोत्सव-
ञ्चारेभे निजशक्तितोऽतिविततं पुत्रस्य भद्रेच्छया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यज्ञार्थं शुभमण्डपे श्रुतिविदो विप्राश्च सम्बन्धिनः
शोभन्ते परतः स्त्रियश्च निरता गाने निषण्णाः शुभे ।।१७६।।
वाद्यं द्वारि च मङ्गलं नदति तच्छ्रीमण्डपे पण्डितः
श्रीविष्णुर्ग्रहपूजनञ्च हवनं कर्तुं समिश्रः स्थितः ।
नीतो मुण्डितबालकः कटितटे कौपीनपीताम्बरं
स्कन्धे तच्च मृगाजिनं निजकरे दण्डं दधौ मण्डपे।।१७७।।
रेजे गौरवपुर्हि पीतकटितस्तद्ब्रह्मचारी शिशुः
स्थित्वाऽसौ समिधायुतोऽग्निहवनाद्यज्ञोपवीतं दधौ ।
वस्त्राच्छादनया जजाप जनकः कर्णेऽस्य मंत्रं ततो
गायत्रीश्रवणादसौ च पतितो भूमौ स्वहुङ्कारतः।।१७८।।
दण्डश्चास्य कराच्च्युतोऽन्यदिशि तच्चान्यत्र देहः शिशो-
र्मन्दं श्वासगतिर्वपुर्ह्यविचलं नेत्राश्रुधारा तथा ।
सम्भ्रान्ता निखिला जनाः शिशुदशां दृष्ट्वा च तद्यत्नतः
'कार्यं सम्प्रति किं पितश्च' वदतो मुग्धाः क्षणात्संज्ञया ।।१७९।।
संस्कारादनुभावितो दृढतया दृष्टो निमायी तदा
ज्योतिर्दीप्तमुखो व्रती शिशुरयं कायान्तरावेशितः ।
ब्रह्माधीतिरतो वटुर्गुरुगृहे भिक्षान्नमात्रग्रही
तत्सम्प्रत्यपि याचनं विधियुतं यज्ञोपवीताङ्गकम् ।।१८०।।
दीप्तं मुण्डितमस्तकं रविकरैश्चाषाढदण्डः करे
स्कन्धे लम्बति झोलिका चरति तद्भिक्षां यथा वामनः ।
आचार्यस्य च शिक्षया 'भवति! मे भिक्षां प्रदेहि स्वरा-
ल्लावण्याच्च विमोहिता हि वनिता भिक्षाममुष्याददुः ।।१८१।।
भिक्षायाचनकर्मणि प्रथमतो मातुः समक्षं व्रती
गत्वा याचितवान् ततश्च जननी दृष्ट्वा निमायिच्छटाम् ।
मुग्धा स्नेहयुता ददौ च मुदिताऽतृप्तेव सा लक्ष्यते
नारीणां हृदयं निमायिशिशवे सर्वस्वदानोद्यतम्।।१८२।।
आयातः शुभमण्डपेऽपरिचितो दण्डावलम्बी द्विजो
वृद्धस्तन्निदधौ निमायिपुटके हस्तेन पूगीफलम् ।
बालस्तच्च मुखे चकार तरसा ब्रूते स्म तद्भक्षणा-
द्भावावेशगतो 'व्रतं कुरु सदा मातर्हरेर्वासरे' ।।१८३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माता चापि दशान्तरस्थितमना नो वेद पुत्रस्वरं
प्रत्युक्तोऽपि महातपा वदति मां जग्राह मत्वा तथा ।
'त्यक्त्वाऽन्नं हरिवासरे तव वचोभक्त्या करिष्ये व्रतं'
'यामः सम्प्रति रक्ष चात्मसुतकं' चोक्त्वा पपातावनौ ।।१८४।।

बालं रक्तविलोचनञ्च परितः सुप्तोत्थिताभं क्षणा-
त्पश्यन्तं जनको जगाद 'किमिदं, वत्साऽधुनाऽवादि किम्?
'नाहं वेद्मि पितस्तदा किमभवच्छ्रुत्वाऽखिला विस्मिता
दिव्यात्मा, हरिभावना, किमथवा शङ्कान्तरं चोचिरे ।।१८५।।

बालो 'गौरहरि'र्निमायिपदतो यज्ञोपवीते कृते
नारीणां ममताहृदां रुचिकरं जातश्च संज्ञान्तरम् ।
यज्ञे तत्र कृतः प्रियः श्रुतिहृदोर्गौराङ्गगौरो हरि-
र्द्वीपे तन्नवसंख्यके प्रसरितः प्रेमा नवद्वीपतः ।।१८६।।

संस्कारे व्रतबन्धनाम्नि सुफले जाते समावर्तने
सम्पन्ने नववस्त्रशोभितशिशुर्गौरोदयो मण्डपात् ।
आदौ स्पर्शपुरस्सरं पितृपदे नत्वा तथैवं क्रमा-
द्वृद्धानां प्रणतिं विधाय बहुलं जग्राह तच्चाशिषम् ।।१८७।।

गौरः सम्प्रति स द्विजो हि पठितुं यो याति विद्यालयं
मेधाशक्तिबलात्तथा स्मरति यन्नोदेति पृच्छा पुनः ।
आचार्यश्च सुदर्शनः प्रमुदितौ विष्णुस्तथा पण्डित-
स्तन्मायापुरपार्श्वगाङ्गनगरे पाठाय पित्रार्पितः ।।१८८।।

गङ्गादाससुधीश्च पण्डितवरः ख्यातश्च विद्यालये
सिद्धो व्याकरणे ततश्च पठने मज्जन्ति मेधाविनः ।
गौराङ्गः पदशास्त्रपाटवमनास्तत्रैव मग्नो वटु-
र्धन्यः केवलशारदावरसुतः शिष्यप्रसिद्धिस्मृतिः ।।१८९।।

पितुः परलोकगमनम्

३१. कालो जनयति कलयति लोके भावं समयेऽसमये ।

केषाञ्चिन्नहि सन्ततिलाभो जाता नश्यन्त्यन्याः
लोकस्पृहणीयो विश्वस्तो गृहसुखबन्धाच्च्यवते ।
शेषाल्पे सन्तुष्टः प्राणी नहि शेषक्षणवेत्ता
सद्योजातं जनकः पश्यति यान्तमितस्तं शिशुकः ।।

यावद्यस्य सतः प्रयोजनमिह ज्ञातस्य सत्ता तथा
तत्तावच्च विराजते जगति वै पश्चात्ततो लीयते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भद्रं साधु च मङ्गलञ्च ललितं श्रेयश्च सत्यं शिवं
काले सुप्रकटं तथैव रहसि स्थाने स्थितं जायते ।।१६०।।
आशाश्वासगतिर्दधाति जगतीं मिश्रो जगन्नाथजी
कन्यानां मरणञ्च विश्वविरतिं विस्मृत्य सक्तो गृहे ।
पुत्रस्नेहसुसिञ्चितेऽपि हृदये चिन्ता निमायीमन-
श्चाञ्चल्याज्जनिता तदग्रतनयह्रीभावसङ्कोचिता ।।१६१।।
संदीप्ता ज्वलितुं गृहस्थहृदयं विश्वस्य संन्यासतो
भूयः सैव निमायिबालकहृदः पर्यायतो विस्मृता ।
संस्कारं सहजञ्च लौकिककृतं मेधाविभद्रात्मन-
श्चक्षुःप्रीतिकरस्य तन्नियमिनश्चास्वाद्य पुष्टः पिता ।।१६२।।
बालो बाल्यमतीत्य संसृतिपथा संलक्ष्य पित्रोर्दशां
सम्प्रत्येव कृतोपवीतसुमतिर्विद्याग्रहावेष्टितः ।
तस्यासक्तिमतिस्मृतिश्रुतिरतिं विद्याप्रकृत्या पिता
वल्लीशाखयुतं मनोरथतरुं लब्ध्वाऽऽत्मना कल्पते ।।१६३।।
'आशा मे दययाऽधुना भगवतो नूनं प्रदात्री फलं
द्रक्ष्ये शीघ्रमहं गृहाङ्गणगतं गौरं वधूसंयुतम्' ।
संसारे पितरौ सदैव भवतो लब्धुं वधूमुत्सुकौ
मिश्राशा नहि तावदत्र सफला, भिन्नौ विधाता पिता ।।१६४।।
वर्षे गौरवटुर्गभीरतरुणश्रीकस्तथैकादशे
प्राप्तः केवलमद्य, तत्प्रतिदिनं पादौ पितुर्वन्दते ।
एकस्मिन् दिवसे ददर्श पितरं तप्तं तथा मूर्च्छितं
'मातर्मे जनकः कथं स विकलः' 'पुत्र! ज्वरात्पीडितः' ।।१६५।।
गौरः पार्श्वगतः पितुश्च शिरसो हस्तावमर्शं शनै-
श्चक्रे तज्जनकस्य कोमलकरस्पर्शाच्च तन्द्रा गता ।
तत्पुत्रं निकटे विलोक्य जनकः क्षीणस्वरादुक्तवान्
'पातुं देहि जलं', तदेव सुततो लब्ध्वा प्रसन्नः पिता ।।१६६।।
आश्चर्यं जगतीह कोऽपि जनकः स्वल्पं सुतादिच्छति
श्रद्धालुर्निजशक्तितोऽपि बहुलं पित्रोश्चिकीर्षुः सुतः ।
एवं सात्त्विकयोर्द्वयोः सुघटको धाता विरुद्धं कथं
तत्प्रायोऽसमभावको विघटकोऽकाण्डे पुनः सिध्यति? ।।१६७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुत्रप्राप्तजलेन तृप्तपितरं गौरश्च जिज्ञासते
'स्वास्थ्यं सम्प्रति कीदृशं तव पित'स्तच्छोभनं साम्प्रतम् ।
चिन्तां मा कुरु, किं गतो न पठितुं' पप्रच्छ रुग्णः पिता
'गन्ता नो पठितुं गृहात्तव सुतो यावच्च तेऽस्वस्थता' ।।१९८।।

मौनस्तत्कथनात्पिता, स निकटे म्लानो निषण्णः सुत-
स्तद्याता दिवसास्तथा कतिपये नाल्पं ज्वरः शाम्यति ।
द्रव्याभाववशाद्गृहस्य निकटाद् वैद्याच्च साधारणा-
त्तल्लब्धौषधितो ज्वरश्च शमनस्थाने तथा वर्धते ।।१९९।।

आयातः समयोऽन्तिमो गृहपतिर्जानाति तच्चाशया
हीनः सम्प्रति जीवनस्य वनितां मन्दं शचीमुक्तवान् ।
'वाञ्छा मे वपुषाऽमुना ध्रुवमिति ज्ञातं न पूर्णा भवे-
त्सत्यं, श्रीरघुनाथजीच्छति यथा किं तत्र वश्यं हि मे ।।२००।।

नो लब्धं किमपीह वै मम गृहे सौख्यं त्वया जीवने
तत्रापीच्छति यत्तथाहि भगवान् कालोऽधुनोपस्थितः' ।
दीर्घश्वासयुतेन तेन कथितं 'रक्ष्यो निमायी सुतः'
शक्तो वक्तुमतो नहीति विकला चक्रन्द देवी शची ।।२०१।।

गौरस्तत्पितरं निनाय शयनाद् भूमौ च दर्भासने
'गङ्गामातृतटे द्रुतं नयतु मां' मिश्रः शनैरुक्तवान् ।
गौरः केवलमातृयोगसहितश्चैकादशायुः सुतो
निन्ये गाङ्गतटे सुमिश्रपितरं स्पर्शं परान्नाददे ।।२०२।।

'त्यक्त्वा गच्छसि नः पितस्तु जगतो नावर्तते यत्पुन-
र्हस्ते कस्य ददासि मां, वद' लघु ब्रूते निमायी रुदन् ।
मन्दं क्षीणकरं निधाय शिरसि स्वोरस्यदःशीर्षकं
'पुत्र! त्वां भगवत्करे हि निदधे, विश्वम्भरो रक्षिता' ।।२०३।।

उक्त्वैवं विजहौ हि नश्वरमिदं गङ्गातटे पावने
मिश्रः पावनपण्डितः सुतमुखो विश्वम्भरोच्चारणात् ।
गौरक्रन्दनतो रुरोद विकला तद्धर्मपत्नी शची
गङ्गावारिसुबन्धुशीतलवचो धैर्यस्य बन्धो द्वयोः ।।२०४।।

अन्त्येष्टिं विधिपूर्वकं स कृतवान् पुत्रो निमायी पितु-
र्याते वै विकलः सुतः पितरि तद्वैधव्यमूढा शची ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नान्यः कोऽपि गृहे स्वयं लघुसुतो धैर्याब्धिचन्द्रोपमो
'मातर्दुःखविनोदको हि भविता भूमेर्निमायी तव' ।।२०५।।

मिश्रः संसृतितो यथा झटिति वै चक्रे महाप्रस्थितिं
लेभे ज्योतिरिदं गृहे निजसुतात्तद्विश्वरूपात्मदम् ।
वैराग्यात्सहजं गभीरहृदयस्तत्याज गुप्तो गृहं
तत्कर्तुं सति पार्यते पितरि नो रागान्निमायी सुतः ।।२०६।।

विद्याव्यासङ्गी निमायी

३२. शैशव! नरमप्यमरं कुरुषे, यदि लभसे परिवेशम्।

बालस्तावत्क्रीडासङ्गो भाग्यात्सत्कुलवासः
पौगण्डे तत्पारम्परिके नद्धः सद्गुरुणाऽन्यः ।
कैशोरे खलु ललितविलासो, ग्रन्थास्वादयिताऽन्यः
एतत्त्रितये विद्यासङ्गः कविकुलगुरुनिर्यासः ।।

बाला धीरगभीरभावहृदयाः, प्रायो हि मेधाविनः
पाण्डित्यं नहि तद्वशाच्च सदपि स्पष्टं तथा जायते ।
सम्मानाधिगमश्च लोकहृदयात्तेषामवश्यं परं
संलापेऽपि तु सङ्कुञ्चन्ति, बहुधा दूरे वयस्यास्ततः ।।२०७।।

मेधावी यदि चञ्चलो जनमनोनोदी वयस्यप्रियो
बालस्तत्परिहासपेशलमतिः स्वर्णे च गन्धागमः ।
एवं बालसखा गुरुप्रियशिशुः सिद्धो निमायी तथा
भिन्नो विश्वसहोदरादुपमितश्चाञ्चल्यपाण्डित्यतः ।।२०८।।

हास्यं तन्मुखतः सदैव झरति म्लानो न तद्रोचते
क्रन्दन्तं जनमप्यसौ स्मितमुखं हासैर्विधत्ते द्रुतम् ।
वर्षे पञ्चदशेऽपि यद्यपि गतो गौरोऽधुना नायुषा
वृद्धैः सार्धमसौ तथापि कुरुते हास्यं विनोदप्रियः।।२०९।।

गङ्गादासगुरोश्च पाठभवने मेधाविनो बालकाः
कक्षाज्ञानदृशा तथैव वयसा गौरोपमातोऽधिकाः ।
कृष्णानन्दमुरारिगुप्तकमलाकान्ता हि तन्त्रागमे
साहित्ये कविताकृतौ सुयशसा ख्याताः सहाध्यायिनः ।।२१०।।

सार्धं तैरपि पाठजीवनसखा कक्षायुषोश्चाधिकै-
श्चाञ्चल्यं विदधाति हासवचसा तीक्ष्णो निमायी वटुः ।
प्रायो वैष्णवबालकैः सह वचःक्रीडात्रपोत्पादक-
स्तेषां ज्ञानगुरुर्लघुश्च वयसा भेदं विधत्ते नहि।।२११।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आयुर्वृद्धमसौ मुरारिमधिकं भिन्ते विनोदी गिरा
प्रायो बालमुपेक्षते स हि परं ज्ञात्वाऽस्य मेधां पुनः ।
प्रीत्या तेन समञ्च शास्त्रविषयासक्तः सदा दृश्यते
सङ्गस्तत्क्रमतो दृढं प्रसरितो मेधाविनोर्वार्तया ।।२१२।।

'सिद्धं त्वं कुरु तं प्रयोगमधुना' शुद्धं मुरारिर्यथा
चक्रे, तत्तरसा तु दोषबहुलं ब्रूते निमायी पटुः ।
नानाखण्डनमस्य पण्डितमतिः कृत्वा च शङ्काकुलं
भूयो गुप्तमतं तथैव विमलं सिद्धं करोत्यद्भुतम् ।।२१३।।

एवं व्याकरणप्रयोगपटुतासिद्धः सुधीः सस्मितं
ब्रूते 'गुप्तमहाशय! त्वमधिको वैद्योऽल्पमेधः पदे ।
पाण्डित्ये न गतिस्तवास्ति, वनतः संगृह्य मूलौषधिं
नाडीदर्शनतश्चिकित्सनरतो द्रव्यार्जने मज्जताम् ।।२१४।।

रोगी जीवतु भाग्यतो, मरतु वा कालात्तवास्तु स्वकं
वित्तं, श्रीयमराजसोदर! नमस्तुभ्यं' स्वहासोक्तिभिः ।
गुप्तं मानसलज्जितं तु मुखतो मौनं सुहृत्सस्मितं
सस्नेहं विदधाति कोमलकरस्पर्शात्प्रसन्नं पुनः ।।२१५।।

शास्त्रार्थेऽनुपमः स्वयञ्च सुमतिः संदूष्य पूर्वं स्वकं
नानायुक्तिविधैर्हि मण्डयति तत्पक्षं तथैव द्रुतम् ।
शुद्धं वाऽस्तु तथाह्यशुद्धमधुना चान्यस्य तत्खण्डनं
मेधाजेतृनिमायिशास्त्रपटुता छात्रैर्हृदा शस्यते ।।२१६।।

मार्गे व्याकरणप्रयोगविषयप्रश्नो विलोक्य ध्रुवं
गौराङ्गेण विधास्यते हि मिलनात्त्र्यस्यन्ति विद्यार्थिनः ।
सायं गाङ्गतटे मिलन्ति निखिलास्तेषां सहाध्यायिनां
शास्त्रालापवरो विवादविजयी सिद्धो निमायी वटुः ।।२१७।।

टीकायुक्तसमूलहस्तलिखितग्रन्थप्रचारो यत-
स्तत्काले नहि मुद्रणं तदपि तच्छात्रैस्तथाऽभ्यस्यते ।
आचार्याश्रितटिप्पणीग्रहणतो दुर्बोधबोधार्पणे
ह्यन्योन्यञ्च विचारणेऽस्य गुरुता गौरस्य संसिध्यति ।।२१८।।

'पञ्चीटीकन'शब्दशास्त्रपठितग्रन्थे निमायीकृता
पाण्डित्याकरटिप्पणी हि गुरुभिर्मुक्तस्वराच्छंसिता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्दूरं प्रसृता निमायियशसा छात्रोपयुक्ता समं
शास्त्रे व्याकरणेन लाघवतया मेधाऽस्य चालङ्कृतौ ।।२१९।।

न्याये व्याकरणाच्च सम्प्रति नवद्वीपे हि विद्यारुचि-
स्तर्कप्राञ्जलसार्वभौमकलितश्रीवासुदेवाद् गुरोः ।
तस्माच्च जगदीशपण्डितगुरुर्भव्यो भवानन्दजी
न्यायार्थे रघुनाथदीधितिकरो विद्यालयात्पण्डितौ ।।२२०।।

न्यायस्य श्रुतसार्वभौमविदुषः केन्द्रञ्च विद्यालय-
स्तस्मान्न्यायविदः प्रसिद्धिघटिताश्छात्राः श्रवोलोलुपाः ।
तर्काध्यायविशेषभावपथिको गौरोऽत्र शिष्येतरा
गन्तारो गुरुशास्त्रगूढविषयज्ञाता श्रुतिस्थाणवः ।।२२१।।

न्याये श्रीरघुनाथनामतरुणः ख्यातश्च शिष्योत्तमो
मेधातर्कविलक्षणां निजगतिं शास्त्रेऽत्र वै मन्यते ।
बाल्यादस्य हि वासना बलवती ग्रन्थोत्तमख्यातित-
स्तर्के भारतविश्रुतिर्भवतु तद्दीधीतिटीकार्जिता ।।२२२।।

कालेनास्य निमायिनाऽत्र मिलनात्सम्भावनावार्तया
चिन्ता द्वीपनवः कुतश्च पतितो मेधावितर्काऽभयः ।
अन्वीक्षात्ममतिप्रकर्षभरितो धैर्यावलम्बं दधौ
जाता तर्कविचारचारुचरितख्यात्या च मैत्री द्वयोः ।।२२३।।

पङ्क्तिं याञ्च गुरुर्ददौ हि मथितुं मग्नस्तदालोडने
मध्याह्ने गुरवे निवेद्य मुदितो मेधाभिमानी रघुः ।
मग्नं रन्धनकर्मणि ह्यसमये नालोक्य शालास्थितं
गौरो वासमवाप्य पृच्छति 'रघोऽकाले कथं रन्धनम्?' ।।२२४।।

'प्रातः पङ्क्तिविचारमग्नसमयव्याप्त्या दिनार्धं गतं
कृच्छ्रं चात्मगतं विधाय गुरवे चोक्त्वाऽधुना पाचनम्'।
'का चाऽसौ भवतो विलक्षणमतेः पङ्क्तिर्विपत्तिर्गता
शीघ्रं मे कृपया निवेदय सुहृत्तद्रूपजिज्ञासवे' ।।२२५।।

उक्तं तद्रघुणा विचिन्त्य सहसा 'किञ्चात्र दुर्बोधता?
गौराविष्टरघूक्तिरत्र 'यदि तत्पङ्क्तिस्त्वया साध्यताम्'।
पूर्वं पक्षमुवाच तत्र विमलं शङ्कासमाधानतः
पङ्क्तिं साधु समादधौ हि सुहृदो भारं निमायी द्रुतम् ।।२२६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोक्ता तन्मुखतो दुरुहविषयख्यातिप्रकाशप्रभा-
तीक्ष्णस्वादुविपक्षपक्षरसनाभुक्तः सपक्षे रघुः।
ग्रस्तं यन्नवशङ्कयाऽस्य हृदयं तद्व्यञ्जनाभावकः
प्राज्ञो विस्मृतपाकलज्जितरघोर्व्याजान्निमायी गतः।।२२७।।

द्वेषो यस्य न मानसे व्यवहृतौ सम्मानभावोऽखिल-
व्यक्तौ प्रीतियुता ततोहि जनता तस्यात्मतुल्यक्रिया।
वर्षे षोडशमे गतोऽद्य विनयी दीर्घाक्षदीर्घाक्षर-
स्तेजस्वी मधुरो गुडालकमुखो गौरः स्वतः स्वाद्यते।।२२८।।

नव्यन्यायपथे मदीयरचनाऽपूर्वा कदापि ध्रुवं
मग्नो दीधितिसञ्चयेऽत्र समये सब्रह्मचारी रघुः।
न्यायाभ्यासरतोऽधुना लिखति तद्गौरो निजां टिप्पणीं
श्रुत्वा मित्रनिमायितर्ककलनां द्रष्टुं रघुश्चातुरः।।२२९।।

तर्के सम्प्रति लिख्यते हि भवता तद्द्रष्टुमिच्छाम्यहं'
'न्याये त्वत्समतीक्ष्णपण्डितमतेः शक्तिस्तु मेऽल्पा गतिः।
उक्तं केन 'मनोविनोदसमयक्षेपस्ततो नाधिकं'
'यत्तद्दर्शय मित्र! नो यदि तवापत्ती' रघोराग्रहः।।२३०।।

'आपत्तिर्नहि काऽपि मेऽस्ति सुभगं भाग्यञ्च, जिज्ञासते
द्रष्टुं मेऽद्य भवादृशश्च सुमतिर्नेष्यामि तत्तां कृतिम्'।
प्रातः पाठगृहाऽऽगतौ त्रिपथगाधारातरीसंस्थितौ
गौरः श्रावयिताऽमलः पथि रघुः श्रोताऽन्यजिज्ञासया।।२३१।।

ग्रन्थस्य श्रवणक्रमाद्रघुमनस्तापाद्दृगम्बुस्रुतिं
गौरो वाचनसक्तलोचनवशात्पूर्वं न वेद ध्रुवम्।
मध्ये वाचनतो विरम्य च रघुं दृष्ट्वा सुहृद्विस्मितो
मित्रं पृच्छति 'ते मुखे नयनयोर्धाराश्रुपातः कथम्'?।।२३२।।

'गौर! त्वामधुना वदामि मनसस्तापाश्रुहेतुं स्फुटं
पापं भावपिधानतो नहि नवं कर्तुं पुनश्चोत्सहे।
एकं ग्रन्थमहं लिखामि समये सर्वोत्तमा मान्यता
न्याये नव्यपथेऽस्तु तस्य महती वाञ्छाऽस्ति मे हार्दिकी।।२३३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुत्वा सम्प्रति टिप्पणीञ्च सुहृदश्चाशा तुषाराहता
प्रायः स्थास्यति गौरचन्द्रकिरणे म्लानेव मे पद्मिनी ।
ग्रन्थेऽस्मिन् सति को मदीयरचनां द्रष्टा तथा श्रद्धया
स्रोतःस्विन्नमुखं ततो नयनयोर्हृद्दुःखदग्धस्य मे' ।।२३४।।

उच्चैस्तत्र जहास मित्रवचसा प्रीत्या रघुं संस्पृशन्
'हेतुश्चाल्पतमो मनोऽनुतपने' गौरो जगाद द्रुतम् ।
'दत्वाऽहं ज्वलदग्निमध्यवपुषं प्राणार्पणायोद्यत-
स्त्वन्मोदाय दिवानिशं मम रघो! ग्रन्थो वराकः कियान् ।।२३५।।

कष्टं ते मम मित्र! पुस्तकमिदं वाचामलक्ष्यं ददौ
सम्प्रत्येव विनाशयामि भवतो नौकास्थितः सन्निधौ'।
गङ्गास्रोतसि तत्क्षणं निजगिरा सार्धं जहौ पुस्तिकां
विद्यार्थीसमयेन हस्तलिखितां गौरो निमायी वटुः।।२३६।।

त्यक्ताः पुस्तकपत्रिकास्त्रिपथगावारिप्रवाहे तदा
प्रेमत्यागमयं निमायिचरितं व्यक्तं शशंसुर्मुदा ।
नृत्यन्त्योऽलमितस्ततः सुरनदीधारावयस्या रघोः
स्थाने केवलसाक्षिणो नयनयोः प्रत्यक्षदृश्यं ददुः ।।२३७।।

कण्ठेकृत्य निमायिनं कथितवान् रुद्धस्वरः श्रीरघु-
'र्भ्रातर्लोकविलक्षणं दृशिगतं स्वप्नोपमं जाग्रतः ।
संसारो हि तृणायते श्रुतमिदं तन्निःस्पृहाणां स्फुटं
दृष्टं सम्प्रति चन्द्ररश्मिधवले त्यागे निमायीकृते ।।२३८।।

लोकेऽस्मादृशकीटतुल्यजनताः कीर्तिप्रतिष्ठाप्रियाः
प्रायः सन्ति गृहे-गृहे भुवि सदा लोकैषणारोगिणः ।
मान्यो वै वसुधाविशेषविषयः पुण्यं मुहूर्तं दिनं
धन्यौ तौ पितरौ वरं कुलगृहं जातो निमायी यतः ।।२३९।।

त्यागं प्रेम सहिष्णुतां सुजनतां लब्धुं च दातुं तथा
वाञ्छामो वयमत्र केवलमिदं स्पष्टायते त्वादृशैः ।
त्वत्तुल्यं यतते किमत्र हि रघुः क्षेप्तुं कृतिञ्चात्मनो
व्यक्तं निष्करुणस्य यच्च हृदयं तद्दुर्लभान्तं फलम् ।।२४०।।

सङ्गात्ते सहते भरं सुरनदी, मग्ना तरी चान्यथा
लभ्यः प्रस्तरमानसे विदलनात्तच्छ्रीफलान्तर्द्रवः ।
विद्यार्थी गुरुतश्च वेत्ति गृहिणी वाचस्पतेर्भामतीं
वेत्तारो रघुतो निमायिशशिनो नैयायिका दीधितिम्' ।।२४१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वं स्वं वासगृहं गतौ च सुहृदौ गङ्गाधरावार्तया
संसारे परिवर्तते च बहुलं धात्री स्थिरा वै धरा ।
गङ्गा सेचनकारिणी परमिह स्थाने सरन्ती सदा
धान्यक्षेत्रमरुस्थलाम्रवनिकामाता पयोधेनुका ।।२४२।।

तस्मादेव दिनान्निमायिपठनं न्यायस्य विद्यालये
यानं चापि समं तथाह्यपसृतं वाच्यो विरामः क्वचित् ।
एवं न्यायविषाक्तमार्गमनसि स्थाता निमायी कथं
भ्रातुश्चापि पितुर्गृहाऽन्तरगतान् ग्रन्थानधीते परम् ।।२४३।।

विवाहः

३३. गृहिणी वर्गत्रयसाधयिका पुरुषं गृहिणं कुरुते।

वटवो यतिनो गृहतो जातास्तत एवैषां भिक्षा
वनवासेऽपि गृहस्थितितुल्यं वनिनां सङ्गे गृहिणी ।
यज्ञपञ्चके चातिथिसेवा गृहिणीसाध्या सम्यक्
गृहधर्मो जगदर्थो लोके गृहिणी मानसकामः ।
पुत्रकामनाजननी गृहिणी सैव वित्तमर्यादा ।।

आश्चर्यं वटसूक्ष्मबीजहृदये गुप्तो महान् पादपः
कष्टञ्चान्यधरोद्भवस्य तुलितं बीजेन तन्मन्यते ।
यद्यप्यङ्कुरतुल्यता ननु तयोर्वृद्धौ स्थितौ भिन्नता
मासैः शुष्यति तत्त्विदं हि शरणं छायार्थिनां शाश्वतम् ।।२४४।।

द्वीपे चात्र नवे यथाऽन्यसुधियश्चोद्भाव्य विद्यालयं
छात्राध्यापनवृत्तयो, जनमतं भावी निमायी तथा ।
आसक्तिर्भुवि मूर्खपण्डितसमा स्वर्णप्रतिष्ठातनु-
स्तल्लोकस्य मते निमायितरुणः सामान्यलोकोपमः ।।२४५।।

औचित्यं जनचिन्तनेऽस्य शिशुता लोकेन्द्रियास्वादिनी
भिन्ना विश्वसहोदराद्दृशिगता चादौ तथा मान्यता ।
नो जानन्ति, यदस्य भाववशिता विश्वस्य बन्धोर्हृदः
प्रेम्णाऽसंख्यजना महाधनरताऽऽसक्तिच्युता भाविनः ।।२४६।।

न्याये व्याकरणे निमायिपटुता चालङ्कृतौ सञ्चिता
तृप्ता सम्प्रति शास्त्रतश्च विरता मित्रैः सहाध्यायतः ।
गौरश्चिन्तयते गृहे च विधवा माता तथैकाकिनी
दैवेच्छागगनाश्रिता गृहनृणा वृत्तिश्च चिन्त्याऽधुना ।।२४७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वीपे चात्र मुकुन्दसञ्जयधनी विद्यानुरागी महान्
पुत्राऽध्यापनहेतुकं मृगयते प्राज्ञं तथाऽध्यापकम् ।
शास्त्रज्ञेषु हि संस्तुतो बुधवरः ख्यातो निमायी द्विजो
विद्याकेन्द्रनवेऽत्र सञ्जयदृशो व्यासो निमायी शशी ।।२४८।।

वङ्गे धार्मिकलोकवासपरिधौ नूनञ्च देवीगृहं
चण्डीमण्डपनामतो नवनिशापूजाऽत्र चायोज्यते ।
सत्कारो ह्यतिथेस्तथाऽन्यसमये तत्रैव सम्पाद्यते
गौराध्यापनयोगसञ्जयगृहश्रीचण्डिकामण्डपः ।।२४६।।

गौराङ्गो गृहवृत्तिचिन्तकयुवा स्वध्यापनायोद्यतो
योगात्सञ्जययाचनानियमितश्चारब्धवान् पाठनम् ।
तस्याध्यापनपाटवेन वशितैश्छात्रैर्द्रुतं पुञ्जितैः
केन्द्रे सञ्चलितेऽपि पुत्रसहितोऽध्येता पिता सञ्जयः ।।२५०।।

छात्रैः सार्धमसावपि स्वयमतिश्रद्धामनोयोगतो
निष्ठाप्रीतियुतस्तपोवनसमञ्चक्रे निजं मण्डपम् ।
गङ्गादासगुरोर्निमायितपसो न्यूनेऽन्यविद्यालये -
ऽध्येता व्याकरणे तथा न मुदितः शिष्यो गुरुश्चाजितौ ।।२५१।।

लक्ष्मीर्वल्लभकन्यका सुरनदीमार्गे निमायी तथा
दैवात्सम्मिलितौ पुरा परिचितौ नेत्रानुरागान्वितौ ।
लोके सौहृदमुत्थितं भवति तज्जन्मान्तरे सञ्चितं
बाल्ये प्रत्युत यौवने च नियतं संसर्गतः प्रेमिणोः।।२५२।।

आश्चर्यं भवितव्यदैवविधिना संयोगपूते दिने
विप्रः श्रीवनवारिनामघटकः प्राप्तः शचीसन्निधौ ।
'गौराङ्गस्तरुणायते परिणयोद्योगोऽस्य कार्योऽधुना
सम्प्राप्तो भवतीमहं हितमतिः श्रीमिश्रसौहार्दतः ।।२५३।।

आस्ते पण्डितवल्लभस्य दुहिता लक्ष्मीः सुशीला सती
मुग्धा बुद्धिमती वधूगुणवती गौरोचिता सर्वथा ।
आचार्योऽपि सजातिविप्रतिलको लक्ष्मीनिमायीतुला-
सम्बन्धस्तव रोचते यदि, तदा वार्ता मया सार्यते'।।२५४।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माता चेच्छति किन्तु पुत्रमनसो भावं विना नोद्यता
स्थाने बुद्धिविवेकभावितसुतो, ज्ञेयो विचारस्ततः ।
अन्यः कोऽपि विचारको गृहनरो नास्त्यद्य सञ्चिन्त्य, तद्
ब्रूते'ऽनाथसुतस्य कः परिणयश्छात्रोऽद्य, वृत्तौ कथा'।।२५५।।

औदासीन्ययुतं शचीमुखवचः श्रुत्वा द्विजो ज्ञातवान्
सम्बन्धोऽयमहो निमायिजननीवाचा निरस्तो ध्रुवम् ।
कन्याया जनकश्च नास्ति धनिकस्तद्व्यञ्जनाखण्डनं
निर्यातो घटको निमायिवचसा मध्येपथं हर्षितः ।।२५६।।

'सत्यं ब्रूहि महाशयाद्य घटक! भ्रान्तः कुतस्त्वं कुतो'
'मातुः पार्श्वगतश्च ते परिणयप्रस्तावकः साम्प्रतम् ।
लक्ष्मीं वल्लभजां निमायिविदुषः श्रीवल्लभां वल्लभां
नो जानाति शची हरिप्रियवधूं मात्रा ततोऽस्वीकृतम् ।।२५७।।

नो जाने विदुषस्तवापि हृदयं' चोक्त्वा निमायिस्मित-
स्थाने व्यक्तमतं निनाय घटकः प्राप्तो गृहं पण्डितः ।
'दृष्टो मन्दमुखाकृतिः स घटकस्तद्वल्लभप्रस्तुतिं
स्वीचक्रे न कथं,' शची सुतवचोऽनापत्तितो हर्षिता ।।२५८।।

आहूतं घटकं शची परदिने ब्रूते तथा स्वीकृतिं
'नान्यः कोऽप्यभिभावको निजगृहे, यद्रोचते क्रियताम्' ।
आचार्यस्य गृहं द्रुतं स घटकः श्रुत्वा प्रसन्नस्ततो
यातः पण्डितसत्कृतः परिणयप्रस्तावनामुक्तवान् ।।२५९।।

विप्रो वल्लभपण्डितः श्रुतिहृदोर्वार्ताश्रवःस्वादनं
कृत्वा मोदमवाप भाग्यमतुलं मेने सुताया ध्रुवम् ।
'सौभाग्यञ्च ममान्वयस्य दुहितुर्देवी ददौ स्वीकृतिं
जामाता यदि लभ्यते हरिसमः प्राज्ञो निमायी श्रियः ।।२६०।।

संस्कारोऽपरजन्मनो बहुशुभो लब्धो निमायी वरः
कन्यायाः स्वयमेव किन्तु घटक! ज्ञाता त्वमस्मत्स्थितेः ।
दातुं नास्ति परं द्विजस्य किमपि, श्रीमात्रलक्ष्मीसुता-
दाने दास्यति वल्लभोऽयमधनो हारिद्रिकापञ्चकम्' ।।२६१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'चिन्ता माऽस्तु शची निमायिजननी श्रीविश्वदात्री सती
निर्लोभा जगतीह भौतिकमुदो लक्ष्मीवधूं कांक्षति ।
सोत्साहं मुदितो विवाहविधये शीघ्रं प्रबन्धं कुरु'
प्रस्तोतुर्वरकन्यकापरिणयस्तुत्योत्सवः प्रस्तुतः ।।२६२।।

गौराङ्गो वरयात्रिभिः प्रियतमैर्मित्रैश्च विद्यार्थिभि-
श्चात्मीयैर्निजबन्धुभिश्च सहितो यातो वरः सज्जितः ।
श्रीमद्वल्लभपण्डितस्य नियते पुण्ये तिथौ वासरे
सत्कारञ्च यथोचितं मितगृहे लक्ष्मीपितुः प्राप्तवान् ।।२६३।।

मंत्रोच्चारणपूर्वकं सविधिकं गोधूलिवेलाशुभे
लग्ने बन्धनगुम्फितौ परिणये लक्ष्मीर्निमायी तथा ।
तत्पाणिग्रहणे स्रजाङ्घ्रिवरणे लक्ष्मीनिमायीकृते
जाते यज्ञहविःप्रदक्षिणविधौ वामाऽस्य लक्ष्मीर्हरिः ।।२६४।।

आदेशं श्वसुराच्च वत्सलतया सम्प्राप्य लक्ष्मीयुतः
सम्प्राप्तो नरवाहनेन कलितो गेहं निमायी स्वकम् ।
माता स्वागतमङ्गलं कृतवती स्त्रीभिः सतीभिः समं
विप्रेभ्यो ह्युचितं ददौ शुभहितव्यक्त्यै वधूपुत्रयोः ।।२६५।।
अन्योन्यं नवदम्पती ह्युपमितौ वर्णाकृतिभ्यां समौ
दृष्ट्वा सम्मिलिताबुभौ हि जगदुर्गौराङ्गलक्ष्मीं स्त्रियः ।
मातुः पण्डितपुत्रमात्रजगतो लब्ध्वा वधूं सुन्दरीं
लक्ष्मीं शीलगुणान्वितां हृदि मुदः ख्यातिर्वचोऽगोचरा ।।२६६।।

चञ्चलः पण्डितः

३४. भारत! बिभ्रतु सज्जनभारं जगतीतलशान्त्यर्थम् ।
गौतमतपसा पावितधर्मो नानादेशे प्रसृतः
तीर्थविवेकौ भारतभूमेर्देशे देशे भ्रमितौ ।
वङ्गगौरकीर्तनरसहृदयं सप्तमहोदधिपारम्
कलिमलहरणं सज्जनचित्तं परहितसाधननिरतम् ।।

गोलं वक्रमथाऽस्तु तद्रसयितुर्मिष्टं सितामोदकं
स्वादे तत्र न चान्तरं किमपि तन्माधुर्यमेवाक्षतम् ।
प्रेमापि क्रियते विशुद्धहृदयाच्चेद्वर्तनं प्रेमिणः
शान्तं वा कुपितं परं परिणतिश्चानन्दमात्रं ध्रुवम् ।।२६७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यार्थी नहि साम्प्रतं ननु गृही प्राज्ञो निमायी गुरु-
र्गाम्भीर्यं तदपेक्षितं, जनमनोमानप्रतिष्ठा यतः ।
'चाञ्चल्याज्जनमानसे मम परं निन्दानिदानं घृणा
प्रेमास्वादयिता यथा निजरुचिश्चेष्टे तथाऽशङ्कितः' ।। २६८।।

मध्ये पाठमसौ गुरुः किमपि तद्ब्रूते यथोच्चैर्द्रुतं
छात्रास्तन्निखिला हसन्ति गुरुतस्त्र्यस्यन्ति नोऽकारणात् ।
अभ्यासे विमुखान्न निन्दति गिरा, तेषां न दृक्तर्जनं
मेधावी कुरुते च सस्मितमुखः प्रोत्साहनं स्नेहतः ।।२६९।।

'अभ्यासाय पुनः पुनश्च शुकवच्चैकं रट त्वं पदं
मत्तो'ऽनद्यतने लुङ'स्य रटनं भूयोऽधुनाऽकर्णय' ।
उक्त्वैवं कुरुते स्वयं नमनतोऽभ्यासं शिरःकाययोः
सूत्रस्यारटनं विलोक्य हसनैश्छात्रा लुठन्ति स्वतः ।।२७०।।

छात्रत्वं गुरुता न तिष्ठति पुनः पाठे समाप्ते द्वयोः
प्रीत्या सम्मिलितास्तथा प्रतिदिनं गच्छन्ति गङ्गातटे ।
शास्त्रार्थे तरणे रतोऽन्यदिवसे क्रीडाकबड्डीरत-
श्छात्रैर्मित्रसमो यथा चरति तद्भावोदयोऽलौकिकः ।।२७१।।

'छात्रैः क्रीडनमस्य पण्डितततेर्लज्जाकलङ्काऽऽकरं
भूयस्तत्कुरुते यतोह्यसमये बालो गुरुत्वं गतः ।
धिक्त्वां पण्डित!' तज्जनोपहसनं ज्ञात्वा निमायीवचो
'लब्धं मुच्छकलं कदापि भविता त्वं बुक्क पुत्राऽधुना' ।।२७२।।

प्रश्नान् पृच्छति संस्कृतेऽतिकठिने दृष्ट्वैव तत्पण्डित-
स्तन्मार्गं तरसा विहाय भयतो यात्युत्तरेऽपण्डितः ।
कूर्दन् गच्छति तत्सदा शिशुसमो मार्गे निमायी युवा
हास्यं तत्कुरुते यथा जनमनोह्लादः स्वभावाद्भवेत् ।।२७३।।

दृष्ट्वा पृच्छति वैष्णवं 'कथय भो! किं वैष्णवत्वं स्फुटं'
तत्प्रश्नान्तरमन्यदाऽन्यविदुषः 'स्यादूर्ध्वपुण्ड्रेण किम्'?
तत्क्षुब्धः स च वैष्णवोऽस्य निकटान्मुक्तो यथा वै तथा
'प्राप्तो घोरकलिर्हि वैष्णवजनं यत्पण्डितो निन्दति ।।२७४।।

किं वाऽयं ननु पण्डितः? स रसिकश्रेष्ठो निमायी वयो-
मत्तस्तिष्ठति धर्मकर्मरहितश्चोद्दण्डताविग्रहः ।
एतावन्नहि शोभनञ्च विदुषः सद्वैष्णवक्रीडनं'
खिन्नाः साधुजना निमायिविषये निन्दावचश्चक्रिरे ।।२७५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यार्थी च मुकुन्ददत्तचटकग्रामीणसद्वैष्णवः
सौम्यः कण्ठमधुस्वरोऽत्र समये चाचार्यशालावटुः ।
अद्वैतस्य गृहे च वैष्णवसभामध्ये च सङ्कीर्तने
तत्कण्ठस्वरमाधुरीश्रवणतो नृत्यन्ति सन्तो मुदा ।।२७६।।

अन्तस्तिष्ठति तन्निमायिहृदये स्नेहो मुकुन्दे वटौ
वाचा किन्तु मुकुन्दहासकरणे दक्षः सदा चोन्मुखः ।
अन्वीक्षाऽस्फुटफक्किकाऽतिविकलं गौरान्मुकुन्दोत्तरं
'जाने नो तव तर्कशास्त्रवचनं शुद्धः परं वैष्णवः' ।।२७७।।

'तर्हि त्वं परिभाषय द्रुतमहो तद्वैष्णवत्वं स्फुटं'
'भ्रातोऽहं न जयी त्वमेव विजितो मुक्तिं द्रुतं देहि मे ।
कः शक्तस्त्वयि चोद्यते निशि दिवा शस्त्रार्थभूताग्रहे
नास्माकं समयस्तथेति' वचनात्कष्टं सदा मुच्यते ।।२७८।।

गङ्गामार्गनिमायिदर्शनभिया यातो मुकुन्दो द्रुतं
स्नातुं चान्यपथा ततोऽपसरति प्राज्ञो जगादोच्चकैः ।
'त्वं जानासि कथं त्वमेव परमः साधुस्तथा वैष्णवः
काले वैष्णवता तथा मम यतः पृष्ठेऽखिलं भारतम्' ।।२७९।।

श्रीहट्टस्य पठन्ति चात्र वटवो द्वीपे, निमायीपिता
तद्वासी प्रथमं, तथापि कुरुते गौरस्तदुत्प्रेरणम् ।
'हास्यं हट्टनिवासिना तव नहि ग्रामीणबन्धुत्रपा'?
'कस्मात्साऽस्तु तथा त्रपा मम गृहे दन्तस्थिता लम्बते' ।।२८०।।

सम्प्रत्यङ्गुलिगण्यवैष्णवजना द्वीपे नवे वासिन-
स्तेषामाश्रयदश्च पण्डितवरश्चाद्वैतभक्ताग्रणीः ।
पीडां ते मनसो गुरुञ्च जगदुः खिन्नास्तथा वैष्णवाः
श्रुत्वाऽद्वैतगुरुर्जगाद 'कुरु मा चिन्तां, प्रभुर्दर्शकः ।।२८१।।

अन्तर्यामितया स एव निखिलं जानाति साक्षी स्वतः
कष्टं साम्प्रतिकस्थितिं ननु सतां सद्वैष्णवानां व्यथाम् ।
उद्धारं स विभुः करिष्यति ततः शीघ्रं तथोत्पीडना-
द्द्वीपे भाविनि भक्तिवारिविलये मङ्क्ष्यन्ति नार्यो नराः ।।२८२।।

'हास्यं नो ननु पण्डितोऽपि कुरुते प्राज्ञो निमायीसमो'
'वेत्ता त्वं नहि साधु, तस्य हृदये चान्दोलनं जृम्भते ।
साधुत्वं फलितं भविष्यति ततो भद्रात्मनश्चाधुना
चाञ्चल्यं गृहिणो हि नागरशचीलक्ष्मीमनोरञ्जनम्' ।।२८३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवद्वीपे श्रीश्वरपुरी

३५. साधुः सिध्यति संस्मृतिपात्रं साधयति स्वेच्छातः।
श्रवणास्वादः क्रमशः कुरुते भावाङ्कुरसंरोहम्
अङ्कुरपल्लवकुसुमविकासं धत्ते कीर्तनरागः ।
भावकल्पलतिकाफलदृष्टिं तनुते साधुस्मरणम्
अन्ते संस्मृतिरसनासिद्धिः महतां सङ्गोऽमोघः ।।

सेवासत्कृतिसाधकं यदि गृहं धन्यो गृहस्थाश्रमः
शास्त्रे लौकिकवाङ्मये च भणितिश्चेयं प्रशस्ता ततः ।
अन्नं वारि बुभुक्षिते च तृषिते वासं शरण्याश्रिते
दत्वा लौकिकसाधनैर्ननु गृही देवैः सुखं स्पर्धते ।।२८४।।
कल्प्यं भाग्यवतो गृहं हि विमलं पूतं गवा श्यामया
बालक्रीडनशोभितं तुलसिकाभातञ्च यस्याङ्गणम् ।
गेहे शीलवती प्रिया च गृहिणी पाकादिदक्षा हरे-
र्नामोच्चारणभाविता पतिमतौ नित्यं प्रतीक्षामयी ।।२८५।।
प्रातर्दैनिककर्म वै नियमतो निर्विघ्नतः साध्यते
नक्तं शान्तिसुषुप्तिसंस्मृतिमता सूर्यः पुनर्लक्ष्यते ।
श्रद्धालुर्हरिभावको गृहपतिश्चाहूय वाभ्यागतं
संभोज्यातिथिसेवया परिवृतो भुङ्क्ते विकुण्ठो नरः ।।२८६।।
भोक्ता भोजयिता च भोजनमदः सर्वं जगद्वस्तुकं
संवर्गत्रयभाजितञ्च निखिलं मायाकृतं प्राकृतम् ।
भाग्याद्वै भुवि भोजकस्य पदवी निर्बाधयात्रामयी
धन्या भोक्तुरपेक्षया जगति वै भोज्यान्नवस्तुस्थितिः ।।२८७।।
साधोः सत्कृतिसेवया हि गृहिणो मोदं लभन्तेऽतुलं
व्यक्तञ्चातिथिधर्मपालनकृताव्यक्तात्मशुद्धिज्ञताम् ।
एवं सद्गृहिणोऽतिथेर्भुवि सतो धन्या यथा सेवया
सन्तस्तेऽपि च सद्गृहस्थजनताऽऽतिथ्यं स्मरन्ति ध्रुवम् ।।२८८।।
माता वत्सलविग्रहा सुतसमं वृद्धाऽऽगतप्रीतिदा
लक्ष्मीः कोमलचित्तसेवनरता पत्नी गृहश्रीः सती ।
एकाकी न कदापि भोजनरतिर्मित्रैस्तथाऽभ्यागतै-
र्भुङ्क्ते साधुगृही ततोहि रसिकश्रेष्ठो निमायी सुधीः ।।२८९।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वीपे चागतवैष्णवं जनमुखाच्छ्रुत्वा निमायी गृही
साक्षात्कृत्य निवेदनेन विनयी संभोज्य तं मोदते ।
श्रद्धाप्रीतियुता यथा निजपतौ लक्ष्मीस्तथाऽभ्यागते
सेवारन्धनकर्मणि, स्वगृहिणीप्रीतं गृहञ्चाश्रमः ।।२६० ।।

श्रीमन्माधवसद्गुरुः प्रियतमे शिष्येऽन्तरङ्गे तथा
नाम्नि श्रीश्वरसाधके हि निदधौ तेजोऽन्तकाले स्वकम् ।
अन्ते देहविसर्जनस्य समये सस्मार यन्माधवः
साधुर्माधवदर्शनाय विकलो जानाति तन्माथुरः ।।२६१ ।।

३६.माथुर! तृषितं नयनं क्षिपते, त्वद्दर्शनदिग्दृष्टिम् ।

श्रान्तयशोदाकृपया बद्धो भविता? माधवदयया
लोकालोकपरात्परभूमावशितः ससखो यातः ।
पार्थसख! व्रततपा न भीष्मः कथमत्र त्वं स्थाता?
दर्शनविकलं माधवहृदयं दयित! भ्राम्यति परितः
मथुरानाथ! पुरीप्रियदर्शन! माधवकिङ्करमादिश ।।

लब्ध्वाऽमूल्यनिधिं तथेश्वरपुरी शिष्यप्रधानः प्रियः
श्रीमन्माधवसद्गुरोश्च विरहात्तीर्थटने निस्सृतः ।
अन्ते द्वीपनवेऽपि गौडधरणीमध्येऽतिथिः श्रीपुरी
प्राज्ञाद्वैतगुरोर्गृहस्य पुरतः साधुर्निषण्णो महान् ।।२६२ ।।

एतज्जन्म च मण्डलेऽत्र विमले ग्रामे कुमारामिधे
हट्टे, वैद्यकुले, परञ्च महतां जातिः कुलं वै हरिः ।
कृष्णास्वादनमत्तवैष्णवसतः संन्यासिनः प्रेमिणो
लोकेऽलक्षितजातिभेदगणना शुद्धात्मनः साधुता ।२६३ ।।

दृष्ट्वाऽद्वैतगृही विवेद तरसा सोऽयं महान् वैष्णवः
साधुर्भागवतश्च कोऽपि विमलश्चक्रे स तत्सत्क्रियाम् ।
आनन्दो गृहिणोऽतुलः परिचये जातेऽतिथिर्मे गुरु-
भ्राता शिष्यमणिर्विलक्षणगुरोः श्रीमाधवस्यागतः ।।२६४ ।।

अद्वैतो गुरुतुल्यपूजनमहैः सत्कृत्य द्वीपे नवे
'कञ्चिद्वै समयं' जगाद विनयी 'स्थातव्यमस्मद्गृहे' ।
आचार्याग्रहतो महाशयपुरी स्थित्वा नवद्वीपतः
सत्सङ्गान्महनीयकृष्णकथया लेभे निमायीधनम् ।।२६५ ।।

द्वीपे चात्र तथेश्वरेण वसता गौरस्य बाल्योपमा
वार्ता तर्कवितर्कयोर्जनमुखात्तस्य श्रुता वैष्णवैः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संयोगाद्भुवि भाविनीश्वरपुरीगौराङ्गयोः सङ्गमे,
स्थाने सम्प्रति पण्डितो ननु गृही संन्यासिनं वन्दते ।२६६ ।।

नत्वा रूपमनोहरं शशिमुखं लावण्यशोभातनुं
द्रष्टा दृश्यविलक्षणं यतिपुरी तेजःस्विनं संस्थितम् ।
दृष्ट्वा साधुवरोऽनिमेषनयनो दृष्ट्वा सतृष्णः पुन-
स्तृप्तिं नो लभते विरक्तहृदयो रागीव मेनेऽद्भुतम् ।।२९७।।

'योगभ्रष्टमहाविलक्षणनरो दीप्तस्तथा तेजसा
प्रच्छन्नो नरवेशमर्त्यधरणीश्रेयोऽवतारोऽमरः ।
आकृत्या हृदयेन गौरममतावर्णोऽखिलप्राणिषु'
द्रष्टुर्विस्मितदर्शनस्मितमुखं दृश्यं तथा प्रस्फुटम् ।।२९८।।

'द्रष्टा पश्यति वस्तुरूपघटनां, द्रष्टव्यकालावधिः
संक्षिप्तो यदि, तर्हि चिन्तनविधेश्चिन्त्यं हि तज्जायते ।
भिक्षां कर्तुमहं भवन्तममलं याचे समक्षं स्थित-
स्तत्स्वीकृत्य यथेष्टदर्शनरतो धन्यं गृहस्थं कुरु' ।।२९९।।

एवं दर्शनजातचिन्तनरतं संन्यासिनं श्रीश्वरं
गौरः प्रस्फुटहासशोभितमुखोऽसंतृप्तमूचे ततः ।
सामान्यस्थितिमागतो यतिपुरी ध्यानान्निमायीवचो-
व्रीडालक्षितलोचनो ननु ददौ भिक्षाग्रहस्वीकृतिम् ।।३००।।

भिक्षार्थं गृहमागतं यतिवरं सम्पूज्य माता शची
श्रद्धाभक्तियुता च भोजितवती पुत्रात्मतोषाप्तये ।
सत्सङ्गश्चलितस्तयोर्यतिपुरीविद्वद्गृहीगौरयो-
स्तद्भ्रात्रोर्गुरुशिष्ययोरिव ततोऽद्वैताश्रमं निर्गतौ ।।३०१।।

तत्कालाच्च यदा कदा यतिपुरीपुष्पं द्विरेफो यथा-
ऽऽघ्रातुं गौरगृहस्थपण्डितसुधीश्चायाति तत्स्वेच्छया ।
श्रोतुं ग्रन्थमसौ जगाद निजकं 'श्रीकृष्णलीलामृतं'
साधुप्रेरणया गदाधरयुतो गौरः सदोपस्थितः ।।३०२।।

सायं साधुपुरीमुखात्प्रतिदिनं लीलारसः स्यन्दते
'शब्दाशुद्धिमिहत्रुटिं कथय तत्त्वं पण्डितो व्याकृतेः' ।
'काव्ये चात्र कवेस्त्रुटिर्हि नियताऽविद्याग्रहावेशिनो
ग्रन्थे चाप्तकृते च साधुरचिते श्रोता त्रुटिं पश्यति? ।।३०३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आहुश्चेन्द्रियतो मनः परतरं ताभ्याञ्चं बुद्धिः परा
शास्त्रं ग्रन्थिगिरिश्च काव्यकुसुमं ग्राह्यं परं व्युत्क्रमात् ।
शुद्धाऽशुद्धविवेचने भगवतः सन्देशगीतावचो
भक्तोऽनन्यतया मयि व्यवसितः सांधुः परं दुष्कृतिः ।।३०४।।

भक्तो यत्कुरुते च भावितमनाः शुद्धञ्च तन्निश्चितं
ज्ञात्वाऽशुद्धिकरस्तथा न मनुते भावाद्विहीनो हठी ।
व्याहारे परिचीयते रचनया कर्तुः क्रियाविकृति-
र्मार्गे भागवते तथा रसनया स्वाद्यः प्रमातॄ रसः ।।३०५।।

छन्दोऽलङ्कृतिवक्रतारसगुणध्वन्यौचितीव्यञ्जितः
श्रीकृष्णो नहि गीयते यदि तथा श्लोको ध्रुवं नोत्तमः ।
भाषाकाव्यमदोऽपि भावकहृदे शस्तञ्च नो रोचते
भक्त्या नो घटिता च यत्र मधुरा राधामुरारेः कथा ।।३०६।।

ब्रह्माण्डं निखिलं चराचरमिदं व्याप्नोति सर्वस्थितः
सर्वज्ञो भगवांश्च वेद मनसो जीवात्मनां भावनाम् ।
भाषा तद्गुणवर्णने कथमहो शक्ता वराकी पुन-
र्भक्तानुग्रहकातरः स करुणो बालात्कवेर्मोदते ।।३०७।।

प्रेम्णा भावनया विशुद्धमनसो नारायणः प्रीयते
'श्रीरामाय नम'स्तथा श्रवणतश्चाज्ञो विपश्चिन्मुखात् ।
'श्रीविष्णाय नम'स्तथैव मनसा ब्रूते विशुद्धेन तद्-
भावप्रीतजर्नादनस्तदुभयोस्तुल्यं विधत्ते फलम् ।।३०८।।

कर्ता श्रीश्वरसन्निभश्च रचना 'श्रीकृष्णलीलामृतं'
श्रोता बन्धुगदाधरोऽपि भवता निर्णायकः केवलम् ।
तत्त्वं व्याकरणे पटुश्च चपलो मन्दो निमायी कृतो
मद्भावञ्च जनार्दनं कुरु, यतः ख्यातश्च भावाग्रही' ।।३०९।।

एवं गौरसुभावकोमलमनोनम्रोक्तितृप्तः पुरी
'धर्मो भागवतस्तथाहि भवतः स्फीतं मधु स्वादितम् ।
भूयो व्याकरणे धुरन्धरमतिर्ध्यानेन मत्तः शृणु
प्राज्ञोऽशुद्धपदक्रियां न सहते' गौराङ्गमेवोक्तवान् ।।३१०।।

ग्रन्थस्य श्रवणं ततः प्रचलितं श्रोतुः प्रसादः पुन-
श्चैकस्मिन् दिवसे परात्मविषये धातोस्तथा कस्यचित् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नायञ्चात्मनि, तस्य पक्षमनने जाता प्रभाता पुरी-
साधोः किं क्षणदा, ययाऽऽत्मनि पुनर्धातोश्च सिद्धिर्गता ।।३११।।
धातोस्तस्य तथाऽऽत्मसिद्धिकरणे साधोः सुधीस्वीकृति-
स्तच्चाद्वैतमते क्रिया न, विदुषश्चात्मा परस्मै फलम् ।
तद्ग्रन्थश्रवणात्पुरीपदरतिर्गौरस्य कृष्णस्मृति-
र्भावी श्रीश्वरसङ्गमः समयतः, साधुः प्रतस्थे गयाम् ।।३१२।।

पूर्ववङ्गयात्रा

३७. विद्वन्! तृषिता वसुधा कांक्षति तव हृदयामृतवृष्टिम्।
दैन्यनिदाघनिपीतजलाशयसरसिजवृन्दं शुष्यति
बर्हापीडमनोहरवारिद! द्रुतरसनीरं वर्षतु ।
गर्जति, तडिता भीषयते बहु नानाकलिघनवृन्दम्
विश्वधरातलपूजाभाजन! सञ्जीवय जनहृदयम् ।।

भोज्यं वस्तु बुभुक्षितो न लभते जीवो यथेष्टं तथा
क्षीणा पाचनशक्तिरेव धनिनां दिव्यान्नभोगाऽरुचिः ।
वित्तं नो विदुषाञ्च यत्र बहुलं संख्याऽत्र नो भोक्तृणां
योगो जीवपदार्थयोरभिमतः संयोगतो दृश्यते ।।३१३।।

३८. धातः! क्रीडसि विषमं प्रायः।
रूपं वितरसि मलिनं कुरुषे निर्धनतावरदानात्
ममतावत्सलतारससिन्धोर्नहि सुतचन्द्रोत्पत्तिः ।
विद्याबुद्धिविवेकविधातस्तावत्ते कथमुचितम्?
दुर्गतिमग्नं सज्जनवृन्दं पश्यन्नपि नहि पश्यसि ।।

धाता वित्तमतो ददौ न विदुषां यत्सङ्गतो हीयते
विद्याबुद्धिविवेकशान्तिविनयश्रद्धाक्षमासन्निधिः ।
शोभन्ते वनितालतासमतया नानाश्रयाः पण्डिताः
पण्डैवास्ति तदाश्रयो दृढतमस्तन्नात्र लिङ्गोपमा ।।३१४।।

काले तत्र हि संस्कृतं प्रचरिता भाषा तथा भारते
सभ्यानां गणना विनाऽस्य पठनं नो शिक्षितानामपि ।
वङ्गे विप्रसमाः कुलीनपुरुषाः कायस्थवैद्यादयो
विद्यासंस्कृतशालिनोऽन्यकुलजास्तेऽप्यत्र काले तथा।।३१५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृत्तिः केवलपाठनं हि विदुषां राजाश्रयो वा तदा
दृश्यन्ते ननु पण्डिता नियमतः सृष्टौ दरिद्राः सदा ।
तेजस्वी गुणवांश्च पण्डितवरो गौरोऽपवादः कथं
प्राज्ञोत्पत्तिदरिद्रताविषयकं प्रख्यातमाख्यानकम् ।।३१६।।

श्रीलक्ष्मीश्च दरिद्रता हि सुकृतिश्चाद्या परा दुष्कृतिः
संयोगात्प्रथमां विवाहविधिना मूर्खाय धाता ददौ ।
तस्या दुर्गतितोऽनुतप्तहृदयः सृष्टेः स्वयम्भूः पिता
विद्वांसं गुणिनं कुलीनपुरुषं युक्तं करोत्यन्यया ।।३१७।।

तद्ब्रह्मा च दरिद्रतापरिणये गौरं सुयोग्यं वरं
मोक्तुं तं कथमुत्सहेत जनकस्तन्निर्धनोऽसावपि ।
शीतं तीक्ष्णकरे, तमो दिनकरे, तारा च तेजस्करे,
प्रेमाब्धौ न दरिद्रता प्रभवति प्राज्ञे निमायीनरे ।।३१८।।

तद्गौरो व्यथितः कदापि न गृही दारिद्र्यहेतोः सुधी–
दूरे किङ्करतुल्यकुञ्चितकराऽलक्ष्मीश्च लक्ष्मीपतेः ।
मातुश्चानुमतो ययौ कतिपयैश्छात्रैः सुयोग्यैर्युतः
पूर्वे वङ्गभुवो निधाय वनितां गौरो गृहे तत्पितुः ।।३१९।।

विख्याताः सुधियः सुशिष्यसहिता देशस्य मध्ये पुरा–
ऽविद्याग्रन्थिभिदो भ्रमन्ति सुमतिर्गौरस्ततो निर्ययौ ।
खाद्यान्नैर्विविधैश्च वस्त्रनिकरैर्द्रव्यैः पदार्थैस्तथा
श्रद्धासत्कृतिशालिनश्च गृहिणो नन्दन्ति तत्पूजया ।।३२०।।

पद्माब्रह्मसुतान्तरे निगदितो वङ्गश्च राढाभिधो
भूमौ वङ्गगता नदी त्रिपथगा धाराद्वया जायते ।
पूर्वस्यां प्रसृतोपसागरसरिद्योगश्च पद्मावती
गङ्गासागरसङ्गता भुवि नवाद् भागीरथी द्वीपतः।।३२१।।

गौडश्चोत्तरतस्तथा ह्यपरतो राढाख्यवङ्गः पुरा
भूमौ सम्प्रति पूर्ववङ्गविषयो धारा द्वयोर्भाजिका ।
भिन्नाचारविचारपर्वनियमा गौडे च वङ्गे ततः
श्रीगङ्गोत्तरणाच्च राढपथिको गौरश्च पद्मातटे ।।३२२।।

३९. गिरिजे! वङ्गात्सकला सिद्धिः।

ब्रह्मपुत्रसन्निधिमधिगच्छति वङ्गो रत्नाकरतः
सिद्धिं सर्वां गूढं यच्छति विषयान्तरहृदयानाम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दिवि तेजस्वी तमसो हन्ता भुवि चौषधिरसदाता
दिनकर्ताऽर्कः क्षणदाक्षणदो यल्लक्ष्यो दिङ्नियमी ।।

पद्मातीरपथा च राढविषये बभ्राम गौरो बहु
स्थाने यत्र निमायिसत्कृतिविधौ नानोपहारा जनाः ।
लब्ध्वा व्याकरणे पुराऽस्य रचितां शब्दोचितां टिप्पणीं
तन्मेधास्तवकाश्च सम्प्रति दृशा मुह्यन्ति विद्यार्थिनः ।।३२३।।

'पूर्वं शब्दविचित्रचित्रमतिदा स्वाध्यायबोधप्रदा
कर्तारं ह्यधुना प्रदर्श्य विषये स्पष्टायते टिप्पणी ।
ज्योतिर्मण्डलमध्यतो दिनकरश्रीदर्शने रोधकं
धन्यं पादरजोभिरद्य कुरुते साक्षाच्च तत्सर्जकः' ।।३२४।।

एवं स्थाननिवासिनो बहुविधं विद्यार्थिनो भावकाः
पाण्डित्यं श्रुतपूर्वमद्य वचनैः शंसन्ति तत्सम्मुखम् ।
कर्ता द्वीपसमं तथा चपलतां, त्रस्तं मनः सङ्गिनां
मेधावी खलु देशकालनियमात्स्वप्नेऽपि नो भ्रंशते ।।३२५।।

मासैस्तद्भ्रमणे कदापि चपलो दृष्टो निमायी नहि
प्राज्ञो धीरगभीरपण्डितसमश्चासीत्सदाचारवान् ।
जिज्ञासोर्विषयानुसारकथने प्रश्नोत्तरे पण्डितो
भक्तिं भागवतीन्तु वैष्णवपथा त्यक्तोपहासोऽवदत् ।।३२६।।

माहात्म्यं जनभावितो भगवतो नाम्नस्तथा श्रेष्ठतां
भक्तेस्तत्पथमेव वै कलियुगे सर्वोपयुक्तं जगौ ।
सर्वं प्रश्नसमाहितोत्तरवचो विद्वत्समञ्चाधुना
स्रोतो भक्तिरसस्य गौरहृदयेऽव्यक्तं जगन्मङ्गलम् ।।३२७।।

वाचा तस्य तथापि राढजनतालाभोऽधिकं शास्त्रिणो
ज्ञातं तैश्च पवित्रभक्तिभगवन्नाम्नोर्महत्त्वं कलौ ।
भक्तिश्चाङ्कुरिता ह्यपूर्वविधिना पश्चाच्च गौराज्ञया
नित्यानन्दपथा सुपल्लवयुता पुष्पैः फलैः स्वादिता ।।३२८।।

मुख्यस्थानकृतेश्च राढविषये शास्त्रोपदेशैर्मुदा
गौरस्य भ्रमणं तथा विहरणं सायञ्च पद्माजले ।
सत्कारे जनदत्तवस्तुनिवहैः पाकप्रबन्धः स्वयं
मित्रैः सङ्गिजनैश्च दैनिकविधिर्यात्राप्रमोदास्पदम् ।।३२९।।

एकान्ते विदुषः स्थितस्य निकटे गौरस्य तच्चैकदा
स्वाकृत्या विनयी प्रदीप्तवदनो विप्रस्तथोपस्थितः ।
जिज्ञासुः प्रभुदर्शनस्य विकलो मग्नस्तथोच्चारणे
नाम्नां तन्मधुरं प्रभोश्च चरणौ धृत्वा रुरोद स्फुटम् ।।३३०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कण्ठालिङ्गनपाणिकोमलधृतिं दत्वा जगाद द्रुतं
'किं विप्र! क्रियते शिशुश्च पुरतो वृद्धस्य तेऽहं स्फुटम्' ।
किञ्चिन्नो श्रृणुते रुदंश्च सततं धृत्वा पदे ब्राह्मणः
'किं ते रोदनहेतुमत्र वदतु श्रेयो विधाता प्रभुः ।।३३१।।

आश्वस्तो हि तथा द्विजो लघु जगौ 'दीनप्रभो! (ब्राह्मणः)
शून्यः साधनसम्पदोऽहमधमो जाने न साध्यं स्वकम् ।
प्राप्तव्यस्य च साधनं किमथवा तत्प्रार्थितं सर्वदा
दीनानाथ! वद प्रभो! स्वयमयं दीनोऽपि याच्ञाऽबुधः ।।३३२।।

अन्तर्यामिविभुर्मदीयविनयं शुश्राव सुप्तिस्थितं
रात्रौ मां प्रकटं जगाद मधुरं कश्चिन्महामानवः ।
(राढे सम्प्रति पण्डितो भ्रमति तन्नायं निमायी नरः
साक्षाच्छ्रीप्रभुमाधवोऽस्ति शरणं प्रश्नोत्तरं तत्तव) ।।३३३।।

एवं स्वप्नवचो निशम्य तरसा बुद्धस्ततश्चागतः
श्रीपादावनतिं विधाय सफलो धन्योऽस्मि तत्साम्प्रतम्' ।
संसारव्यथया स मिश्रतपनो नाम्नैव नो केवलं
तप्तो वास्तवमत्र शुद्धहृदयस्मृत्या प्रभुं प्रापितः ।।३३४।।

विप्रं श्रीतपनं जगाद शनकैर्मन्दस्मितः श्रीप्रभुः
'श्रीकृष्णस्य कृपाऽधिका त्वयि यतः स्वच्छोऽन्तरात्मा ततः ।
सर्वेषु प्रभुभावना तव परं साधुर्यथा जाग्रति
स्वप्ने पश्यति तत्तथा, न वचसा श्राव्यं त्विदं कस्यचित्' ।।३३५।।

ऊचे बद्धकरश्च मिश्रतपनो 'नाहं प्रवञ्च्यः प्रभो!
प्राप्तस्त्वां शरणं विहाय निखिलं, ग्राह्यो यथा ज्ञायते ।
शङ्कां मे च निवारय,' प्रभुमुखात्प्रश्नः सहासस्तथा
'का शङ्का मनसस्तथाहि भवतः प्रष्टुञ्च किं वाञ्छति?' ।।३३६।।

विप्रो दीनतया ततः कथयते 'शास्त्रेषु यच्छ्रूयते
प्राचीनं ननु साधनं कलियुगे, तत्सर्वथाऽसम्भवम् ।
तच्छ्रेष्ठं समयोचितञ्च सरलं संदिश्यतां साधनं
साध्यं किञ्च तदुत्तमं वदतु मे तत्साधनोद्देश्यकम्' ।।३३७।।

मौनं तत्क्षणतः प्रभुः कथयते प्रेम्णाऽधिकेन द्विजं
'साध्यं मुख्यतमञ्च मिश्रतपन! प्राप्तिर्प्रभोर्वै नृणाम् ।
भिन्नं भिन्नमहो युगे ननु युगे प्राप्तेस्तथा साधनं
ध्यानं सत्ययुगे मखोऽर्चनविधिस्त्रेतायुगे द्वापरे ।।३३८।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमत्केशवकीर्तनं कलियुगे सर्वोत्तमं साधनं
तत्सर्वं फलमश्नुतेऽन्ययुगवत्सङ्कीर्तनात्केवलम् ।
लोकः साधयितुं यदीह समये शक्त्या च तद्युज्यते
श्रीनामस्मरणं ह्यवादि मुनिभिर्व्यासादिभिः साधुभिः ।।३३९।।

४०.केशव! कीर्तनरसनां दीपय।

चञ्चलचित्तो वृत्तिनिरोधे ध्याने नास्मि समर्थः
मखसम्भारविधिश्रीहीनः पावनयजनेऽदक्षः ।
श्रीचरणाब्जोपासनार्चने मलिनान्तः खलु नार्हति
मूकं त्वं वाचालं कुरुषे श्रीहरिरसनां योजय ।।

४१.व्यासः कलिजनतास्फुटसूर्यः।

वेदविभाजनभारतकीर्तनसूत्रप्रणयनभानुः
निगमकल्पतरुनवनवमधुफलशुकपुराणदिग्दर्शी ।
श्लोकोत्तमकृतभगवद्भास्करकृष्णामृतरसरश्मिः
कलिमूर्च्छितसञ्जीवनकेवलहरिनामौषधिवैद्यः ।।

नानाभौतिकयातना-(तपन)-माऽविद्या मुधा बाधते
माहात्म्यं हरिनामसंस्मृतिरतेर्जानन्ति नो यज्जनाः ।
नाम्नः संस्मरणे कलौ हि रसने चाकर्णने मानवैः
सत्कार्या फलतः प्रभोर्वितरिता मेधा च जिह्वा श्रुतिः ।।३४०।।

४२.चिन्तन! वितरतु चिन्तामुक्तिम्।

अन्नं नीरं वसुधाहृदये नैसर्गिकपर्याप्तम्
जीवजगद्वै श्रमतो लभते धरणीधात्रीक्रोडात् ।
वसनं भवनं द्विपदां बुद्धेर्युक्तेः संस्कृतिरूपम्
शिक्षा विद्या प्रेयः श्रेयः सृष्टिनदीतटमिथुनम्
सौख्यज्ञानोभयविधबन्धाच्छ्रीहरिशरणं यच्छतु ।।

४३.साधकतपनतप्तशशिसन्निभ!

राघव! दशरथनन्दन! सागर! रावणदूषणहारिन्।
काननजीवन! मङ्गलविग्रह! रामनामसुकुमारक!
माधव! नन्दनिकेतनमोदक! कालयवननरघातिन्!
राधाकातर! हृदयविहारिन्! कृष्णमेघ! रसवर्षक! ।।

मन्त्रः षोडशनामालिस्तज्जपो मुख्यसाधनम् ।
श्रद्धालोर्जपतः प्रेम्णा, स्वयं साध्यस्य निर्णयः' ।।३४१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आनन्दो विपुलोऽतुलः प्रभुमुखाद्गुह्यं रहस्यं तदा
श्रीमिश्रस्य निशम्य लोचनयुगाद् वाष्पाम्बुधारा ययौ ।
धृत्वा श्रीप्रभुपादपद्मम तपनः प्रीतो जगाद 'प्रभो!
जातः सम्प्रति संशयो हि मनसस्तेऽनुग्रहान्मूलतः ।३४२।।

निःशङ्को विनिवेदयामि तपनः श्रीपादपद्मादहं
कार्यो नैव पृथक् त्वया' 'तपन! तत्काशीनिवासं कुरु ।
आगन्ता समये शिवां शिवपुरीं तत्रावयोः सङ्गमः'
काशीं श्रीतपनो गतः प्रभुगिरा, गौरो गृहायोद्यतः ।३४३।।

पत्नीवियोगः

४४. मीरा नारीप्रतिनिधिरूपा प्रीतेः साक्षान्मूर्तिः।

लोके कन्या जन्मकालतः पित्रोर्भ्रातुः प्रीतिः
परिणीता सा प्रीतिस्रोतो नरहृदि कुलिशकठोरे ।
क्रमशो जननीपदमधिरूढा प्रसवस्नेहपयोऽब्धिः
कन्यारूपा जननीरूपा भुङ्क्ते स्नेहं वितरति।।
मधुरप्रीतेः केवलकान्ता प्रतिव्रता खलु पात्रम्
भगवद्रूपं पतिं स्वकीयं भजमाना त्विह धन्या ।
नूनं धन्यतमा भूलोके भगवन्तं पतिमिच्छति
भगवति पत्यौ, विरहे श्वसनं साध्वीदुष्करकार्यम् ।।
मंत्री कर्मणि, सेविका गृहकृतौ, माता च सम्भोजने,
रम्भा कामसुखे, धरा च सहने, धर्मे तथांऽर्धाङ्गिणी ।
सर्वस्वं पुरुषस्य योग्यवनिता पत्नी गृहस्थाश्रमे
सुप्रीता मृदुभाषिणी सुचतुराऽधन्यो गृही तां विना।।३४४।।
लक्ष्मीं तां गृहिणीं तथा गुणवतीं लेभे हि लोकप्रियो
गौराङ्गो मृदुपण्डितो निजपतिप्राणप्रियङ्कां सतीम्।
सन्नद्धा वपुषा तथैव मनसा श्वश्रूशचीसेवने
नाम्ना सा सुभगा गुणेन मधुरा वाणीसुधाशीतला ।।३४५।।

४५. कमला कुण्ठारहितं पुरुषं कुरुते विमला विमलम्।

गृहकार्यं खलु जालाच्छन्नं मार्जयते तन्निपुणम्
हर्षविषादोभयसमचित्ता छाया पतिमनुगच्छति ।
स्वान्तःशान्ताऽशान्ता वा स्याल्लपति सदा प्रियमधुरम्
भाग्यवतस्तद्गृहलक्ष्म्यै सा स्वर्लक्ष्मीः स्पृहयालुः।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रस्थानोद्यतभर्तृपादयुगलं धृत्वाऽप्रगल्भा वधू-
र्लक्ष्मीर्भाविवियोगकातरमनारुच्चै रुरोद स्फुटम् ।
'एवं दुःखमहैतुकं ननु दिनैर्गेहाऽऽगमो निश्चितं'
पत्नीधैर्यधनो न वेत्ति वनिता मुग्धाऽपतौ ह्यस्थिरा ।।३४६।।

आश्वस्तां मनसा निजेन सुमतिर्मत्वा प्रतस्थे गृहा-
द्दूरं लोचनतो रवौ जलरुहं नूनं जले म्लायते ।
सा लक्ष्मीर्जनकस्य सम्प्रति गृहे खिन्ना प्रतीक्षारता
नान्यत्तोषकरं हृदा हि मनुते मुग्धा विना स्वामिनम् ।।३४७।।

म्लानिस्तद् ववृधे दिनप्रतिदिनं नो रोचतेऽन्नं जलं
तन्मन्दाग्निविनष्टपाचनबलं तापो वियोगज्वरात् ।
वेत्ता केवलवातपित्तकफकृद्रोगस्य वैद्यः कथं
संसारी विरहज्वरं पतिहृदो जानातु साध्वीस्त्रियाः ।।३४८।।

पित्राऽऽहूतचिकित्सकोपचरितो व्याधिः सुताशीर्हृदा
लक्ष्म्याः शाम्यति नोऽधिकाऽधिकतया देहः शनैः क्षीयते ।
आशांशुर्नहि जीवनस्य हृदये सम्बन्धिनो विद्यते
तस्याश्चास्त्यधुनाऽपि दर्शनतृषा पत्युस्ततो जीवति ।।३४९।।

यात्राप्रस्थितपण्डितस्य समयव्याप्तिर्व्यतीताऽधिका
न्यायज्ञानुमितेस्ततः पतिमुखप्रत्यक्षतां नान्तिमे ।
लेभे देहविसर्जनस्य समये पादौ च पत्युर्हृदा
धृत्वा लोकमिमं जहौ बुधसती संस्कारिता ज्ञातिभिः ।।३५०।।

मासाः पण्डितयात्रिणो व्यपगताश्चिन्ता च नैसर्गिकी
गेहं स्मारयति स्फुटं मनसि तत्संभावना स्पन्दते ।
दूराद्दूरतरं प्रभावयति तत्प्रीतिः प्रमातुर्हृदं
लक्ष्मीहार्दिकवेदनास्मरणतः प्राज्ञव्यथा वर्धते ।।३५१।।

अग्रे यानमतोऽधिकं झटिति तत्त्यक्त्वा जगाद स्फुटं
शीघ्रं द्वीपनवं चलन्तु सुहृदः सर्वे तथोपस्थिताः ।
अध्येतुं बहवोऽमुना ह्यनुगताः स्थानीयविद्यार्थिनः
सर्वैः सार्धमसौ धनोपहृतिभिर्लेभे दिनैर्द्वीपकम् ।।३५२।।

द्वीपे राढगतो निमायिविबुधः प्रत्यावृतो विद्युताः
वार्तेयं क्षणतः समं प्रसरिता मित्राणि विद्यार्थिनः ।
स्निग्धा दर्शनबन्धवोऽस्य वसतिं सर्वे क्रमाच्चागताः
पप्रच्छुः कुशलं निमायिविदुषः प्रेम्णोचितं सत्कृताः ।।३५३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्रादौ जननीपदाब्जनमनं चक्रे निमायी परं
माताऽपूर्ववधूवियोगकरुणम्लाना तथा कातरा ।
वृद्धा केवलपुत्रलम्बितभवा यात्राविलम्बातुरा
चिन्ताब्धौ परमे विलीनहृदया पुत्रप्रतीक्षामयी ।।३५४।।

आसीत्पुत्रमवाप्य नन्दितमनाः कालाद्वियुक्तं चिराद्-
देहस्पर्शसुखा कराङ्गुलिपथा गौर्जिह्वया वत्सकम् ।
आनन्दाश्रुविलोचिताच्छवदनां पप्रच्छ पुत्रो'ऽस्ति किं
भद्रं तन्निखिलं दिनान्यनुमितेर्यातानि मातोऽधिकम्' ।।३५५।।

सा मौनप्रतिमा परं हि जननी पुत्रेण पृष्टा सती
लक्ष्मीस्वर्गमनं जगाद शनकैश्चान्याऽङ्गना पण्डितम् ।
श्रुत्वैव क्षणतो वियोगजनिता म्लानिर्मुखाल्लक्षिता
धीरस्यापि विलोचनाश्रु जननीतारस्वनारोदनात् ।।३५६।।

मन्दं मन्दममन्दमश्रु मुखतः संमार्ज्य 'मातर्विधेः
शक्तो लेखविलेपने नहि जनो दैवं स्वतन्त्रं सदा ।
एतावद्दिनमात्रयोगसमयः को वेद वध्वाश्च ते'
गौराङ्गः स्वयमेव धैर्यविधुरः स्वान्तोऽपि धैर्यं जगौ ।।३५७।।

तन्माता रुदती जगाद 'सुतक! त्वामेव सा ध्यायती
त्वद्यात्राऽऽगममात्रशब्दरचना चान्तेऽपि तस्याः क्षणे ।
श्रीलक्ष्मीप्रतिमा वधूः पुनरपि प्राप्याऽत्र नो सम्भवा
मौनप्राज्ञपतिर्निशम्य जननी भूयो रुरोद स्फुटम् ।।३५८।।

तत्किञ्चिद्ध्वनियुक्तधैर्यवचनं पुत्रो जगाद प्रभु-
'र्मातः! सम्प्रति रोदनं कियदपि प्रत्यावृता नो वधूः ।
आगन्तुं नहि सा गता ननु धृतिर्धार्याऽधुना केवलं'
तत्पुत्रोक्तिरसेन विश्वजननी तस्थौ सुधीरा स्वयम् ।।३५९।।

स्नातुं पुत्रमुवाच शीघ्रपचनं कृत्वा च तं सङ्गिभि-
र्वात्सल्येन चिराय भोजितवती वृद्धा तथैकाकिनी ।
तन्मित्रैः कृतभोजनोऽकृत पुनर्यात्रादिवार्तां ततो
भूयः पूर्वसमानपाठनरतो विद्यालये पण्डितः ।।३६०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवद्वीपे दिग्विजयी पण्डितः

४६.जगती नानाकौतुकभरिता जीवक्रीडाभूमिः।

बद्धो मुग्धः सुप्तो बुद्धः स्वेच्छं क्रीडति सर्वः
देशे काले परिस्थितौ वा व्यक्तिः क्रीडाभूमिः ।
चित्रं चित्तं चपला वृत्तिर्भ्रमयति भववनमध्ये
शक्तिर्बुद्धिर्भक्तिर्वित्तं परमं प्रेमावृत्तिः
जगती पण्डितपरिषच्चेयं तत्सभयाऽन्ये सभ्याः ।।

प्रज्ञा सा प्रतिभा विलक्षणगुणो दैवप्रदत्ता जने
व्यक्ता कुत्र कथं कदा भवति तज्ज्ञाता कदाचिन्न सः ।
कण्ठस्थं श्रवणक्षणे हि कुरुते गेयं पदं गायकः
श्रोतुं कोऽपि तदेव कण्ठकरणे भूयो हि नापेक्षते ।।३६१।।

कश्चिज्जन्मत एव गाननिपुणस्तालस्वरज्ञानतः
श्रोतारं ननु विस्मितं हि कुरुते बालोऽपि विज्ञं जनम् ।
गर्भादेव कविश्च कोऽपि कवितारूपं वचो भाषते
वक्ता कोऽपि निरक्षरो जगति वै विस्मापकः शास्त्रिणाम् ।।३६२।।

शास्त्राणाञ्च धुरन्धराः कतिपये नो वै सभापण्डिताः
शास्त्रज्ञानमितस्तथापि परिषत्सम्मोहकश्चापरः ।
व्याख्याने पटवः पुरा प्रचलितास्ते वाग्मिनः पण्डिताः
प्रत्युत्पन्नमतिर्जनो झटिति वै प्रश्नोत्तरं सेवते ।।३६३।।

वक्तारो नहि सङ्कुचन्ति विदुषां मध्ये सभायां तथा
लोके पुस्तकजन्तवो हि कथिताः सङ्कोचिनः शिक्षिताः ।
सर्वा वै प्रतिभाचमत्कृतिततिर्यत्कालतो व्यज्यते
तत्राद्या सहजा, परं गुरुकृपा, सा साधनाप्ताऽन्तिमा ।।३६४।।

देशेऽस्मिन् खलु भारते प्रचलिता भाषा पुरा संस्कृतं
प्राज्ञा राजसभासु संस्कृतविदः संरक्षिताः सम्पदा ।
शास्त्रार्थप्रथया सभासु विदुषां मानप्रतिष्ठार्जनं
विद्वद्वादविवादतो धनवतां राज्ञां मनोरञ्जनम् ।।३६५।।

वक्तृत्वे पटवश्च संस्कृतविदः शास्त्रार्थपारङ्गता
विद्वांसो ह्यभिमानिनो दिशि दिशि भ्रेमुर्जयार्थं पुरा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायस्ते धनिकाश्रिताश्च बहवो राजाश्रिता पण्डिता
विद्वद्भिः सहयोगिभिर्गजहयश्रीभिः समं बभ्रमुः ।।३६६।।

तेषां तद्भ्रमणञ्च दिक्षु वितते विद्याप्रसिद्धे स्थले
केन्द्रे तत्क्रियते च दुन्दुभिरवाद् विद्यावतां घोषणा ।
'शास्त्रार्थाय समागतेन विदुषा विद्याभिमानी बुधः
शास्त्रार्थी यदि कोऽपि संस्कृतजनः शीघ्रं मया स्पर्धताम् ।।३६७।।

शास्त्रार्थे च पराजितो निजधनं त्यक्त्वा हि गन्ताऽखिलं
विद्वांसो विजिता मयाऽत्र निखिला, ज्ञास्याम्यहं यज्जयी ।
शास्त्रार्थं ह्यथवा विनैव गमनं तत्सम्भवं, पण्डिताः
पत्रं मे विजयस्य तद् ददतु वै हस्ताक्षरैरङ्कितम्' ।।३६८।।

तेषां घोषणया तटस्थविबुधास्तिष्ठन्ति मौनं परे
शास्त्रार्थं मिलितास्तथा समुचितं चक्रुः परं पण्डिताः ।
अन्ये तत्सहजं लिखन्ति विजयाऽऽलेखं विवादं विना
सोऽयं दिग्विजयी हि पण्डितजयी निर्याति भेरीस्वरैः ।।३६९।।

सम्मानो धनिकाच्च मान्यपुरुषात्तेषां जिगीषावतां
सम्मर्दो नगरेषु वस्तुविविधद्रव्योपहारस्तथा ।
श्रीचैतन्ययुगेऽपि दिग्विजयिनामुल्लेखनं श्रूयते
नाद्यत्वे विजयी, तथा विजयिनौ दत्तप्रभुर्दृष्टवान् ।।३७०।।

वैशिष्ट्यं ननु दर्शितं झटिति तत्प्रश्नोत्तरव्यञ्जनं
तेषां वाक्यपटुता जये प्रगुणिता पाण्डित्यशोभालता ।
काश्यां श्रीप्रभुदत्तगोचरगतः सब्रह्मचारी स्फुटं
जेता दिग्जयिनो हि संस्कृतवचोधाराप्रवाहैः कृतः ।।३७१।।

एवं दिग्विजयी जयेन विविधे स्थाने भ्रमन् स्पर्धया
'शास्त्री केशवनामपण्डितवरो' द्वीपे नवे चागतः ।
विद्याकेन्द्रमिदञ्च भारतधराख्यातं हि विद्यावतां
नव्यन्यायविशेषशास्त्रविषये द्वीपप्रसिद्धिस्तदा ।।३७२।।

तस्माद्द्वीपजयेन भारतधरापूर्वो जितो मान्यता
विद्वांसो बहवोऽत्र वङ्गवसुधाख्यातिप्रदीपास्तदा ।
गङ्गादाससुवासुदेवसुमती चाद्वैतनीलाम्बरौ
न्याये व्याकरणे महेश्वरसुधीर्विद्यावयःसिद्धयः ।।३७३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वीपे सम्प्रति पण्डिताश्च कमलाकान्तो मुरारिस्तथा
'गौराङ्गो' रघुनाथदाससुमतिः ख्याता नवीना नवे ।
चर्चा द्वीपनवे च दिग्विजयिनः सर्वत्र संश्रूयते
यत्र क्वापि मिलन्ति शिष्यगुरवः कुर्वन्ति तत्केवलम् ।।३७४।।

'गन्ता द्वीपजयं विधाय सुयशोनासाऽस्य तच्छिद्यते'
'ज्ञाता न्यायकणञ्च किं स कठिनं, पङ्क्त्या विमूर्च्छामियात्' ।
'गन्ता कः सविधेऽस्य जल्पपरिषन्नो रोचते धीमता'-
मेवं तत्प्रथमं, द्वितीयमितरं भिन्नं वचो वासिनाम् ।।३७५।।

शास्त्रार्थः स्वदते तथा न महतां विद्यावतां धीमतां
प्रायो धीरगभीरपण्डितवराश्चोदासते वादतः ।
प्राज्ञा बिभ्यति तत्र दिग्विजयिनस्तद्धूर्तताजल्पना-
त्स्थाने स्वस्य पराजयात्तदितरस्तद्वेद नोऽध्यापनात् ।।३७६।।

गौराङ्गं कथयन्ति दिग्विजयिनो वार्ताञ्च विद्यार्थिनः
'प्राप्तो दिग्विजयी बुधो गजहयैर्विद्वत्समाजैः समम् ।
कश्मीरान्नदियाधराबुधवरैः शास्त्रार्थकामोऽवद-
च्छास्त्रार्थं रचयन्तु वा ददतु मे प्राज्ञा! जयालेखनम् ।।३७७।।

शास्त्रार्थाय च सन्ति यद्यपि बुधा द्वीपे बहु प्रस्तुताः
सिद्धा तेन सरस्वती, परमतः कण्ठे स्थिता भारती ।
शास्त्रार्थाध्वनि तस्य वै स्वयमहो तत्त्वस्य वक्त्री यतः
सम्पूर्णे जयलाभतोऽत्र पतितो द्वीपे नवे भारते ।।३७८।।

पक्षे यस्य च भारती ननु कथं जेता विपक्षी भवे-
त्स्थाने दिग्विजयी स्फुटं वदति तद्दर्पान्वितः पण्डितः ।
'मेदिन्यां नहि कोऽपि मे प्रकटितः शास्त्रार्थजेता सुधी'-
गौरश्रीनदियाधराऽखिलबुधा भीता निमायीगुरो!' ।।३७९।।

छात्राणां वचनं निशम्य वदति प्राज्ञो निमायी सुधी-
'नूनं नश्यति कस्यचिन्ननु वरात्प्राप्तोऽभिमानोऽसताम् ।
भुङ्क्ते केवलदर्पमेव भगवान् दर्पापहारी हरि-
र्दृष्टान्तो नरको हिरण्यकशिपुर्भस्मासुरो रावणः ।।३८०।।

एते ब्रह्मशिवौ च घोरतपसा संतोष्य घोरं वरं
लव्ध्वा दर्पयुताः परं भगवता दर्पेण ते चूर्णिताः ।
संसारे ह्यभिमानतोऽत्र पतिता गर्ते महान्तः स्वयं,
तद्वै दिग्विजयी पुनर्द्विजपतिर्मानी पदार्थः कियान्' ।।३८१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उक्त्वा चैवमयं ययौ त्रिपथगातीरे स्वविद्यार्थिभिः
शास्त्रालापनदीप्रवाहतरणं चक्रे निजं दैनिकम् ।
छात्रद्वारसमागतद्विजजयिस्थानक्रियां लब्धवान्
'गङ्गातीरगतिर्न वा रहसि, तत्किं किं क्रिया तस्य वै ।।३८२।।

तीरे तिष्ठति कुत्र कश्च समयो' ज्ञातं ततश्छात्रतः
'सायं दिग्विजयी स्थितो मिलति तत्तीरेऽमुके नित्यशः' ।
तत्तीरे गमनं निमायिसुमतिश्छात्रैः सहारब्धवां-
श्चान्येऽप्यत्र मिलन्ति कौतुकवशाच्छास्त्रार्थविद्यार्थिनः ।।३८३।।

दिग्विजयिनः पराभवः

४७.गुणिनो गुणवत्ता भुवि सिध्यति यदि तद्ब्रूते चान्यः

दोषस्तन्नियतं खलु शुध्यति, दोषी यदा तदिच्छति ।
प्रायो गुणचर्चा सर्वेषां लोभयतीह जनानाम्
बिभ्यति गुणशंसाश्रवणाभ्यां निर्भीका ह्यपि सन्तः
लक्षितनायकचरितं काव्ये स्वात्मश्लाघारहितम् ।।

एकान्ते सुमतिश्च दिग्विजयिना वार्तां निमायीच्छति
प्राज्ञस्यानुचितं सभोपहसनं वृद्धस्य तन्मानिनः ।
सम्मानस्य च रक्षणाय विदुषा प्रायः कुतर्कैः सभा-
मध्ये मण्डनखण्डनं स्वपरयोः संसाध्यते पक्षयोः ।।३८४।।

छात्रैः शास्त्रविचारको हि वयसा वृद्धेन तद्धीमता
गौरो नेच्छति शास्त्रदिग्विजयिना शास्त्रार्थमिथ्यारसम् ।
संसारे परमात्मनो नहि परं वस्त्वद्वितीयं ततो
दर्पो दिग्जयिनो विनश्यति नवद्वीपे निमायीदिशा ।।३८५।।

वैचित्र्यं ध्रुवमस्ति धातृजगतो मल्ला गृहे वा वने
मल्लानां बहवो भवन्ति सुलभा दर्पान्वितानां परम् ।
एकान्ते यदि लभ्यते बुधजयी शास्त्रार्थकामश्च त-
न्मर्यादासहितं हि दर्पदलनं, प्रेमी न मायी नरः ।।३८६।।

संध्यायाः समयो, नदी भगवती भागीरथी पूर्ववद्
धावन्ती भुवि सागरं द्रुतगतिर्याति स्वतः प्रेरिता ।
श्रोतुं जागतिकं ध्वनिं न समयो मन्येऽस्ति तस्याः कृते
ब्रह्माण्डे प्रकृतिर्हि सात्त्विकहृदां स्वान्तोद्यता चेष्टते।।३८७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नानापक्षिगणा नभःकलरवैर्गच्छन्ति नीडोन्मुखाः
संध्याभा विधवाङ्गनेव रुदती चास्ते रवौ लक्ष्यते ।
शोकग्रस्तविरक्तसांध्यवदनं शीतांशुभिः सस्मितं
चन्द्रः खेऽभ्युदितश्च षोडशकलः कर्तुं जगन्मोदकः ।।३८८।।

वैदूर्यच्छविशुभ्रनीलविमले गङ्गाजले चन्द्रमाः
श्रीबिम्बप्रतिबिम्बमण्डलवपुः स्नाति प्रमाता रसे ।
शालातश्च समागता हि बहवश्छात्राश्च मेधाविनः
शास्त्रालापयुता नदीमुपगताः प्रश्नोत्तरे सङ्गताः ।।३८६।।

एकः पृच्छति, चोत्तरं तदितरो दत्ते, पुनः प्राश्निको
मेधावी खलु खण्डनञ्च कुरुते दत्तोत्तरस्य द्रुतम् ।
अन्यैस्तत्सहयोगिभिः पुनरपि प्रष्टुस्तथैकाकिनः
शास्त्रार्थेऽन्यपराजये स्वविजये वार्ता हि युद्धोपमा ।।३६०।।

शास्त्रार्थे सुकुमारशास्त्रमतयो विद्यार्थिनः केवलं
श्रोतारश्च तटस्थितास्तु पुलिने नेत्रार्थिनः केचन ।
वाग्युद्धेऽत्र शिरोमणिः स्वयमहो प्राणायते पण्डितो
गौराङ्गो निजयोगदानबलतश्चोत्साहसंवर्धकः ।।३६१।।

श्रीगौराङ्गमुखेन्दुशास्त्रकिरणं गङ्गातटे पण्डिताः
सांध्ये दैनिककर्मणि स्थिरहृदः शुश्रूषवो वस्तुतः ।
अन्ये किञ्च यथार्थतः सहृदया नन्दन्ति शास्त्रार्थत-
स्तन्मध्ये पुलिनेऽन्तरङ्गसहितो जेता दिशाञ्चागतः ।।३६२।।

स्थूलस्वस्थवपुस्तथा सुघटितो वर्णेन गौरः पुमान्
वक्षस्पर्धिसुदीर्घसुन्दरभुजो दीर्घाक्षगोलाकृतिः ।
स्थाने केसरदीर्घफालतिलकः पक्वार्धमूर्धाङ्गजो
विद्वत्तापरिलक्षिताभवदनः संस्फूर्तदर्पान्वितः ।।३६३।।

प्राप्तः केवलशुभ्रकञ्चुकवपुर्मूर्धाङ्गमुक्तावृत्ति -
र्गङ्गां दिग्विजयी विनम्य सुमतिश्चाचम्य तस्थौ क्षणम् ।
छात्राणां सविधे विनोदमनसा यातः पुनः पण्डितः
'सोऽयं दिग्विजयी' निमायिविदुषः पार्श्वस्थशिष्येङ्गितः ।।३६४।।

दृष्ट्वा तं जयिनं ननाम विनयी स्थातुञ्च तत्सद्ग्रहं
चक्रे, सङ्कुचितः पुरा, परमसौ सर्वाग्रहादास्थितः ।
मानो मानवतां कुले, नहि पुनर्मानापमानद्वया-
न्मुक्तेषु क्रियते जनैर्जगति वै मूर्खैर्यथा पण्डितैः ।।३६५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उद्वेगो नहि, मूर्खमत्तशिशुभिः सार्धं मिलन्ति स्फुटं
मानादिं ह्यविचार्य तद्व्यवहृतौ लोका न तल्लिप्सवः।
अन्तर्मानसमानभावभरिता भीतास्तथाऽमानतः
पूर्वज्ञातजनप्रबन्धललितस्थानेच्छवो मानिनः ।।३६६।।

विद्यासाधनशुद्धभावसहिता विद्यार्थिनो वस्तुतः
स्वाध्यायावधिमित्रसंघसमतायोगेन दीव्यन्ति वै ।
स्पष्टं लोकमनः समत्वविषये विद्यार्थिनां यद्यतः
सच्छात्रप्रियता बुधस्य सहजा, छात्रोपविष्टो जयी।।३६७।।

गौराङ्गो नदियाऽतिथेश्च विदुषस्तस्तार वस्त्रं स्वकं
तस्मिंस्तत्र सुखं निषीदति बुधे, विद्यार्थिनां मौनता ।
मूके शास्त्रमुखे स्मितेन सहितो ब्रूतेऽतिथि'र्भ्रातरः!
शान्ताः शास्त्रविचारणात्कथमहो, कार्याल्पचर्चा परम्'।।३६८।।

नोचुस्ते तु तथापि, किञ्च शनकैः पश्यन्ति गौरोन्मुखा
गौरं पृच्छति तत्स्वयं 'पठसि तत्त्वं कुत्र विद्यालये'?
मौने प्रश्नगिरा गुरौ च विनयी छात्रो जगाद द्रुतं
'सोऽयं श्रीनदियाधराबुधवरख्यातो निमायी सुधीः'।।३६९।।

प्रीतोऽसङ्कुचितोऽतिथिर्ननु गृहीपृष्ठं करेण स्पृशन्
ब्रूते 'भोस्त्वमयं निमायिसुमतिः ख्यातिः श्रुता तेऽधिका ।
श्रीवैयाकरणेषु गौडधरणीगौरो निमायी, श्रुतिः
स्थाने तद्भवतैव काऽपि पदवाक्पङ्क्तिस्तथा श्राव्यताम्' ।।४००।।

गौरो बद्धकरो जगाद विनयी 'योग्यो न चाहं तथा
वात्सल्यं महतां तथा मयि लघौ त्वादृग्गुरूणां कृपा ।
ब्रूयां किं भवति स्थिते नहि समो शिष्यप्रशिष्यैश्च ते
विद्याबुद्धिबलेन चात्र भवता भूमौ कृतो दिग्जयः ।।४०१।।

अस्माकं श्रुतिगोचरञ्च भवतः ख्यातं कवित्वं मह-
च्छात्राणां निवहोऽयमत्र, कवितां श्रोतुं तवोत्कण्ठितः।
काञ्चित्ते कवितां निशामय विभो! प्रीतः कृपालुर्भवान्'
श्रुत्वा दिग्विजयी जहास मुदितैश्छात्रैस्तथा प्रार्थितः।।४०२।।

एतावन्नदियानिवाससमये स्पष्टं न लब्धस्तथा
तल्लोकोत्तरभावशक्तिनिपुणव्यक्तित्वदीप्तिक्षणः ।
लब्ध्वा तत्समयं सगर्ववचनं ब्रूते जयी सस्मितं
शुश्रूषा च यथा वदामि च तथा 'गङ्गा धरादेवता।।४०३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माहात्म्यं वद तद्यथा श्रुतिहृदोःशुद्धिस्तथाऽऽस्वादनं'
गौराङ्गस्य गिरा च दिग्विजयिनो धारा च गङ्गास्तुतिः ।
माहात्म्यत्रितयं समं प्रवहितं हृत्कर्णनेत्रामृतं
सद्यो गाङ्गपवित्रनूतनकृतश्लोकश्रुतिः संस्मृतिः ।।४०४।।

तत्प्राज्ञप्रतिभानवीनकविताव्यक्तौ विलम्बस्तथा
नायासः खलु चिन्तने हृदिकृतां यच्छन्दसां व्याहृतिः ।
छात्रा दिग्जयिनस्तथा श्रवणतो मुग्धास्तथा विस्मिता
मेधावी प्रतिभाधनी ह्यनुपमो नो गोचरोऽद्यावधिम् ।।४०५।।

छात्राणां हृदयस्थितिं वदनतश्चालक्ष्य जेता दिशां
हृत्प्रीतो यमकादिशब्दरचनाऽलङ्कारझङ्कारतः ।
कर्णस्वादुसुकण्ठकोकिलरवात्कालक्षणात्केवलं
श्लोकांस्तांश्च शताधिकान् सुमधुरांश्चोद्गीर्य मौनं स्थितः ।।४०६।।
स्तब्धं तत्पुलिनं नदीजलकलव्यक्तध्वनिर्मौनत-
स्तत्काव्यस्य रसप्रवाहमधुतां तस्थौ च नेतुं क्षणम् ।
एकाकी हि बभञ्ज धीरमधुरस्वादो निमायिस्वर-
श्छात्राणां स्मयताञ्च तीरजडतां स्रोतस्विनीमौनताम् ।।४०७।।
'मान्या! लोकविलक्षणप्रतिभया व्यक्तं हि धन्या वयं
सद्यःस्फूर्तनवीनकाव्यरसनास्वादं निपीयाऽधुना ।
एवं तत्कविकाव्यसङ्गमनदी पूर्वं न दृष्टा श्रुता
बोधाभावतया ततो भवतु नः कैवर्तको मज्जताम् ।।४०८।।
अज्ञानां कृपया पुनः शमय तत्पद्योत्करात्कस्यचि-
च्छुश्रूषां गुणदोषभावकथनव्याख्याविधेः शृण्वताम्' ।
दर्पी तत्र जहास 'केशवकृते पद्ये कथं दुष्टता ।
व्याख्यां किञ्च करोमि किन्तु वद तत्पद्यस्य कस्येच्छसि' ।।४०९।।
सद्यःपद्यसमूहवेगपठनात्पद्यस्मृतौ कोऽपि किं
शक्तः, स्यान्नहि पद्यमेकमपि तद्वक्तुञ्च तन्निश्चयः ।
सत्यं दिग्विजयी सुधीः कविवरो वाणीवरात्किन्तु त-
च्छ्लोकं कोमलकण्ठतः श्रुतिधरः स्पष्टं निमायी जगौ ।।४१०।।

"महत्त्वं गङ्गायाः सततमिदमाभाति नितरां
यदेषा श्रीविष्णोश्चरणकमलोत्पत्तिसुभगा ।
द्वितीयश्रीलक्ष्मीरिव सुरनरैरर्च्यचरणा
भवानीभर्तुर्या शिरसि विभवत्यद्भुतगुणा" ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

४८. गङ्गे! प्रवहसि सततं भूमौ जनमलपातकहरणी।
दिनकरहिमकरगगनविचरणं पवनाऽऽलोचनसरणम्
कमलनयनपदनीरजसम्भवपावनतागुणधरणी ।
शिवसङ्गतिविषशमनस्वादा भवभयहरणप्रकृतिः
भारतवसुधासगरभगीरथकुलसञ्चितधनमूर्तिः ।।

एवं तत्कृतपद्यवृन्दजलधेर्गङ्गोक्तपद्यं जलं
गीत्वा तज्जलगाङ्गवारिधिगतं साद्गुणवैगुण्ययोः ।
व्याख्यां दिग्जयिनं विधातुमसमः श्रोता च जिज्ञासते
गौरश्रीमुखतो निशम्य विजयी पद्यं तथा विस्मितः ।।४११।।

वैवर्ण्यं जयिनो मुखे, स्मयमुदौ विद्यार्थिनां शृण्वतां
सर्वेषां नयनेऽतिथेर्वदनतो लग्नेऽनिमेषे गुरौ ।
मन्ये श्रीप्रतिभाप्रभाश्च जयिनो गौरप्रभाऽन्तर्हिताः
सोऽयं दिग्विजयी जगाद सुमतिं तत्कृत्रिमोपक्षया ।।४१२।।

'वेगोच्चारितमध्यपद्यधृतितश्चातुर्यमात्राऽधिका'
मन्दं नम्रगिरः 'कृपा तव, गुणो दोषोऽधुनाऽऽलोच्यताम्' ।
'ते वैयाकरणस्य बोधविषयः शास्त्रन्तु नालङ्कृति'-
'र्नाऽधीतञ्च मया, परं श्रुतमहो, ज्ञास्यामि ते व्याख्यया।।४१३।।

श्रुत्वोपस्थितशिष्यवृन्दविबुधा नन्दन्त्यलङ्कारिणो'
बद्धो गौरगिरा ततश्च विजयी व्याख्याञ्चकाराऽमनाः ।
औपम्यं पदशोभनञ्च विरतश्चोक्त्वा तथाऽनिच्छया
'स्यान्नो तेऽनुचितं गुणाऽवगुणने वक्ता ततोऽयं जनः' ।।४१४।।

क्रुद्धाहौ चरणप्रहारसदृशं संसारजेतुः कवे-
र्वाणीप्राप्तवरस्य पद्यरचनादोषस्य वक्ता कथम् ।
सन्नद्धश्च युवा सुधीस्तु पुरतस्तद्दोषमन्तर्गतं
पीत्वा पण्डितकृत्रिमस्मितवचः 'श्रोतुं तव प्रस्तुतः' ।।४१५।।

व्याख्याता प्रथमन्तु पद्यगुणनञ्चक्रे निमायी सुधीः
'श्लोकोऽयं खलु सुन्दरः सुरनदीमाहात्म्यसङ्कीर्तकः ।
किञ्चालङ्कृतिशास्त्रदृष्टिकरणान्नानात्वसंभावना
व्याख्यायां गुणदोषयोः, परमिमौ तौ पञ्चधा मुख्यतः ।।४१६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'दोषः कः खलु कश्च' दिग्विजयिन 'श्चादौ श्रृणु त्वद्गुणं
श्लोके वै प्रथमे तकारघटना पादे तृतीये तथा ।
वर्णप्रासगुणे रकारघटना पञ्चावृतिः शोभिका
शब्दश्रौतगुणो भकारचतुरन्यासश्चतुर्थे पुनः ।।४१७।।

भिन्नाकारपदैः पदार्थसमताऽऽभासस्तथाऽऽपाततः
शब्दार्थोभयशोभिका कविकृतौ तन्नाम साऽलङ्कृतिः ।
'श्रीलक्ष्मी'रिति गाङ्गपद्यपदयोस्तुल्यार्थताऽऽभासनं
लक्ष्मीः कान्तियुता तथार्थकरणादन्यो गुणोऽलङ्कृतेः ।।४१८।।

औपम्यं ननु सर्वबोधविषयं गङ्गाऽत्र लक्ष्मीसमा
श्रीलक्ष्मीरिव योजनेयमधिकञ्चार्थोक्तिवैचित्र्यदा ।
आभासोऽत्र परो विरोधविषयो युक्तश्चतुर्थो गुणो
जात्याद्यर्थविरोधतः कविगणैर्वैचित्र्यमुत्पाद्यते ।।४१९।।

४९. कमलं सहृदयहृदयानन्दं ज्ञानाद् भावाद् योगात्

शोभागन्धस्पर्शानन्दं भ्रमरस्वादानन्दम् ।
श्रवणानन्दं भावकहृदये काव्यकृतावुपमानम्
नयने वदनं चरणौ हृदयं निखिलं कमलं कमलम् ।
श्रीनारायणनाभिदेशतः कं भूमा तत्कमलम्
कं ब्रह्मा तत्प्रजापिता कं शीर्षं नीरं सौख्यम् ।
स्थावरजङ्गमवसुधा जलजा जलजं कमलं रूढम्
कमलनयनपदकमलसम्भवा जलगङ्गा न विरुद्धा ।।

संसारे जलजं तथाहि कमलं रूढं, न तज्जं जलं
श्लोके वै कमलाज्जलं निगदितं पादे द्वितीये तथा ।
जात्या तच्च विरुध्यते तदपि वै चाभासमात्रं यतो
गङ्गा विष्णुपदोद्गता तदुभयाऽभेदाद् विरोधो गुणः ।।४२०।।

साध्यज्ञानमलङ्कृतिर्यदि भवेद् विच्छित्तितः साधना-
त्साध्यं गाङ्गमहत्त्ववर्णनमिदं तत्सम्भवस्थानकम् ।
श्रीविष्णोश्चरणाब्जमत्र कथितं तत्साध्यसिद्धिस्ततो
विच्छित्त्या ह्यनुमानचित्रजनकाच्चालङ्कृतिर्वैगुणः ।।४२१।।

शब्दार्थौ ननु काव्यदेहघटकौ चोत्कर्षकारात्तयो-
श्चोक्त्वा पञ्च गुणानलङ्कृतिपदैर्मौनायितः पण्डितः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्भीकः सहजं जगाद निखिलं शास्त्रानुसारं ततः
श्रोतारो ह्यनिमेषदर्शनरता गौरोन्मुखाः केवलम् ॥४२२॥

ग्रस्तं दिग्जयिनः स्वतश्च हृदयं तद्दर्पिणो विस्मया–
त्तस्य व्याकरणज्ञगौडविदुषश्चालङ्कृतेर्व्याख्यया ।
औदासीन्ययुतश्च पश्यति जयी गङ्गाऽवताराश्मकं
गौराङ्गप्रतिपादितान्निजगुणाज्जातः प्रसन्नो न सः ॥४२३॥

ब्रूते कोऽपि तथाप्रकाण्डविबुधं 'ज्ञाताऽपि शास्त्रस्य त्वं
स्वल्पं', तत्कथनं न मोदजनकं, किन्त्वस्य तद्दुःखदम् ।
काव्ये तत्र निजे च केवलगुणैश्चित्रे विचित्रे भुवो
जेता पृच्छति रोषतो 'वद तथा पद्येऽत्र दोषानपि' ॥४२४॥

ऊचे धीरतया तथैव सुमतिर्गौरोऽ'त्र तुल्यं गुणै–
र्नानादोषविवेचनं हि सहजं कर्तुञ्च शक्यं परम् ।
पञ्च स्थूलतया प्रतीतिविषया दोषाश्च शब्दार्थगा
वाक्योद्देश्यविधेययोः स्थितिगतं दोषद्वयं श्रूयताम् ॥४२५॥

उद्देश्यं प्रथमं, विधेयकथनं कार्यञ्च वाक्ये परं,
श्लोकादौ प्रथमं विधेयवचनञ्चोद्देश्यसंस्था ततः ।
मुख्यं गाङ्गमहत्त्वमस्ति कवितावाच्यं तथेदं पदं
चोद्देश्यं हि विशेषणं, परमिमे युक्ते पदे व्युत्क्रमे ॥४२६॥

दोषोऽयं पदयोर्व्यतिक्रमतया प्रोक्तोऽविमर्शो यथा
युक्तं तच्च विधेयमत्र गुणतां प्राप्तं समासे तथा ।
श्लोके चात्र समस्तमस्ति विधितो गौणं 'द्वितीयं' पदं
माहात्म्येन न मुख्यतो हि घटते चान्योऽविमर्शो विधेः ॥४२७॥

भावाद्यत्र कवेः पदं हि घटितं भिन्नां विरुद्धां धियं
धत्ते बोद्धरि, तद्विरुद्धमतिकृद्दोषो हि काव्ये श्रुतः ।
पत्नी साऽत्र भवस्य तत्खलु पुनः भर्त्रा 'भवानी'पदं
युक्तं, वै भवभिन्नवाच्यकथनाद्दुष्टं विरुद्धाऽभिधम् ॥४२८॥

श्लोके चात्र हि वर्णनं 'विभवति' स्थाने समाप्तं कृतं
चान्ते तच्च पुनर्विशेषणपदाच्चात्तं तथा केवलात् ।
आकांक्षा क्रियया समाप्तिमयते त्यक्तस्य तत्स्वीकृतौ
दुष्टं तत्पुनरुक्तनाम कथितं श्लोकस्ततो दोषभाक् ॥४२९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भग्नप्रक्रमता हि नाम कथितो दोषो हि काव्येऽपरः
प्रस्तावो घटनाक्रमोऽत्र यदि वै नो पाल्यते सर्वतः ।
वर्णन्यासविचित्रपद्यघटना पादेषु सर्वेषु नो,
लालित्यं पदगं द्वितीयचरणे नास्तीति भग्नक्रमः' ॥४३०॥

श्लोके वै हतवृत्तकं स्फुटतया गाने तथाऽऽकर्णने
ज्ञातं, तन्नहि दोषमध्यगणितं नालोचितः शब्दतः ।
गङ्गास्वादुजलोपमा शिखरिणी, पादे तृतीये यतिः
षष्ठे यद्यपि चास्ति, किन्तु 'रिवतो' नार्थाऽऽगमः कोऽप्यतः ॥४३१॥

वक्ता गौरसुधीर्वृहस्पतिसमो धाराप्रवाहोक्तिभि-
श्चक्रे साधु हि काव्यशास्त्रघटनां गङ्गासमुद्रोपमाम् ।
मोदांशुर्मुखमण्डले च ददृशे विद्यार्थिनां श्रृण्वतां
मूको दिग्विजयी च नम्रवदनः पश्यन्नधो व्रीडया ॥४३२॥

तत्पद्यस्य समीक्षणं प्रतिपदं चित्तेऽस्य शूलायते
खिन्नो मानसतोऽपि पण्डितमतिर्व्याख्याव्यथां गूहते ।
चक्रे नो प्रतिवादमस्य सुकविर्मौनेऽपि गौरे बुधे
तन्मौने करतालिकाप्रकरणं सेहे स्वयं नो गुरुः ॥४३३॥

ऊचे लज्जितदृष्टिनम्रवदनं नम्रो निमायी मृदुः
'शिष्यः पुत्रसमोऽहमत्र भवतां धार्यो न खेदस्तथा ।
क्षन्तव्यं शिशुचापलाच्च वचनं मान्या! यदुक्तं मया
कर्तव्यो भवतोऽपि दैनिकविधी रात्रिर्व्यतीताऽधिका ॥४३४॥

गन्तव्यं भवताऽपि नो निजगृहं श्वो दर्शनं तत्पुन-
स्ते सद्यःप्रतिभाप्रसूतकवितां श्रुत्वा वयं नन्दिताः ।
वार्ता तद्गुणदोषयोः किमपि नो, सृष्टिश्च तन्मिश्रिता,
दोषेभ्यो गुणसंस्तवोऽपि, महतां दोषैर्न मुक्ता कृतिः ॥४३५॥

आज्ञां देहि,' तदोत्थितः स्वयमतः सर्वे च विद्यार्थिनो
जग्मुर्नित्यसमानमेव मुदिताः सार्धं हसन्तो गृहम् ।
सर्वस्वं ह्यपहाय गच्छति यथा द्यूतप्रसङ्गे जनो
जेता तद्व्यसनी निराशहृदयोऽगच्छज्जितस्तत्तथा ॥४३६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५०.अभयं केवलभगवत्स्मरणम्!

देहधनं भुवि रोगत्रस्तं निर्बलजनभयजनकम्
कार्यपटुः सततोद्यमशीलो मन्दवृत्तिमक्षमते ।
विद्याबोधचमत्कृतबुद्धौ मलिनं स्वस्मादन्यत्
त्रासनखेदनबोधनभीतिर्भजनं ह्यभयारण्यम् ।।

ग्रामीणाः शिशवो गुडस्य पचने सञ्चीयते यन्मलं
मिष्टान्नं हि विदन्ति तन्मधुरताऽऽस्वादप्रतीत्या स्वतः ।
तद्बोधः सहजो गुडस्य विकृतौ माधुर्यसंसर्गतो
माधुर्यं विमलं तु बोधविषयं तद्याति सत्सङ्गतः ।।४३७।।

आनन्दो मधुरोऽखिलश्च विमलो वैराग्यतो लभ्यते
रागस्य क्षणभङ्गुरे च विषयेऽभावो ह्यनासक्तितः ।
आसक्तिर्भगवत्यनुक्षणरती रागो विशिष्टश्च तद्-
वैराग्यद्रुमसौमनःपरिमलो रुक्षो मृदुर्मार्मिकः ।।४३८।।

सङ्गाद्दुष्कृतकर्मणोऽनुतपनाद्वैराग्यमुत्पद्यते
त्यागस्तत्प्रसवस्ततो ननु सुखं 'त्यागाच्च शान्तिः क्षणात्' ।
श्रीमद्गीतमिदं फलं रसमयं शान्तिस्वरूपं सुखं
तन्मूलं, 'स्मर तत्कृतं स्मर कृतम्'चोक्त्याऽनुतापः श्रुतेः ।।४३९।।

वाञ्छा केशवमिश्रदिग्विजयिनः काश्मीरिणो मानसे
'संसारे कविराजमुख्यपदवीख्यातिर्मदीया भवेत्'
पाण्डित्यं निखिलोत्तमं भुवि ततं कर्तुं ततः केशवः
शास्त्री देशविदेशपण्डितजयात्कीर्तिं ततानोद्यतः ।।४४०।।

एकाकी वयसा लघुश्च तरुणो वङ्गावनीपण्डित-
स्तत्ख्यातिं निखिलाञ्चकार सहजं शैलोपमां धूलिसात् ।
शय्यायां प्रथमं तटाच्च पतितस्तप्तोऽनुतप्तो हृदा
वारम्वारमथापि सङ्गिकथनाद्रात्रावभुक्तोऽतिथिः ।।४४१।।

चिन्तामग्नहृदोऽस्य तत्स्फुरति 'किं वङ्गेऽद्य गङ्गातटे
यूनश्छात्रगुरोः पुरो मम मतिर्मूका शिलाघातिता ।
आचार्या मम शास्त्रवाक्यकलने प्रश्नोत्तरे शास्त्रिणः
शक्ता दिग्गजपण्डिता नहि पुरा यूना प्रगल्भायितम् ।।४४२।।

भारत्यै तदसौ च कुप्यति बुधो यन्मंत्रसिद्ध्या स्वयं
'शास्त्रार्थे भविताऽस्मि ते ननु वराज्जिह्वास्थिता' मेऽवदत् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'मिथ्या तद्वचनं कुतोऽद्य रसनालुप्ता हि मे शारदा'
देवीदर्शनकामनाजपरतः सुप्तश्च शय्यास्थितः ।।४४३।।
मन्ये सुप्तिसरस्वती वदति तं 'तुल्या दशा नो सदा
दृष्टान्तो, विजयी पराजयमपि क्रीडारतो गच्छति ।
संसारे विजयार्जनेन जयिनो मानोऽभिमानोऽसत-
स्तच्छान्त्यै च पराजयो ह्यभिमतः श्रेयोरसाब्धिः सताम् ।।४४४।।
तत्त्वं गच्छ निमायिपादशरणं श्रेयस्ततस्ते ध्रुवं
सामान्यो नहि पण्डितः स तु नरो नारायणः श्रीहरिः ।
मुक्तस्त्वं भवितासि तस्य कृपया नूनं निजाज्ञानत'-
स्तस्यैवं स्वपतो द्विजस्य नयने निद्राविमुक्ते क्षणात् ।।४४५।।
बुद्धः पश्यति खे रविं स्वकिरणैः प्राचीदिशा भूतले
दीव्यन्तं, 'स पराभवे हसति किं' मेने तथा तज्जितः ।
धृत्वा केवलकञ्चुकं द्रुतमसौ नग्नो निमायीगृहं
पादाभ्यां शिरसा चचाल पथिकः स्वप्नप्रकाशाऽऽतुरः ।।४४६।।
'पूर्वं यो गजघोटकैर्नृपसमो गच्छंश्च मार्गे समं
वाद्यैः पण्डितवृन्दसेवकयुतो दृष्टो विजेता बुधः ।
सोऽयं दिग्विजयी तु नग्नचरणः सामान्यलोकोपम-
श्चैकाकी द्रुतगो हि कुत्र नगरं प्रत्युन्मुखो गच्छति'? ।४४७।।
गच्छन्तं पथि तं तथातुरगतिं पश्यन्ति कौतूहला-
त्कैश्चिच्चानुगतः स पृच्छति शिशून् लक्ष्यं निमायीगृहम् ।
बालौघः पथदर्शको दिशति तद्गन्तव्यमस्यानुगो
गङ्गातः स्नपितं जलेन तुलसीसेवाश्रियं शिश्रिये ।।४४८।।
दृष्ट्वा चाऽभिमुखं विनीतवसनं सम्प्राप्तमेकाकिनं
धावित्वा सहसाऽतिथेर्विजयिनश्चक्रे गृही स्वागतम् ।
प्राप्तो दिग्विजयी पपात पदयोर्गौडप्रभोः पण्डितो
'हा हा मान्यगुरो! करोषि किमिदं पूज्योऽत्र पुत्रोपमे ।।४४९।।
कृत्वैवं मयि पापमर्पयसि किं, तद्देहि मे चाशिषो'
'दग्धस्याधिकतापनं न कुरु मे मानप्रतिष्ठाऽनले ।
लोकख्यातितृषातुरञ्च पतितं मामुद्धर त्वं प्रभो'!
धृत्वा तस्य करं प्रभुः स्ववसतेरन्तर्निनाय द्रुतम् ।।४५०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्सत्कृत्य गृही द्विजं वदति 'भोः! कस्मात्पदातिर्भवान्?
तत्रादेशगिराऽहमेव भवतः पार्श्वे स्वयं गन्तुकः ।
सम्प्राप्तो गृहपावनार्थमतिथिर्मानं प्रदातुं तथा
सौभाग्यात्सफलाऽद्य पण्डितवराद् विद्या, हि मे धन्यता' ।।४५१।।

मूको दिग्विजयी प्रभोस्तु वचनं श्रृण्वंश्च नम्रानन-
श्चोक्तस्तत्प्रभुणा 'पुनर्मम मनः पश्चात्तथा लज्जितम् ।
व्यर्थं धाष्ट्र्यवशान्मया गतदिने चोक्तं भवत्सन्निधौ
प्रायः स्माद्भवतः श्रुतं हि चपलश्चाहं प्रकृत्याऽधिकः ।।४५२।।

क्षन्तव्यं यदि मे मुखादनुचितं किञ्चित्तदा निर्गतं
ध्याने तिष्ठति नो कदापि वदतो ज्येष्ठः कनिष्ठस्तथा' ।
'वाणी मे वरदायिनी भगवती रात्रौ जगाद स्फुटं
तन्मोद्धारपथं द्रुतं वद विभो! नो वञ्चनीयोऽधिकम्' ।।४५३।।

'ज्ञातं मर्म तथा स्फुटं हि विदुषो वेदादिशास्त्रस्य तत्-
पृष्टोऽहञ्च निवेदयामि भवतः सम्मानदानात्मनः ।
कार्यं केवलबोधनं ननु नृणां लोके यतो वस्तुतः
प्रीतिः पादसरोजयोर्भगवतः स्यान्निश्चला हार्दिकी ।।४५४।।

यल्लोके भ्रमणं तथागजहयैः सार्धं जिगीषात्मनः
स्थाने शोभनमेव, तद्भगवतः प्राप्तौ न हेतुः परम् ।
सर्वस्मिन् क्षणभङ्गुरे हि जगतीख्यातेर्महत्त्वं कियत्
तत्प्राप्तिप्रथनं निरर्थकमतः प्रीतिर्हि काम्या प्रभोः ।।४५५।।

५१. पटुता विविधा विदुषां सिद्धा नहि तत्परमा प्रीतिः।

शास्त्राभ्यासाच्चिन्तनयोगाद्बुद्धिस्तीक्ष्णा विमला
गुरुकृपया निजसाधनया वै स्वगता नवप्रतीतिः ।
नानाभूतिविभूतिस्वादं व्यवसायी तल्लभते
लोकालोकमनःस्थितिभेदाद् व्यवसायः खलु भिन्नः
भुक्तिर्मुक्तिः प्रेमाभक्तिर्व्यवसायस्तच्छरणम् ।।

राज्ञो भर्तृहरेः समस्तजगतीसम्मानभोगादिभिः
सम्पन्नस्य धुरन्धरैर्बुधवरैर्नित्यं सभा मण्डिता ।
तस्माद् ज्ञातममुष्य दुःखभरितञ्चानित्यरूपं जगद्
ब्रूते (कांक्षति तत्कथं स्वयमहो) गीतानुभूतिर्हरेः ।।४५६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५२.वणिजां संसारापणकार्यं विनिमयचित्रविचित्रम्।
मायावितते ऽविद्याग्रस्ते भवबन्धापणमार्गे
विनिमयबहुला वणिजां वृत्तिर्निम्नोन्नतपरिवृत्तिः ।
प्रातः सायं दत्वा धृत्वा रात्रौ शेते शान्तः
दातुर्विस्मरणं भुवि, शिष्टं शरणस्मरणं धातुः' ।।

'एवं संसृतिरीतिपान्थहितकं कर्तव्यतत्त्वं दिश
स्थाने तद्वणिजां क्षणान्ननु घृणा जाता प्रपन्ने प्रभो'!
उक्त्या केशवशास्त्रिणः प्रभुमुखे हासच्छटासान्त्वना
'शास्त्रज्ञस्य रहस्यमत्र नहि, तज्जानासि सर्वं स्वयम् ।।४५७।।

तत्सौभाग्यकरक्षणस्तव यतो जाता प्रतिष्ठाऽरतिः
पुत्रे वित्तचये घृणा तु सरला, लोकैषणा दुस्त्यजा ।
तावत्ते महतामनन्तविषये त्यागोऽनुकम्पा हरे-
र्मन्ये तत्प्रभुलाभमुख्यकिरणं सेवाकथाऽऽस्वादनम्' ।।४५८।।

५३.चिन्तन! जीवनधनसंवरणे जीवानां भव मित्रम्।
वृत्तिः प्रमिती रीतिः प्रकृतिर्जीवचिन्तनं भ्रमयति
शास्त्रगीतवचनानुचिन्तनं लोकानामनुवृत्तिः ।
स्पृहाघृणागुणदोषचिन्तनाद् ह्रियते दुर्लभसमयः
आत्मधारणाप्रभुपदशरणं यच्छतु मानवसुलभम् ।।
'कर्तव्यं हरिसेवनामृतकथागङ्गारसाऽऽस्वादनं
ज्ञातं केवलमेतदेव जगतीकार्यं मया धीमताम् ।
जिज्ञासुर्भवतोऽधिकञ्च कृपया मां ब्रूहि बुद्धञ्च य-
च्छ्रीमद्भागवतप्रभुप्रतिकृतेर्माहात्म्यपद्यश्रुतेः' ।।४५९।।

श्रुत्वा भागवतस्य तत्प्रभुमुखान्माहात्म्यपद्यं स्मृति-
र्लब्धा केशवशास्त्रिणाऽर्जुनहृदा गीतासमाप्तौ यथा ।
पूर्वं तद्बहुशोऽमुनाऽस्य पठनं व्याख्यानगानं कृतं
स्पष्टं त्वद्य कथामहत्त्वरसनं ध्यातं प्रसादात्प्रभोः ।।४६०।।
'श्रीसेवाकथया तथा पिब रसं' गुञ्जन्ति शब्दाः श्रुतौ
धन्यस्तस्य तथोपदेशमवनीं लब्ध्वा गतश्चाज्ञया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वासस्थानमवाप्य तद्वितरितं सर्वं गजाश्वादिकं
त्यक्त्वा सङ्गिजनं, गतं प्रभुपदध्याने जनाऽगोचरम् ।।४६१।।

गौरप्रशंसनमतो जयिनो जयाद्वै
तद् 'वादिसिंह' पदवीं ददुरस्य तज्ज्ञाः ।
ख्यातिर्निमायिविदुषोऽधिकदूरदेशा-
ज्जग्राह पाठभवने बहुशिष्यवृन्दम् ।।४६२।।

सर्वप्रियो निमायी

५४. प्रियताऽऽकर्षति जीवं नियतं केषाञ्चिद् भगवन्तम् ।

इन्द्रियविषया जीवप्रियता निजकामाननुगच्छति
जीवालम्बितभगवत्प्रियता जीवानेवाश्रयते ।
आप्तकामकमनीयविग्रहादन्यन्न प्रियमस्मात्
हर्षामर्षविमुक्तसन्ततिप्रियता भगवत्प्रियता ।।

सौन्दर्यञ्च पवित्रता नहि बहिर्मूलं तयोश्चान्तरं
हृद्यः सर्वजनस्य शुद्धहृदयः कान्तां विनाऽप्याकृतिम् ।
अन्तर्निर्मलताऽऽकृतौ स्फुरति तन्मुग्धश्च वश्यो जनो
नैर्मल्यप्रियता ध्रुवं हि जनताकाम्या हृदः स्वच्छता ।।४६३।।

नैर्मल्यं स्फटिकोपमञ्च हृदये, कान्तिर्मनोहारिणी
देहे, यस्य नरः स देवतुलितो लोके ध्रुवं मोहकः ।
सर्वे तद्गुणरञ्जिताः सुहृदयाश्चात्मीयभावाकुलाः
सङ्कोचो विरतिस्ततो न, चपलस्तुष्टो हृदा यो भवेत् ।।४६४।।

म्लानं नाऽस्य मुखं कदापि ददृशे, हास्यस्मिताक्तं सदा
मित्रैः सार्धमसौ विनोदकुशलश्चापल्यबालाऽधिकः ।
अन्तःप्रीतियुताश्च नागरजना दृष्ट्वैव हृष्यन्ति तं
बालो नाद्य, परं पवित्रनदियाख्यातो महापण्डितः ।।४६५।।

शास्त्रार्थे जयिनो जयात्प्रतिभया सर्वत्र वङ्गावनौ
विख्यातस्य हि सन्निधौ च शतशश्चायान्ति शिष्या नवाः ।
सर्वैस्तैरपि हासयुक्तचरितश्चित्रं निमायी गुरुः
शिष्टाचारनियन्त्रको नहि तथा मित्रोपमो मोदते ।।४६६।।

द्वीपेऽसौ भ्रमति स्वतः प्रतिपथं हास्यं विधत्तेऽखिलै-
'र्गाम्भीर्यं हि दधातु पण्डित! शनै,र्बाल्यं सदा नोचितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri
'किं विद्वत्सु ममापि चास्ति गणना, ज्ञातं न मे तन्मनाक्
गाम्भीर्याध्ययने भवामि निरतो' वक्तुस्ततो मौनता ।।४६७।।

तद्द्वीपभ्रमणं ह्यतीवललितं द्रष्टुर्निमेषग्रहं
स्वर्णाभे ननु सुन्दरे वपुषि तत्सूक्ष्मं तदङ्गाम्बरम् ।
कृष्णप्रान्तसुधौतमध्यवसनं पीतोत्तरीयं तथा
ताम्बूलं वदनेऽस्य पुस्तकमहो वामे च यष्टिः परे ।।४६८।।

प्राज्ञस्य भ्रमणेऽस्य पञ्च दश वै सङ्गे च विद्यार्थिनः
पश्यन् याति पुनस्त्वितो ननु ततो मध्ये च मध्येऽचिरम् ।
विक्रेता वसनस्य पृच्छति पथि प्रत्यक्षमत्रस्थितं
'भो विद्वन्! यजमान! वाञ्छति कथं'? 'दत्तं ध्रुवं गृह्यते' ।।४६९।।

कश्चिच्चापणिकोऽस्य हास्यवचनं मत्वा तटस्थोऽपरो
वस्त्रं किञ्च हठेन यच्छति 'न मे द्रव्यं परं गृह्यते ।
द्रव्याशा कुरु मा कदापि न कुतः क्रेता ऋणं वस्तुनो'
'भाग्यं मे व्यवसायवृद्धिरमुना गृह्णातु वस्त्राऽधिकम् ।।४७०।।

एतत्त्वं कुरु तस्य निर्धनवटोः कस्यापि देहाम्बरं'
प्राज्ञः स्वीकुरुते, कटाक्षवचनं धृष्टस्य वै कस्यचित् ।
'पार्श्वे नास्ति पणस्तथापि वसनं क्रेतुं कथं पण्डित'!
'द्रव्ये पार्श्वगते, कथं तव पुरः क्रेता यथेच्छं ततः' ।।४७१।।

गत्वा निर्धनतन्तुवायनिकटे ज्ञात्वा ततो मूल्यकं
'वस्त्राणां मम नास्ति मूल्यमधुना किं दास्यते तद्विना' ।
'नूनं प्राज्ञ! गृहाण, वस्तु भवतो' ब्रूतेऽधनः श्रद्धया
श्रुत्वा याति मृदस्तु सस्मितमुखो, गौरस्मितं तद्वरः ।।४७२।।

तन्मातामहचक्रवर्तिवसतौ चाभीरसंख्याऽधिका
ते दुग्धव्यवसायकर्मनिरतास्तत्र भ्रमन् यात्यसौ ।
ब्रूते 'मातुल! नाद्य दास्यसि पयो' यं कञ्चिदाभीरकं
नीतः सत्कृतितो गृहं, दधिपयःस्नेहार्पणं भाव्यते ।।४७३।।

तेषां साग्रहदत्तवस्तुरसनासङ्कोचभावग्रही
'चाम्लं ते दधि मातुलप्रियतमे! ब्रूते विनोदी स्त्रियम् ।
'स्यात्स्वाद्वल्पसितारसेन' गृहिणी काचित्सितायै द्रुतं
गत्वाऽऽयाति गुडेन सार्धमतिथिर्गृह्णाति विद्यार्थिभिः ।।४७४।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रायस्तत्परिहासभाजननराः साधुर्मृदुर्वैष्णवः
शुद्धाश्चापणिकाश्च, तेऽपि सरलाः कुर्वन्ति तद्रञ्जनम् ।
कश्चित्ताम्बूलिकः स्वभावमधुरो वात्सल्यभावप्रियः
पुत्रप्रीतियुतः परञ्च कलहो नित्यं तयोर्जायते ।।४७५।।

ताम्बूलं पणकं विनेच्छति सुहृद्, दत्ते न ताम्बूलिकः,
शीघ्रं खादति पाणिना स्वयमसौ प्रेमी स वै नन्दति ।
अन्यः श्रीधरनामभक्तपणिकः सद्वैष्णवो निर्धनो
रात्रिं व्याप्य करोति कीर्तनमसौ नाम्नां हरेरुच्चकैः ।।४७६।।

रात्रौ पश्यति तञ्च कीर्तनरतं लोको यदा बुध्यते
'भ्रातः! सम्प्रति पीडिता वयमहो ह्यस्माच्च वृद्धाद्भृशम् ।
क्रोशंश्च क्षणदाक्षणं नयति तत्स्वप्तुं न दत्ते क्षणं
शेतेऽसौ तु कदा, दिनाऽऽपणगतो रात्रिप्रियाऽऽक्रोशनः' ।।४७७।।

अन्योन्यं वदताञ्च कोऽपि निकटे गत्वा च जल्पत्यमुं
'बाबा! नो बधिरस्तथाहि भगवान् तत्तं भज त्वं शनैः' ।
'यूयं कार्यरता दिवा, स्वरसनायोगा न तत्कीर्तने
रात्रौ तच्छ्रवणाच्च वः श्रुतिफलं, नाम्नां तथोच्चारणम्' ।।४७८।।

एवं वास्तवकीर्तनश्रियमसौ धत्ते धनश्रीधरो
रम्भापत्रतदीयकोमलतनू विक्रीय तुष्टो गृही ।
रम्भास्तम्भमृदुत्वचश्च पचनं वङ्गे प्रियं व्यञ्जनं
तेन श्रीधरसङ्गहासरसिको नित्यं निमायी प्रभुः ।।४७९।।

स्पृष्ट्वा पृच्छति मूल्यकं कदलिकाखण्डस्य तत्तन्मुखा-
च्छ्रुत्वा श्रीधरभाषितद्विगुणितं दातुं निमायीहठः ।
'सत्यं पण्डित! रोचते नहि हठस्ते दैनिको मेऽधिकं
यो दत्ते च गृहाण तत्र, कलहे लाभस्तथा नावयोः' ।।४८०।।

'खण्डं मे त्वधिकं प्रियं तव, परं देहि ब्रुवे त्वं तथा'
'प्रौढिं त्वं ह्यधुना गतः, श्रृणु वचः, श्लाध्यः समो विक्रयी ।
अन्योऽपीच्छति ते समं यदि? ततो यच्छामि मूल्यं विना'
'किं वक्तव्यमतोऽधिकं प्रियतरं तन्मे' स्मितेनोक्तवान् ।।४८१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'पूजां त्वं न करोषि मे प्रतिदिनं मेऽपि प्रदेहि स्रजं
श्रीगङ्गाकुसुमं सुरस्रज''महो! कस्माच्च तुभ्यं ददे'?
'मत्तः कोऽपि वरो न, पादशुचिता गङ्गा हि जानीहि मे'
'हा! धिक् पण्डित! ते मुखादघवचो विप्रश्रियं बिभ्रतः'? ।४८२।।

भक्तः सोऽयमनन्यगौरगुणितः कालान्तरे श्रीधरः
स्वीचक्रे च तमीश्वरं स्ववचने चक्रेऽनुतापं तथा ।
स्नेहाधिक्यमपि प्रभोः श्रियि धरे, रम्भातनुः श्रीधरी,
गौरः श्रीकदलीप्रियः, फलमतो गौराङ्गभक्तप्रिया।।४८३।।

अद्वैतस्य सखा निमायिजनकस्निग्धञ्च मित्रं सुधीः
श्रीवासः, पथि चैकदा दृशिगतौ गौरस्य तद्गच्छतः ।
पत्नी तस्य च मालती, स्वसुतवद्गौरं हृदा ध्यायतः
श्रद्धेयौ स ननाम तौ, विनयिनो ज्येष्ठौ हि नम्यौ सदा।।४८४।।

श्रीवासश्च जगाद वत्सलतया चाशीर्वचःपूर्वकं
'गौर! त्वं नहि बालकश्चपलता नो शोभते तेऽधुना ।
एवं नोचितमस्ति ते मतिमतश्चोच्छृङ्खलं जीवनं
ग्राह्या तेऽल्पमपीह वैष्णवपितुर्बालस्य भक्तक्रिया'।।४८५।।

ऊचेऽसौ सहजं 'दिनं कतिपयं कार्यं तथा साम्प्रतं
ह्युन्मुक्ताचरणं पुनश्च भविता मे वैष्णवत्वं दृढम् ।
तज्जाते मम वैष्णवस्य निकटे का वैष्णवानां कथा
सोऽप्याहूत इवागमिष्यति तथा भूयः स्वयं श्रीहरिः' ।४८६।।
'अग्रे तच्च कदा? ततोऽल्पमपि ते भाव्याऽधुनैव क्रिया,
देवी वा ननु देवता, हृदि रतिः कुत्रास्ति ते वास्तवम्' ।
'श्रद्धेया कृपया वद त्वमधुना का देवता वस्तुतः'
'श्रद्धा ते च यथाऽर्चनं कुरु तथाऽवश्यं हि नाम स्मर'।।४८७।।
'सोऽहं,' 'ब्रह्म तथाऽहमस्मि' वचनैः कोपायते वैष्णवो
गौरो वेत्ति, ततो जगाद तरसा श्रीवासखेदार्थकम् ।
'श्रद्धा मे ह्यधुना यथा हृदि महावेदान्तवाक्ये तथा
'सोऽहं', कस्य हि पूजनञ्च जपनं नाम्नस्तथा त्वं वद'।।४८८।।
श्रुत्वा तच्च पिधाय स श्रुतियुगं वासो जगाद द्रुतं
'नेयं वैष्णवपुत्रपण्डितमुखाद् वार्तोचिता निर्गता ।
बाल्यं तिष्ठति तेऽधुनापि' वदतः श्रुत्वा वदन् निर्ययौ
'नूनं वैष्णवता तथा मम पथे सर्वोऽनुगन्ता भवान्'।।४८९।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हास्ये चोक्तमनेन किन्तु सुमतिर्वासस्तथाऽऽशान्वितो
मेधावी निखिलप्रियो बुधवरो गौरश्च यद्वैष्णवो ।
सद्धर्मध्वजशोभिता च धरणी भक्ताः सनाथास्तत-
स्तत्कुर्वन् मनसा प्रति त्रिपथगातीरं सभार्यो ययौ।।४६०।।

श्रीवासपण्डितमनः फलितं हि काले
गौराङ्गवैष्णवयशो धरणीप्रशस्तम्।
देशे न केवलमथापि तथा विदेशे
भागीरथी प्रवहिता नु निमायिभक्तिः।।४६१।।

श्रीविष्णुप्रिया–परिणयः

५५. त्राणं सकुलं सुलभं गृहिणां लोकोत्तरन्तु सकलम्।

रूपवती सभ्या प्रियवचना प्रेममयी च कुलीना
प्रियानुकूला साध्वी वनिता लोके भाग्याधीना ।
भूमिविकासः कुलस्वरूपं सन्ततिलाभात्सुलभम्
कलं–मनोज्ञं त्राणं गृहिणां लोकपरञ्च कलत्रम् ।।

लोके शून्यगृहं विना कुलवधूं मातुश्च तस्या ध्रुवं
स्वर्लोकञ्च गता भवेद् गुणवती लक्ष्मीसमा यद्वधूः ।
एकाकी तरुणः परञ्च विधुरः ख्यातः सुतः पण्डितो
यद्गेहे ननु तं विलोक्य जननी जीवन्मृता लक्ष्यते।।४६२।।

अश्रुक्लिन्नमुखी तथा भवति सा दृष्ट्वा कराभ्यां स्वयं
गेहे कार्यरतं पुनश्च तरुणं भार्याविहीनं सुतम्।
एवं सा जननी शची च विकला म्लाना हि लक्ष्मीं विना
तद्दृष्ट्वैव सुतञ्च रोदिति परं ज्ञात्वाऽपि मौनी सुतः।।४६३।।

कन्या काऽपि हि सुन्दरी गुणवती सौम्या च गौरोचिता
प्राप्ता स्यादिति चिन्तनञ्च जननीचित्ते सदा विद्यते।
उद्वाहेन तया सुतस्य विधिना शीघ्रं द्वितीयेन तद्
गेहं पूर्वसमं पुनश्च ललितं स्याद्वै वधूशोभितम्।।४६४।।

माता गाङ्गतटे गता प्रतिदिनं स्नानाय तत्रागता
यावत्यो द्विजकन्यका लघुदृशा ताः पश्यति ध्यानतः।
वध्वन्वेषणदत्तदृष्टिजननी योग्यासु कन्यासु सा
कन्यैकां सरलां सुशीलचरितां प्राप्नोति गङ्गागताम्।।४६५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्नानस्यावसरेऽथवाऽर्चनविधौ मार्गेऽथवा नित्यशः
कन्यां पश्यति तां शची, द्विजसुता वृद्धां नमत्यास्थया।
'कन्यायै ननु मे ददातु भगवान् योग्यं कुलीनं वरं'
वृद्धाशीस्त्रपिता हृदा च मुदिता कन्या गृहं गच्छति।।४९६।।

एकस्मिन् दिवसे तु पृच्छति शची 'वत्सेऽभिधा किञ्च ते'
कन्याऽधोनयना जगाद शनकै'र्विष्णुप्रियेति' ह्रिया।
श्रुत्वोवाच शची प्रसन्नहृदया 'विष्णुप्रिया' सुन्दरी
संज्ञा, शीलवपुःस्वभावसदृशी, 'किं नाम वत्से! पितुः'? ।४९७।।

श्रुत्वा प्रश्नमिमं स्थिता प्रतिवचो विष्णुप्रिया नो ददौ
वृद्धा लालनपूर्वकं 'वद सुते!' ह्यूचे पुनः साग्रहम्।
मन्दं शंसति 'राजपण्डितसुता' व्रीडाऽऽनताङ्गा लता
'कन्या त्वं हि सनातनस्य सुधियो मिश्रस्य, तत्त्वं तथा।।४९८।।

एवं त्वं ननु राजपण्डितसुता धीरा गभीरा ततः
शीघ्रं नोक्तवती सुते! परिचयं, किं नास्ति सत्यं तथा' ?
तस्थौ शान्तमुखी तथैव सुमुखी विष्णुप्रिया जिह्रती
माता तां मुदिता विसर्जितवती पृष्ट्वा तथाऽन्यान्यपि।।४९९।।

सौन्दर्यं प्रकृतिः शचीमनसि तद्विष्णुप्रियायास्तथा
चक्रे स्थानमतश्च कल्पितवती दैवाद्वधूः सा भवेत्।
दृष्ट्या सस्पृहया करोति पुलिने वार्ताञ्च नित्यं तया
भक्तिर्विष्णुगता विमोहितवती विष्णुप्रियायाः शचीम्।।५००।।

लावण्यञ्च विलक्षणं मधुरिमा शीलस्य लोकोत्तरः
कन्याया वशगां तथाविधिवशाच्चक्रे शचीं वत्सलाम्।
तस्मात्तामधिकाधिकं सुहृदया सम्भाषते स्नेहतः
श्रद्धाभक्तिनदी शचीविषयिणी जज्ञे प्रियायास्तथा।।५०१।।

माता चिन्तयते पुनः पुनरपि ज्ञातव्यमेतन्मया
का हानिर्घटकप्रयोगविधिना कन्यापितुर्हार्दिकम्।
श्रीमिश्रो हि सनातनश्च धनिको लब्धप्रतिष्ठो जनः
सम्बन्धं दुहितुः कथं हि विधवापुत्रेण कर्ता ननु?।।५०२।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धा सा हि तथा विचिन्त्य मनसा त्रस्ता निरुत्साहिता
किञ्चाहूतवती शची तु घटकं काशीसनाथद्विजम् ।
माता पृच्छति 'किं सनातनसुता दृष्टा त्वया मिश्रजी!'
'दृष्टा शीलवती तथा गुणवती विष्णुप्रिया कन्यका।।५०३।।

(जानेऽहं खलु) राजपण्डितसुता गौरोचिता सर्वथा
लब्ध्वा पुत्रवधूं सनातनसुतां तत्ते प्रमोदो ध्रुवम्' ।
'सत्यं, किन्तु स राजपण्डितधनी, कर्ता न वा संशयो
ह्यस्मान् वेत्सि, परं तथाऽन्नवसनाऽभावं न भोक्त्री वधूः'।।५०४।।

ऊचे तद्घटकस्तथादृढतया 'किञ्चात्थ मातस्तथा,
जामाता हि निमायितुल्यसुमतिः ख्यातस्तथा पण्डितः ।
सौभाग्यान्ननु लभ्यते च दुहितुर्नो मंस्यते कः पिता,
स्वीकर्ता नियतं सनातनपिता विष्णुप्रियाया मुदा।।५०५।।

अद्यैवाहमतः सनातनगृहे गन्ता च तस्योत्तरं
सायं ते लपिता' प्रणम्य जननीं काशीद्विजस्तद्गतः ।
श्रीमिश्रोऽपि सनातनो बहुदिनैः संकल्पनाभावित-
श्चासी'त्तद् बहुशोभनं यदि सुतागौराङ्गयोगो भवेत्'।।५०६।।

सङ्कोचोऽस्य मनस्यपि प्रविततं 'वङ्गे प्रतिष्ठान्वितं
पाण्डित्यं ह्यधुना तथाऽल्पवयसि ख्यातञ्च गौरस्य तत् ।
स्वीकर्ता यदि नो, ततो ह्यपयशो मानस्य हानिर्ध्रुवं'
ब्रूतेऽसौ प्रकटं जने नहि ततो, मानी च्युतेस्त्र्यस्यति।।५०७।।

एवं मिश्रसनातनस्य हृदये भावोदयस्यान्तरे
काशीनाथशचीनिसृष्टघटकः प्राप्तोऽस्य पार्श्वे द्विजः ।
तं सत्कृत्य मुदा च पृच्छति गृही तत्रागतेः कारणं,
वृत्तान्तं निखिलं जगाद घटकः सारं तथान्ते स्फुटम्।।५०८।।

'प्रस्तावं स्वयमेव मामकथयच्चाहूय माता शची
गौराङ्गादधिकः सुतोचितवरस्तेऽहं ब्रुवे दुर्लभः'।
प्रस्तावं घटकान्निशम्य मुदितः प्रोवाच कन्यापिता
'ख्यातः सम्प्रति पण्डितोऽस्ति नदियावङ्गे निमायी युवा।।५०९।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वत्राऽस्य यशश्च वेद्मि, परमं सौभाग्यमत्र ध्रुवं
जामाताऽस्तु निमायिपण्डितवरो मेऽप्यस्ति वाञ्छा चिरात् ।
नोक्तं किन्तु मया कदापि मुखतः कस्यापि सङ्कोचतः
स्वीकर्ता किमसौ न वेति घटक! प्राज्ञः स्वतन्त्रो जनः' ।।५१० ।।

'चिन्ता माऽस्तु परं यदीच्छति शची देवी तथा भाविनी
नो कर्ता किमपीह गौरविबुधो मातुर्विरुद्धं ध्रुवम्' ।
प्रस्तावश्रवणात्सनातनगृहे स्त्रीणां प्रमोदोऽधिकः
कन्याभाग्यशशी स्फुटं समुदितो, वार्ता तथान्तःपुरे ।।५११ ।।

'गङ्गास्नानमुरारिपूजनफलं सर्वांशतश्चानया
लब्धं श्रीपतितुल्यसुन्दरवरप्रस्तावरूपं ध्रुवम्' ।
गत्वा कापि तथा जगाद वचनं विष्णुप्रियासन्निधौ
ह्रीणा तच्छ्रवणात्परञ्च हृदये हृष्टा हि विष्णुप्रिया ।।५१२ ।।

श्रीमिश्रस्य सनातनस्य भवनाच्चादाय तत्स्वीकृतिं
तद्व्व्राज महाशयश्च घटकोऽवक्रं शचीसन्निधिम् ।
संवादेन शुभेन तत्र मुदिताञ्चक्रे शचीमातरं
सार्धञ्चापि विवाहमङ्गलविधेस्तिथ्यादिकं सुस्थिरम् ।।५१३ ।।

कृत्वा तद्घटकः सनातनगृहाद् वैवाहिकं निश्चय-
ञ्चाऽऽगच्छन् पथि लोकितस्तु सहसा गौरेण चालिङ्गितः ।
'आगन्ता हि कुतः, सदा घटयसि, ब्रूष्वाद्य को घट्टित'-
'श्चक्रे नो घटनं, परञ्च भवतश्चेच्छामि वर्धापनम्' ।।५१४ ।।

आश्चर्यं गणयन् जगाद'वदतु स्पष्टं कथं वर्धनं'?
दीर्घोच्चारणपूर्वकं दृढतया काशीद्विजश्चोक्तवान् ।
'आगन्ता ननु राजपण्डितसुतासम्बद्धवैवाहिकं
वार्तानिश्चयनं विधाय भवतः, किञ्चानुमन्ता भवान्'? ।।५१५ ।।

उच्चैस्तच्छ्रवणाज्जहास 'हहहा! किं मे विवाहस्तथा
प्रस्तावो ननु राजपण्डितगृहे? जाने न', यातो हसन् ।
सन्दिग्धो घटकोऽस्य शुष्कहसनान्मन्दश्च तद्वार्तया
सार्धं तत्र सनातनस्य भवने व्याप्ता तथा म्लानता ।।५१६ ।।

'शङ्का या मनसि स्थिता परिणये पूर्वं, तथा व्यञ्जिता
ज्ञातञ्चैव पुरा हि मे प्रकृतितो गौरः स्वतंत्रो नरः ।
सम्बन्धं स कदाप्यनेन विधिना नो मंस्यते पण्डित-
स्तज्जातं किमपीह नो, मम तथा लोकोपहासः स्फुटम् ।।५१७ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौराङ्गेण च मे सुतापरिणयो भावीति सर्वे विदु-
स्तन्नो चेद्भवतीति मे च महती वार्ता हि लज्जाकरी' ।
एवं मिश्रसनातनश्च घटकञ्चाहूय सम्बोध्य तं
शीघ्रं प्रेरितवान् शचीं प्रति तथा ज्ञातुञ्च तन्निश्चयम् ।।५१८।।

गत्वा तत्र सनातनस्य घटकश्चिन्तां शचीमुक्तवान्
'गौरो मे वचनं सदैव मनुते नोक्तं मया तस्य तत् ।
पृष्ट्वा तं भवते वदामि नियतं विद्यालयादागतं
विश्वासोऽस्ति स मे ग्रहीष्यति वचो' मातुस्तथाऽऽश्वासनम् ।।५१९।।

अध्याप्यात्मसुते च पाठभवनात्प्राप्ते स्वगेहं, मुदा
सस्नेहं जननी तदैव विविधां वार्तां चकाराऽन्ततः ।
'गौर! प्रष्टुमहं (सुत! शृणु तथा) चेच्छामि वैवाहिकः
सम्बन्धश्च सनातनस्य, नहि किं ते सम्मतो वस्तुतः? ।५२०।।

नित्यं गाङ्गतटे मया गुणवती मिश्रात्मजा दृश्यते
श्रद्धाभक्तिमयी सुशीलचतुरा' विज्ञाय मातुर्मनः ।
'किं विद्यां तु (निमायिहार्दवचनं) यद्रोचते तत्कुरु'
श्रुत्वा सङ्कुचितं सुतोत्तरमिदं माताऽतुषद्वै शची ।।५२१।।

मातुस्तोषणहेतवे परिणयोद्योगाय सन्दिष्टवान्
श्रीमिश्रस्य सनातनस्य भवने दूतं निमायी स्वयम् ।
कन्याबन्धुजने पुनर्द्विगुणितश्चानन्दभावोदयः
सन्देशाच्च विवाहपर्वघटनञ्चारब्धमुल्लासतः ।।५२२।।

एवञ्चात्र निमायिपण्डितगृहे तावत्तथा सञ्चितं
द्रव्यं तन्नहि राजपण्डितसुतोद्वाहे यथापेक्षितम् ।
तच्चिन्ताग्रसितो मनाक्, परमिमां वार्ताञ्च वैवाहिकीं
ज्ञात्वा बन्धुजनास्तथा प्रमुदिता विद्यार्थिनः स्नेहिनः ।।५२३।।

प्राप्तास्ते क्रमशो निमायिनिकटे छात्रास्तथोचु'र्गुरो!
मिष्टान्नं वरयात्रिणां परिणये भोक्तुं ह्यवाप्स्यद्बहु ।
कन्यायाः खलु राजपण्डितपिता चाढ्यं विवाहोत्सवं
कर्ता, नो भविता प्रमोदनमत'श्छ्रुत्वाऽहसीत्तद्गुरुः ।।५२४।।

खामोपाधिकबुद्धिमन्तधनिकः ख्यातो हि राजोपमो
भूस्वामी निखिलाधिको जनपदे द्वीपे तदानीं नवे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्नेहस्तस्य निमायिपण्डितवरे शुद्धोऽधिकं विद्यते
तत्प्राज्ञस्य विवाहवृत्तमुदितः प्राप्तोऽस्य विद्यागृहे ।।५२५।।

गौराङ्गश्च मुकुन्दसञ्जयकृते श्रीचण्डिकामण्डपे
शास्त्राध्यापनकर्मठोऽस्य निकटे खाँ बुद्धिमांश्चातिथिः ।
स्थाने सञ्जयसत्कृतो वदति 'किं कर्ता विवाहं परं
सत्यं, पण्डितजी! तु राजदुहिता कान्ता (श्रुतं) स्वीकृता' ।।५२६।।

'यत्किञ्चिद्भवतः श्रुतिङ्गतमदः सत्यं तथैव ध्रुवं
वक्तुं कः प्रभवेन्मृषा तव पुरो' जिह्न् तथा चोक्तवान् ।
गौरोक्त्या मुदितो जगाद 'मधुरं भोज्यं ततो निश्चितं,
वोढाऽहन्तु विवाहभारमखिलञ्चैका मम प्रार्थना' ।।५२७।।

मध्ये चैव तु सञ्जयो वदति 'भोः! स्वामिंस्तु सर्वं त्वयि
न्यस्तं तर्हि वयं रसेन रहिता तन्मेऽपि भारं वद' ।
'स्वेच्छा तत्फलिता तवापि भवतु (प्रीतं नृपत्युत्तरं)
नायं भिक्षुकविप्रबन्धुविषयो विद्वद्विवाहोत्सवः ।।५२८।।

उद्वाहः खलु राजपण्डितसुतासङ्गेन भावी ततः
कार्यो राजकुमारतुल्यविदुषः कार्ये त्वयापि व्ययः' ।
एवं सर्वविवाहभारभरितौ चाढ्यौ जनौ स्वेच्छया
तच्चिन्तारहितः क्रियान्तररतश्छात्रैर्निमायी स्वयम् ।।५२९।।

सर्वे चात्र निमंत्रिताः परिणये प्राज्ञा नवद्वीपगा
नैकः पण्डितमण्डलीगतसुधीः, पत्रं न यः प्राप्तवान् ।
सर्वं शोभननृत्यवाद्यललितं सज्जाप्रबन्धं तथा
सस्नेहं धनिकद्वयं सुमनसश्चक्रे विवाहोचितम् ।।५३०।।

पार्श्वे चामरशोभितश्च शिबिकारूढो वरः सज्जितो
वाद्यैर्माङ्गलिकैः सुनादितपथो लोकोत्तरः पण्डितः ।
स्निग्धैः पण्डितबान्धवैः सुहृदयैः सद्भिश्च विद्यार्थिभिः
सार्धं तैर्वरयात्रिभिः शुभतिथौ यातो विवाहोद्यतः ।।५३१।।

प्राप्तः प्राज्ञवरः सनातनगृहद्वारे समारोहतः
सम्मानेन यथोचितञ्च गृहिणा प्रेम्णा हृदा सत्कृतः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वेषाञ्च निवासभोजनमनोमोदव्यवस्था यथा
भूम्ना प्रीतिकरी तथा वरनृणां प्रीताश्च सत्कारकाः ।।५३२।।

ब्रह्मस्वस्त्ययने श्रुतिज्ञहवने गोधूलिवेलाशुभे
लग्ने वै जगृहे निमायिविबुधो विष्णुप्रियायाः करम् ।
कृत्यं लौकिकवैदिकं ह्युभयतः पूर्णं विवाहेन तौ
कन्याऽऽत्मार्पणया प्रिया च दयितो वामाङ्गदो दम्पती ।।५३३।।

वस्त्राभूषणसम्पदं बहुविधां पुत्रीविवाहोत्सवे
सम्मानोपहृतौ सनातनपिता कन्यावराभ्यां ददौ ।
एवं सर्वविवाहमङ्गलविधिः प्रीत्या समाप्तो यतः
सत्यं, विष्णुरयं प्रियो भुवि कृतो विष्णुप्रियावामया ।।५३४।।

सर्वेषां विदुषां सनातनगृही मध्येसभं सत्क्रियां
पूजाद्रव्ययथोचिताचरणतश्चक्रे परस्मिन् दिने ।
श्रीगौरोऽभिनवस्तृतीयदिवसे विष्णुप्रिया सा वधूः
सम्प्राप्तौ नवदम्पती च शिबिकारूढौ स्वगेहं ततः ।।५३५।।

कन्यां यां जननी शची निजवधूं कर्तुं चिरादुत्सुका
लब्ध्वा तां सुतसंयुतां स्ववसतौ हर्षाब्धिमग्ना सती ।
दृष्ट्वा तौ नवदम्पती प्रियतमौ मातुः सुखं तत्तथा
सम्मुग्धौ मुदितौ प्रियाबुधवरौ ह्यन्योन्यसंयोगतः ।।५३६।।

द्वाराऽऽघातात्प्रथमचरणे, मुग्धविष्णुप्रियाया
दृष्टं रक्तं, तदपशकुनत्रस्तचित्तं मनाक् तत् ।
प्रायो लोकैः प्रकृतिजनिता विस्मृतिः साध्यते या
सिद्धिः पत्यौ यतिवरपथे साधिकासंस्मृतिः सा ।।५३७।।

प्रकृति– परिवर्तनम्

५६. लोकाऽतिक्रमणं खलु सहजं नहि प्रकृतेरतिवृत्तिः ।
परपीडनमिह सहजं दृश्यं बलिनां निर्बलभक्ष्यम्
ज्येष्ठातिक्रमबालचापलं वाक्पटुता ननु गुणिता ।
हार्दिकबौद्धिकमानसवृत्तिर्नरवानरसमतुलिता
कश्चित्तामतिवृत्य वर्तते यस्मान्नरता धन्या ।।

अग्रे तत्परिवर्तते प्रकृतितो बाल्यस्वभावो नृणां
तारुण्ये परिवर्तनं तु कठिनं रुढे स्वभावे तथा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रौढञ्चात्र वयो यथा भवति तद्भावे तथा प्रौढता
तद्भावानुसृतो गुणः खलु नृणां स्वाभाविको दुर्जयः ।।५३८।।

केषाञ्चित्परिवर्तनञ्च बहुधा लोके विलोमं, क्षणा-
द्विख्यातो विषयी महान् भुवि तथा सद्वैष्णवो जायते ।
दुष्कर्मी प्रथितिं गतः समयतः सिद्धो नरैः पूज्यते
किन्त्वेतन्नहि सर्वलोकविषयं ते केऽपि दिव्या नराः ।।५३९।।

लोकानां प्रकृतिर्विचारसरणीद्वारा विभाति स्फुटं
तद्देहे हृदये तथान्तरमिह स्पष्टं स्वभावानुगम् ।
अङ्गोपाङ्गतिः स्वभावपदवीं धृत्वा क्रमात्कल्पते
प्रायस्तत्परिवर्तनं भुवि सतो रोगो नरैः कथ्यते ।।५४०।।

संसारे प्रकृतेः परे विलसतः सत्त्वे विशुद्धे सतो
देहो भूतमयो न तिष्ठति चिरस्थायी नरस्य ध्रुवम् ।
स्थायित्वे वपुषो रजोगुणकृता चापेक्षिताऽहंकृति-
र्लोके प्राकृतिकी, ततोऽल्पवयसा गच्छन्ति ते ज्ञानिनः ।।५४१।।

आचार्यो भुवि शङ्करोऽल्पवयसो ज्ञानेश्वरो ज्ञानिषु
श्रीरामो ननु भावुकाश्च परमाश्चैतन्यबन्ध्वादयः ।
उच्चस्थाः प्रकृतेः परं भगवतो भक्तास्तथा प्रेमिणो
देहं भौतिकमत्र दीर्घसमयं शेकुर्न वै रक्षितुम् ।।५४२।।

सत्संकल्पतया परं कतिपये लोके महामानवाः
कञ्चित्कालमवन्ति देहमवनीश्रेयो विधातुं तथा ।
ज्ञानांशे ह्यधिके च तेषु नियतं कर्तुं तथा ते क्षमाः
संकल्पो नहि युज्यते परमयं भावोन्नतावस्थितौ ।।५४३।।

देहः किन्तु हि निर्बलो न सहते चाकस्मिकं हार्दिकं
नूनं भावुकतोदयं प्रबलितं तद्वेगतः शाम्यति ।
सोढुं चेत्क्षमते न कर्मकुशलो नूनं स मत्तायते
यद्द्वारा भगवान् यदीच्छति जगच्छ्रेयः स वेगक्षमी ।।५४४।।

देहे किन्तु तथांशिकः प्रकृतितस्तस्य प्रभावः परं
सोढुं यः क्षमतेऽस्य वातजनितो रोगोऽतिसारस्तथा ।
भावस्योपशमस्तदन्यविधिना शक्यो न वै चान्यथा
संसारी बहुधा निजोत्तरवयोग्रस्तोऽमुना जायते ।।५४५।।

येषां भावुकतोदयस्य बलतो रोगद्वयोद्भावना
तेषाञ्चायुषि नास्ति कालनियमस्तत्पूर्वमप्युद्गतिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रोगोऽयं नहि भावुकेऽन्यजनतातुल्यो यथार्थस्तथा
रोगाभाससमस्तु भावशमनाद्रोगः स्वयं शाम्यति ।।५४६ ।।

उद्वेगो ननु रामकृष्णपरमे जातः परं यौवने
मस्तिष्कामयमाह वातमथवा वीर्यस्य चोन्मादनम् ।
तं बाबूमथुरा चिकित्सकगिरा निन्ये तु वेश्यालये
तद्बालोपमखेलदर्शनफलं नोन्मादवातामयः ।।५४७ ।।

तद्वर्षाण्यतिसारकष्टमधिकञ्चासीत्तथा भीषणं
भावं दिव्यमथाऽत्र तस्य बुबुधे चैका परं ब्राह्मणी ।
अन्येऽप्यस्य विदुर्हि भावपरमं पश्चाच्च भक्ता जना
रोगो वातज एव वैद्यकथनञ्चान्तं तु यावत्तथा ।।५४८ ।।

वैद्यस्य प्रतिषेधनं ह्यतितरां तस्यातिवार्ताकृते
देहं केवललोककारणमसौ कृत्वा तथासीत्स्थिरम् ।
जाते वैद्यनिषेधनेऽप्यविरतञ्चासीद्ब्रुवन् सर्वदा
तत्कण्ठव्रणपीडितो हि विजहौ मासैस्तनुं नश्वराम् ।।५४९ ।।

कण्ठे वैद्यमतें व्रणोऽतिवदनाज्जातो विकारस्ततः
कष्टं तस्य महत्तदल्पपयसः पानेऽपि कण्ठव्रणात् ।
भक्तानामुपदेशनञ्च सततं तस्यां दशायामपि
'स्थैर्यं नास्य, परं हि लोकमननं' लोकातिगं तद्वचः ।।५५० ।।

गौराङ्गे परिवर्तनस्य समयः प्राप्तोऽधुना भावतो
देहोऽमुष्य यथा तथैव हृदयं शक्तः परं भावुकम् ।
शक्यं भावुकतोद्गमस्य सहनं पूर्णस्य नो वस्तुतो
भावोऽस्य क्रमशस्तथा विकसितश्चाब्धौ विलीनोऽन्ततः ।। ५५१ ।।

गौराङ्गोपमभावदीपनमहो लोके महामानवे
नान्यस्मिन् प्रकटं तथा सहृदयैर्गौरे यथा स्वादितम् ।
गौरप्रेमनिरूपणञ्च कविभिस्तात्कालिकैश्चेष्टितं
तल्लोकोत्तरभाववर्णनपटुर्भूमौ न भाषा परम् ।। ५५२ ।।

एकस्मिन् दिवसे चलंश्च सहसा मार्गे निमायी सुधीः
क्षिप्त्वा तद्भुवि पुस्तकं स्वकरतो गेहं दधाव द्रुतम् ।
भीतास्तत्पथिकास्तदास्य विकृतं रूपं विलोक्याद्भुतं
भाण्डं सर्वमसौ बिभेद गृहगः प्रक्षिप्य तच्चाङ्गणे ।।५५३ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्तब्धा पश्यति तस्य कर्म जननी रोद्धुं न तत्साहसं
चक्रे नो गृहवस्तुमोहममतां गौरो बभञ्जाऽखिलम् ।
मात्रा ते प्रतिवेशिनश्च गदिताश्चागत्य तैश्चेष्टितं
रोद्धुं, किन्तु च हन्तुमुद्यतममुं दृष्ट्वा निरुत्साहिभिः ।।५५४।।

गौरः कृच्छ्रतया निवार्य शयने लोकैस्ततः शायितः
स्निग्धैर्बन्धुजनैस्तथा परिवृतो विद्यार्थिभिः पण्डितः ।
ब्रूते मत्तसमो जनान् 'हरिरहं साक्षाच्च मां पूजय
श्रीकृष्णं भज सर्वदा, तदभिधा सारोऽत्र वै केवलम्' ।।५५५।।

लोकानामनुमानमत्र विविधं जातं तदास्य स्थितौ
भूतव्याधिरयं, चकार किमपि द्राक् डाकिनी शाकिनी ।
मस्तिष्कं विकृतं, दिनं प्रवदतो विद्यार्थिभिः कुर्वतः
शास्त्रार्थः फलितः प्रमत्तदशया, दृष्टो न शान्तो युवा ।।५५६।।

रोगो वायुकृतश्चिकित्सकमतं ज्ञात्वा च वार्तामिमां
सर्वे सञ्जयबुद्धिमन्तधनिका वैद्यैः समं सज्जनाः ।
धावन्तो विकला निमायिगृहकं प्राप्ता द्रुतं स्नेहिनो
भैषज्यं बहुमूल्यकं ननु गृहे तेषां सदा सञ्चितम् ।।५५७।।

श्रीनारायणविष्णुतैलमधिकं गन्धाढ्यमूल्याङ्कितं
शीघ्रं वैद्यमतेन गौरशिरसि स्निग्धं घनं लेपितम् ।
स्वस्थोऽयं दिवसैस्तथोपचरितस्तैलैस्तथान्यद्रवै-
र्दृष्ट्वाऽध्यापनगामिनञ्च शनकैः प्रीतास्तथा प्रेमिणः ।।५५८।।

जातञ्चांशिकमन्तरं प्रचलिते गौरस्वभावेऽधुना
त्यक्तं वैष्णवसाधुलोकमनसोः पूर्वोपमं खेदनम् ।
प्रीतास्ते कथयन्ति वैष्णवजना लब्ध्वा गभीरं बुधं
'सौभाग्यान्महती कृपा भगवतः स्वस्थो भवान् दृश्यते ।।५५९।।

देहो नश्वरभङ्गुरः प्रतिपलं श्रीकृष्णसङ्कीर्तनं
कार्यं स्वल्पतयापि, नोचितमिदञ्चैवं वयोयापनम्' ।
स्वीकुर्वन्निखिलं जनस्य कथनं नत्वा बुधो लक्षितो
लोके तस्य, विशिष्य वैष्णवजने तद्भाववृत्त्या मुदः ।।५६०।।

नित्यं वन्दनपूजने तुलसिकाविष्ण्वोश्च सन्ध्यादिकं
कृत्वाऽध्यापनहेतवे तमधुना विद्यालयं यात्यसौ ।।
गौराङ्गो मुदितस्तथा भवति तैश्छात्रैः सदाचारिभिः
प्रष्टाऽसौ तिलकेन शून्यशिरसश्छात्रस्य नूत्नो गुरुः ।।५६१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'सन्ध्यावन्दनमद्य नूनममुना विद्यार्थिना नो कृतं'
ब्रूते चाऽतिलकं विलक्ष्य निखिलान् सम्बोध्य विद्यार्थिनः।
'पूर्वं गच्छ गृहं तथा सतिलकं सान्ध्यं विधायाऽधुना
पश्चात्पाठगृहागतः पठ' गुरुप्रीतिः सदाचारिषु ।।५६२।।
'सर्वस्वं हि विलक्षणं द्विजसतां सन्ध्यार्चनं दैनिकं
सन्ध्यावन्दनकारकोऽपि नहि तद्विप्रः कथं कथ्यते?
दूरे सा परमार्थसिद्धिविषया लोकेऽपि तस्योन्नति-
र्नूनं सिध्यति नो, भुवो द्विजपतिश्छायाफली विद्रुमः' ।।५६३।।

५७.कालः कलयति सकलं लोकं, लोकः कालं भुङ्क्ते।
ऋतुभिर्मासैः पूर्णे वर्षे जडजङ्गमपरिवर्तः
तिथिनक्षत्रदिवससन्ध्याभिः पर्वोत्सवसुखमोदः ।
दिनकरगतिमनुकल्पितकाले प्रातः सायं सन्ध्ये
प्रतिसन्ध्याक्षणजीवनचिन्तनविप्रद्रुमजलसेकः ।।
'बालानां दिवसे न षष्टिघटिके सन्ध्याकृते चेद्रुचिः
सम्भाव्या कथमुन्नतिः प्रवयसाञ्चाग्रे गृहे सज्जताम्' ।
एवं वत्सलतानवीनगुरुतामास्वाद्य विद्यार्थिनः
सन्ध्यावन्दनपाविता नियमतो गौराऽनुरागप्रियाः ।।५६४।।
भावोऽयं हृदयेऽस्य भक्तिसरितः सङ्केतरूपोऽधुना
भावी चैव गयागदाधरपदाऽऽलोकात्प्रवाहोऽद्भुतः ।
सर्वप्राणिपवित्रताऽमृतमयो भूमौ नवद्वीपतो
गौरश्रीधररागसागररसाऽभेदोऽस्ति पुर्यां ततः ।।५६५।।
धारा प्रेमसुधा त्रितापशमनी भक्तेः पयोधौ गता
पुर्यामेव समापिता नहि परं चैतन्यवङ्गाद्रिजा ।
अद्याप्यस्ति हि भाविनी भगवतीभगीरथीसन्निभा
भूमौ स्थास्यति सर्वदा सुखशमस्वादा सतां प्रेमिणाम् ।।५६६।।

भक्तिस्रोतःप्लवस्य पूर्वम्

५८.प्रीतिः स्वात्मरतिर्जनतृप्तिर्लोके भगवद्भक्तिः।
अनासक्तितो ज्ञानी प्रकृतौ कर्मफलं परिमुञ्चति
कर्मठवृत्त्या योगी कुरुते जनसंग्रहभावनया ।
कर्मरहस्यं जगद्विरक्तिर्ज्ञानेऽसङ्गो वृत्तिः
कर्मसमाप्तिर्जगति विचित्रे भगवच्छरणापत्तिः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वर्गादित्रयलोकभोगफलनं कामद्रुमैः कर्मिणां
निष्कामक्रियया च मुक्तिसरणिर्भूमानवानां ध्रुवम् ।
साधूनां हृदयप्रधानपुरुषश्रद्धारतिः सङ्गतः
साध्यश्रीभगवद्गुणानुकथनप्रीतौ परं साधनम् ।।५६७।।

मस्तिष्कप्रथनप्रधानपुरुषो निष्कामकर्मप्रथा–
चेतःशुद्धियुतो विरक्तिविततो लोके मुमुक्षान्वितः ।
लब्ध्वा सद्गुरुसेवया हि विमलं ज्ञानं यतिर्मुच्यते
मुक्तिः केवलसाध्यवस्तु जगतो ज्ञानैकसाध्या सतः ।।५६८।।

तद्वर्णाश्रमकर्म चैव विहितं मुक्तेः परं कारणं
कर्तव्यं भवतीति तन्नियमतो यावन्न रागोदयः ।
रागो वास्तविकः समस्तविषयासङ्गस्तथा मानसः
शुद्धस्वात्मलयोऽथवाऽनुभवतो लीलां मुकुन्दाश्रयः ।।५६९।।

वैराग्यानुरती विना कथमहो ज्ञानी च भक्तो नरः
कर्तव्यस्य च कर्मणो नहि तथा त्यागोऽस्य तद्युज्यते ।
एकान्ते हृदयञ्च यस्य रमते भोगाद्विरक्तं तथा
प्रीतञ्चात्र मुकुन्ददिव्यकथया कर्माऽस्य चान्यन्न तत् ।।५७०।।

मुक्तः कोऽपि च जन्मतो भुवि तथा नित्यानुरागी नर–
श्चित्तं नो रमते हि तस्य विहिते स्थानेऽत्र कर्मण्यपि ।
दृष्टान्तः, सनकादिनारदशुका मुक्ताश्च भक्ताः स्वतो
ब्रह्मश्रीहरिनित्यभावभजनव्यक्त्या सदाचारिणः ।।५७१।।

प्रश्नोऽयं समुदेति, का खलु वरा मुक्तौ च भक्तौ द्वयो–
र्यस्मिन् यस्य मनस्तथा लगति वै, स्पष्टोत्तरं तद्वरम् ।
बुद्धया भावनया विचाररसने शक्तिप्रधानक्रिये
मस्तिष्कं हृदयं यथारुचिपथा ताभ्यां तथा श्लिष्यते ।।५७२।।

भक्तिः साधनमत्र साध्यपरमा मुक्तिर्वचो ज्ञानिनां
भक्तानां ननु किङ्करीति कथनञ्चात्यन्ततुच्छा हि सा ।
संवादोऽयमहो परस्परसमख्यातिर्न चापाततः
स्वाऽनन्यप्रियवस्तुनिष्ठचयनव्यक्तिस्तथा वस्तुतः ।।५७३।।

त्यागप्रेममयी विचाररसदा मुक्तिश्च भक्तिः परं
ज्ञानं त्यागनभस्तलं भगवती प्रेमावनी धारणा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वस्वं ह्यपहाय चात्मरमणं ज्ञानं पवित्रं परं
सर्वं विष्णुमयं न हेयमणुकं प्रेमाऽपि भक्तिप्रभम्।।५७४।।

तद्वस्तुद्वयमस्ति नो परमिदं पार्थक्यमत्र क्रिया-
भेदात्साधकमानसस्थितिकृता भिन्ना तथा साधना।
आसक्तित्यजनाच्च शान्तिपरमानन्दस्वरूपागमः
श्रौतस्मार्तपथा मुकुन्दभगवत्प्रेम्णा रसास्वादनम्।।५७५।।

चैतन्यस्य महाप्रभोर्हि चरितं भक्तिप्रधानाद्रिकं
यस्मात्प्रेमनदी च निर्मलजलानन्दा प्रवाहाऽऽग्रहा।
गन्धोदारसरोजभव्यसुषमा रागोर्मिभावाकुला
तद्धाराखगपक्षपातरहिता भाति क्षितौ भारती।।५७६।।

गौराङ्गस्य बुधस्य वै परिणये जाते द्वितीये गृहे
भार्या भर्तृपरायणा स्मितमुखी विष्णुप्रिया शोभते।
प्राज्ञो म्लानमनास्तथापि विरतश्चैकान्तमासेवते
त्यक्त्वा चञ्चलतां विशेषविकलः शून्यो हृदा लक्ष्यते।।५७७।।

नास्ते सम्प्रति तस्य पूर्वसदृशी संसारवार्तारति-
र्म्लानोऽभावविशेषकं त्वनुभवन् संलक्ष्यते सर्वदा।
दृष्टवा तस्य दशां ह्यपूर्वमलिनां स्नेही जनो दूयते
नोदी म्लायति चेत्ततोऽस्य जगतः, कः स्याद्विनोदी परः।।५७८।।

भावस्य प्रबलस्य यस्य हृदये भावी च भव्यागमो
नूनं स प्रियवस्तुलाभविकलश्चान्तर्बहिर्भ्राम्यति।
सन्मैत्रीमुदिता भवन्ति सरलास्तीर्थेषु सत्साधवः
सङ्गत्यै हृदये ततोऽस्य जनिता तीर्थाटनस्य स्पृहा।।५७९।।

वङ्गे धार्मिकभावना ननु नृणां शस्ता सकामक्रिया
प्रायः कामनयैव कर्म सकलं निष्पाद्यते कर्मठैः।
गार्हस्थ्ये पितृकर्म मुख्यविहितं देवार्चनापेक्षया
स्मार्तग्रन्थभरे, परं, सति गयाश्राद्धे, महत्त्वाधिकम्।।५८०।।

कर्तुं कर्म च भारतीयजनताः श्राद्धं गयायां ततो
गच्छन्ति प्रतिवर्षमस्य गृहिणां वङ्गे प्रचारोऽधिकः।
निष्कामः स्वपितुस्ततोऽत्र शरदि श्राद्धाय यातुं गयां
गौरो मानसशान्तये हि सुकृती कृत्याऽऽदरायोद्यतः।।५८१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५९. भूमौ श्रेष्ठो लोकस्तीर्थो रविगङ्गासमपूतः।
निर्लेपो धरणीतलमध्ये जनसंग्रहभावनया
ज्ञानालोकं सङ्गमशान्तिं वितरन् विलसति नित्यम्।
गूढधर्मकर्तव्यनिश्चये भ्रान्तः सज्जनपान्थः
श्रेष्ठचरितप्रमाणं कृत्वा स्वप्रमेयमधिगच्छति ।।

प्राप्ता चाश्विनशुक्लगा हि दशमी सिद्धिप्रदेयं तिथिः
श्रीरामेण कृता जयाय दिवसे यात्राऽत्र लङ्कोपरि।
आनन्दो हि गृहे गृहेऽत्र भवति प्रावृट्समाप्तिर्मता
वाणिज्याय जयाय वैश्यवणिजां राज्ञां तथेयं शुभा ।।५८२ ।।

चातुर्मास्यसमाप्तितोऽत्र यतिनो भूयो भ्रमन्ति क्षितौ
गेहाच्चात्र हि निःसरन्ति दिवसे तीर्थाटने मानवाः।
यास्यन्त्यत्र च शारदे ननु नवद्वीपाद् गयायां नराः
संयोगो भविता सुदेशसमयव्यक्तिस्थितीनां ततः ।।५८३ ।।
ऊचे श्रीयुतचन्द्रशेखरबुधो गौराङ्गमातृस्वसुः
स्वामी, स्वाभिमतं गयाविषयकं, गौरः प्रसन्नस्ततः ।
यातुं तत्कृतनिश्चयः स्वयमसौ संगृह्य यात्रोचितं
सम्भारं चलति स्म सार्धमितरैः स्निग्धैर्गयां शिष्यकैः ।।५८४ ।।
सानन्दं पथि कृष्णकीर्तनरतः प्रीत्या समं सङ्गिभि-
र्गच्छन् स व्यथया ज्वरस्य विकलो मन्दारनामस्थले ।
आर्तैस्तद्दशया बहूपचरितं शान्त्यै जनैर्बन्धुभि-
र्लाभस्तस्य न कोऽपि तत्स्वयमसौ तस्यौषधिञ्चोक्तवान् ।।५८५ ।।
'एतत्प्राकृतिकौषधिर्ज्वरशमः साध्यो न मे, केवलं
भैषज्यं भगवत्कृपा, भगवतः प्रीतिश्च विप्रार्चनात् ।
अग्निब्राह्मणकद्वयं निजमुखं प्रोक्तं स्वयं श्रीमता
स्थाने भागवते सनस्तुतिमिषाच्छ्रेष्ठं मुखं ब्राह्मणः' ।।५८६ ।।

६०. ब्राह्मण! तुष्टोऽर्पितनिजकर्मा भगवत्प्रीतिं यच्छसि।
पूतं देयं भगवद्भोज्यं तन्निर्मलमातनुषे
प्रतिकूलादपि तुष्टस्तिष्ठसि तस्याखिलप्रसादः ।
तव सन्तोषात्प्रकृतिः शान्ता तिष्ठति कालो नियमे
अखिले शास्त्रे लोके धर्मे ब्रह्मज्ञस्तत्पूज्यः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'साक्षाच्छ्रीभगवन्मुखोक्तमहिमश्रीब्राह्मणानां सतां
तत्पादोदकपानतो हि भविता रोगोपशान्तिश्च मे' ।
गौराङ्गस्य गुरोर्निशम्य वचनं छात्रस्तथैको मृदुः
'श्रीमन्तो गुरवो! ममास्ति विषये प्रश्नोऽत्र' तच्चोक्त्वान् ।।५८७।।

'सत्कार्यो ननु किं तथैव जगता स ब्रह्मबन्धुः सता,
लोके काष्ठगजेन किं चलति तत्कार्यं गजत्वाऽऽधृतम्?
यो वै ब्राह्मणवंशमात्रजनितो विद्याविहीनो नर-
श्चास्माभिर्निजधर्मकर्मरहितो मान्यः कथं ब्राह्मणः' ।।५८८।।

ऊचे तच्च विचिन्त्य पण्डितवरः श्रीमन्निमायी क्षणं
'स्थाने ते कथनं, स्वकर्मरहितः शून्यः स्वधर्मादपि ।
तस्मात्सिध्यति कोऽपि नोऽत्र जगति स्वार्थश्च सांसारिकः
सोऽयं तिष्ठति दुग्धदानविकला वन्ध्या यथा गौस्तथा ।।५८९।।

एवं सत्यपि यो न कर्म कुरुते सर्वं सकामं तथा
कर्ता स्वात्मविशोधनस्य सततं शास्त्राज्ञया श्रद्धया ।
ताटस्थ्यप्रकृतिः पराऽवगुणने मान्यस्तथाऽयं यतो
निर्दोषो नहि दोषदर्शनदृशा कोऽप्यत्र लोके तथा ।।५९०।।

संसारो गुणदोषमिश्रणकृतो गोसेवने नोचिता
बुद्धिः सङ्कुचिता, पयोऽधिकदुघा सेव्या हि सा केवलम् ।
दत्ते या न पयस्तयाऽलमिति, सा क्षुद्रा तथा भावना,
गोमात्रं ननु सेवनीयमखिलं शास्त्रप्रथाश्रद्धया ।।५९१।।

सौम्या दर्शनसुन्दरी च सुरभिर्दत्ते पयश्चाधिकं
सर्वैः सा खलु सेव्यते भुवि नरैः श्रद्धाविहीनैरपि ।
नाऽसौ श्रेष्ठविचारभावसरणिस्तत्पक्षपातं हृदा
त्यक्त्वा कर्मठमानवैर्हि निखिलाः सेव्याश्च गोब्राह्मणाः ।।५९२।।

संसारे लघुसंख्यको ननु तथाश्रद्धालुलोकः परं
कुर्वन्तं चरणप्रहारमुरसि क्रुद्धं महर्षिं भृगुम् ।
दीर्घं, नम्रतया जगाद भगवान् दुःखाधिकं व्यञ्जयन्
''कष्टं ब्राह्मणदेव! कोमलपदे वज्रोरसः स्पर्शनात्'' ।।५९३।।

६१. गानं गायकभावकविषयं भगवद्गीतं भिन्नम् ।

श्रीनारायणपदनखजातं गङ्गाजलमतिमधुरम्
वामनपदतलधारणजनिता बलिनतशिरसो गुरुता ।
माधवचरणकमलकोमलता भक्तास्वादनविषयः
ब्राह्मणभृगुपदकोमलगाने श्रीपतिरेव समर्थः ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावोऽयं वरसाधकस्य जगतो मानप्रतिष्ठाधन-
द्वारेच्छां विषयोपभोगविषयां त्यक्त्वा च यः सर्वथा ।
प्राप्तव्या भगवत्कृपैव चरमं लक्ष्यं निजे जीवने
मत्वा कर्म करोति तस्य भगवान् वश्यः स्वञ्चोक्तवान्' ।।५६४।।

६२. मोदो हृदये तस्य स्थायी निखिले चेत्तद्बुद्धिः।

कुप्यन्तं प्रति कोपोत्पत्तिः परबुद्धेर्न स्वत्वे
अपकर्तरि चाप्युपकारी सन् मनसो मोदं रक्षति ।
निखिले जन्तौ भगवद्बुद्धिः सर्वावस्थातुष्टः
सर्ववराऽवरवशगः पुरुषो भगवन्तं लाडयते ।।
'गत्वा देहि ततो द्रुतं मम मुखे चानीय पादोदकं
ग्रामस्यास्य हि कस्यचिद्द्विजपतेस्तद्ब्राह्मणस्यामृतम्' ।
आनिन्युर्गुरुवाक्यतश्च तरसा द्वित्राश्च विद्यार्थिनो
गत्वा विप्रविशुद्धवैष्णवपदे प्रक्षाल्य नीरौषधिम् ।।५६५।।
एवं विप्रमहत्त्वदर्शनपरा गौराङ्गलीला हि सा
तत्पादोदकपानमात्रमुदितो यात्रोन्मुखः सङ्गिभिः ।
स्नानश्राद्धविधिं तथा पुनपुनातीर्थे च गत्वाऽखिलैः
कृत्वा पण्डितयोगतः स्वपितृणां प्राप्तो गयाधामकम् ।।५६६।।
स्नानं श्राद्धविधिञ्च देवपितृणां ब्रह्माख्यकुण्डे गया-
तीर्थे सङ्गिजनैर्निमायिविबुधश्चक्रे समं श्रद्धया ।
यातो द्रष्टुमतः स विष्णुचरणं श्रीचक्रवेड़ास्थितं
चक्रे तत्र समर्चनञ्च विधिना श्रीविष्णुपादाब्जयोः ।।५६७।।
मालापुष्पसुगन्धधूपनिकरैर्विद्यार्थिभिः पूर्वतो
यातो ग्राहितवस्तुभिर्मधुभिदश्चानर्च पादौ बुधः ।
तत्रोच्चस्वरतः प्रभावकथने मग्ना गयाधामगाः
पण्डाविप्रगणास्तथा शुशुभिरे श्रीमत्पदाम्भोजयोः ।।५६८।।
'उत्पन्ना ननु जाह्नवी भगवती पादाब्जयोश्चानयोः
श्रीलक्ष्मीर्मनसा निरन्तरमिदं संसेवते श्रद्धया ।
ध्याने योगिजनास्तदेव हृदये पश्यन्ति पादाब्जकं
धृत्वा तच्च गयासुरस्य शिरसि प्रादात्प्रभुः सद्गतिम्' ।।५६९।।
भक्तानां चरणाब्जदर्शनकृताञ्चात्यन्तसम्मर्दने
मध्ये तत्र च कुर्वतां जयरवं विप्रैश्च पण्डाजनैः ।
वारम्वारमथाऽत्र संस्तुतिपरं पुण्यञ्च माहात्म्यकं
दातुं पादसरोजयोरुपहृतिं संकथ्यते साग्रहम् ।।६००।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

माहात्म्यश्रवणान्निमायिसुधियः श्रीमत्पदाम्भोजयो-
र्जाता सात्त्विककम्पनाश्रुपुलकैर्देहात्मनोर्विस्मृतिः ।
कम्पः कोमलपल्लवोष्ठयुगले नेत्राश्रुधारास्रुति-
स्तेजो दीप्तमथाऽऽकृतौ त्वविरलं पादाब्जमापश्यतः ।।६०१।।

संज्ञाशून्यतया न वेत्ति विषये कुत्र स्थितः पण्डितः
पार्श्वस्थः स्पृशतीति कश्च वपुषं किञ्चित्तथा वेद नो ।
एवं तस्य वपुः पतद्भुवि तथा संमूर्च्छया रक्षितं
कस्याप्यत्र तनुस्पृशा तु सहसा तेजस्विसंन्यासिनः ।।६०२।।

धृत्वा तस्य च सङ्गिभिर्जनभरान्निःसार्य नीतो बहिः
प्राप्तो बाह्यदशां मनाक् स नयने चोत्थाप्य चोत्थाप्य तत् ।
निद्राभग्ननरो यथा स्वपरितः पश्यन्नसौ ददृशे
दृष्टिश्चास्य गता सुदीर्घसुतनौ तेजस्विसंन्यासिनि ।।६०३।।

दृष्टवा तं सहसा स विस्मितमनाश्चात्यन्तहर्षान्वितो
धावित्वा जगृहे च तस्य चरणौ संन्यासिनः पण्डितः ।
कुर्वन्नश्रुविमोचनं निजदृशोर्जग्राह कण्ठे यति-
र्मूर्च्छां प्राप निमायिकेवलतनुस्पर्शाच्चतुर्थाश्रमी ।।६०४।।

एवं स्पर्शवशात्तथोभयगता देहात्मनोर्विस्मृतिः
प्रेमावेशतया सवाष्पनयने चान्योन्यमत्रोभयोः ।
आनन्दाम्बुधिमज्जितास्तदुभयप्रीतेर्दृशा यात्रिणः
सम्मर्दः सरतो जनस्य घटितो मार्गे च तौ पश्यतः ।।६०५।।

लब्धाऽल्पा ननु चेतना कतिपयैः कालैश्च संन्यासिना
धृत्वा प्रीतियुतेन तेन स करञ्चैकत्र भागे कृतः ।
प्रेमासक्तिगिरा 'निमायिसुमते! जातो हि भाग्योदयो
दृष्टस्त्वं सहसा यतो मम दृशोः' प्रीतो यतिश्चोक्तवान् ।।६०६।।

'द्वीपे चैव नवे स्वतस्त्वयि तथा चाकर्षितं मे मनो
(गौरः पुस्तकपण्डितोऽतिचपलो देवाऽतिवादी तथा ।
सोऽयं वैष्णवनिन्दनेऽतिरुचिमान् संज्ञायते नास्तिकः
श्रुत्वाऽप्यत्र फलं न तत्तव मुखाच्छ्रीकृष्णलीलाऽमृतम्) ।।६०७।।

श्रुत्वा लोकवचस्तथाऽहमपि तन्मौनी न मे स्वीकृति-
ञ्चान्तस्तस्य ददौ, पुनः पुनरपि स्निग्धं तथाऽचिन्तयम् ।
"एवं किं सरलो नरः सहृदयो भक्त्या विहीनो भवे-"
त्तेजः सूचयति स्फुटं मुखततं शक्तिं तथा भाविनीम् ।।६०८।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आनन्दो मम दर्शनस्य समये दृष्ट्वा त्वदीयस्थितिं
निस्सीमो विततस्तथा भगवतः संदर्शनाऽऽस्वाददः ।
शक्तो नो मुदितस्थितिं निजगतां वक्तुं हि धन्योऽधुना'
तन्नेत्राश्रुनदीप्रवाहघटनारुद्धस्वरोक्तिर्यतिः ।।६०९।।

संज्ञाऽल्पाऽधिगताऽमुना मधुगिरः संन्यासिनः श्रृण्वता
गौरेणाऽस्फुटरुद्धकण्ठवचसा भक्त्या तदुक्तं 'प्रभो!
धन्यश्चाद्य, गयाऽऽगतिः फलवती, वंशावली चोद्धृता
सौभाग्यं तव दर्शनस्य फलितं यन्मे गयायां सतः।।६१०।।

तीर्थश्राद्धवशात्त एव पितरो मुक्ता भवन्ति क्षिते-
र्यद्धेतोः क्रियते हि तर्पणविधिः शास्त्रस्थितिर्विश्रुता ।
मुक्तास्तु स्वत एव कोटिपितरस्त्वत्तुल्यसंन्यासिनो
लोकाद् भागवतस्य वैष्णवसतः संदर्शनाद्वा स्वतः।।६११।।

नूनं दुर्लभदर्शनोऽसि सुजनैर्भाग्योदयाद्दृश्यसे'
गौराङ्गः पुनरेव तस्य च यतेर्जग्राह पादौ ब्रुवन् ।
संन्यासी हठपूर्वकं स्वचरणौ चक्रे च मुक्तौ ततः
प्रेमाऽऽश्वासनतः स्थिरन्तु कृतवान्, सन्तो हि तीर्थप्रियाः।।६१२।।

(संन्यासी स महाशयोऽयमधुना श्रीमाधवेन्द्रप्रियः
शिष्यो मुख्यतमो यतीश्वरपुरी भक्त्यङ्कुरोत्पादकः ।
तेजः स्वञ्च निधाय तत्र सकलञ्चान्ते तनुं त्यक्तवान्
सोऽयं माधवपावितेश्वरगयागौराङ्गसत्सङ्गमः।।६१३।।

दृष्ट्वा रूपमलौकिकं सुललितं गौरस्य तेजस्विनः
प्राज्ञस्य प्रथमप्रसङ्गसमये द्वीपे नवे मोहितः ।
ऊचे तं त्वनिमेषदर्शनरतं स्मित्वा निमायी बुधो
'भिक्षामद्य गृहे विधेहि मम तत्पश्याऽनिशं मां स्फुटम्'।।६१४।।

भिक्षार्थं गतवान् ततोऽस्य विनयाद्गेहं पुरी श्रीश्वरो
ग्रन्थं श्रावितवान् क्षणं निजममुं 'श्रीकृष्णलीलाऽमृतम्' ।
मूर्तिस्तस्य मनोहरा स्वहृदये प्रेमस्वरूपाऽङ्किता
जातेऽद्योभयसङ्गमेऽत्र सहसा मोदाम्बुधौ मज्जितौ) ।।६१५।।

आज्ञां श्रीश्वरतोऽधिगृह्य वसतिं यातो निमायी सुधीः
सर्वं तत्प्रमुखं ददर्श स गयातीर्थं समं सङ्गिभिः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्राद्धं तत्पितृकर्म शास्त्रजगतीख्यातञ्च पिण्डादिकं
चक्रे तत्र च पण्डितो हि विनयी वर्णाश्रमाध्वाऽऽग्रही ।।६१६।।
तत्रान्तर्जलफल्गुनामसरितश्चान्तर्निमायी गतः
पिण्डञ्चादित बालुकामयमसौ तत्पूर्वजानां बुधः ।
गुप्ता फल्गुनदी हि सैकतमयी वारिप्रवाहान्तरा
यात्री स्नानविधिं करोति सिकतां निःसार्य नीरे स्फुटे ।।६१७।।
रामस्तत्र युधिष्ठिरः कृतिमतां प्रेतश्च भीमः शिवः
संज्ञाभिर्विलसन्ति षोडशगयातीर्थानि पूतानि वै ।
श्राद्धं पिण्डविधिञ्चकार विधिना सर्वैः पितॄणां समं
सर्वेष्वत्र तथैव दर्शनविधिं कृत्वा निवृत्तो बुधः ।।६१८।।

प्रेमस्रोतश्चोच्छलितम्

६३. प्रेमी प्रेमास्पदगुणगानं जीवनहेतुं कुरुते।

प्रियतमचिन्तननामोच्चारणचेतोरसनामूल्यम्
प्रेमास्पदजनुकर्माख्यानश्रवणसुधारसपेयम् ।
वाञ्छति लोकमुखात्प्रिययशसः केवलवर्णनसङ्गम्
एकाकी वा प्रियतमविषयं गायन् तिष्ठति विचरति ।।
श्रीवंशीधरमाधवस्य मधुरा मूर्तिः सदा मानसे
येषाञ्च श्रुतिरन्ध्रगः प्रतिपलं श्रीकृष्णवंशीस्वनः ।
चक्षुर्नेच्छति दर्शनं भगवतो मूर्तिं विना कस्यचिद्
भक्तानां भयहारिणः पिबति तच्चित्तं पदाब्जामृतम् ।।६१९।।
तेषां जीवनधारणं स्वयमहो धन्यं भुवः पावनं
शक्तिर्जीवविमोहिनी च नयने, वाणी तथोन्मादिनी ।
कार्यं लोकविलक्षणञ्च निखिलं संसारिणां श्रेयसे
भक्तोऽलौकिकमानवो, भुवि तथा काले हि सञ्जायते ।।६२०।।
प्रेमाब्धिश्च निमायिपण्डितहृदस्त्रैलोक्यसम्मोहको
यो भाव्युत्प्लवकश्च यस्य च सरिद्धारा चिरात्सूत्रिता ।
अद्वैतादिविशुद्धवैष्णवजने वर्षैश्च यल्लालसा
प्राकट्यस्य मनोहरो हि निकटे प्राप्तोऽस्य कालोऽधुना ।।६२१।।
तस्याऽखण्डयशः प्रकाशनकृतं लेभे गयाधामकं
धन्या पुण्यवती हि तेन वसुधा, प्रेमप्रकाशा गया ।
विख्यातं भवतीति पावनतमं तीर्थं धरायाञ्च तत्-
संसर्गो विदधाति यस्य घटनाख्यातिं महामानवीम् ।।६२२।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाके स्वस्य निमायिपण्डितवरश्चासीन्निवासे रतः
सिद्धञ्च द्विदलं सशाकमधुना तत्तण्डुलं पच्यते ।
आगच्छन् ददृशे महाशयपुरी दूरात्तथाऽस्यामुखं
कर्तुं तस्य पदाब्जवन्दनमसौ गौरो दधाव द्रुतम् ।।६२३।।

प्रेम्णाऽऽलिङ्गदमुं पुरी स्मितमुखो ब्रूते 'मुहूर्ते शुभे
प्रस्थानं कृतवान्, यदत्र समये प्राप्तो निजस्थानतः' ।
'संस्कारः शुभकर्मणां नरि यदा जागर्ति भाग्योदयः
सौभाग्यं लभते भवादृशसतां सोऽयं तदा दर्शनम् ।।६२४।।

सद्यः प्रस्तुतभोजनं करपदे प्रक्षाल्य भिक्षां कुरु'
'स्वाहारं यदि चाद्य भोजयसि मां, किं खादिता त्वं तदा' ।
'अस्त्यन्नं भवदीयमेव तदहं ते पाचकः केवल-
ञ्चेदाज्ञा पुनरेव रन्धनमसौ कर्ता' विनीतोऽवदत् ।।६२५।।

नायं सम्प्रति मानयिष्यति बुधः सम्भोज्य भिक्षां विना
ज्ञात्वा तच्च पुरी जगाद 'न पुनः कर्तुं तथाऽवश्यकम् ।
अर्धार्धं ननु रन्धितस्य भविता कृत्वाऽऽवयोः खादनं
स्वीकार्यं भवतस्तथाहि किमिदं? (रक्ष्याऽतिथेर्शिष्टता) ।।६२६।।

भिक्षा मे तव भोजनं कथमहो संभूय सम्पत्स्यते
संन्यासी च वयं भवान्ननु गृही भिक्षैव वाऽप्यद्य ते' ।
'आज्ञा ते च यथा तथैव भविता' चोक्त्वा बुधः सस्मितं
प्रक्षाल्याऽस्य पदे स्वपाणियुगलाच्चावेशयच्चासने ।।६२७।।

भिक्षान्नग्रहणं पुरीयतिवरश्चैवं तथाऽऽरब्धवान्
तृप्तिः स्यात्परिवेषके कथमहो प्रेमावतारेऽतिथेः ।
सर्वं तत्परिवेषितं लघुतया खाद्यं शनैः साग्रहं
तत्प्रेम्णा वशतां गतो यतिपुरी सोऽप्यग्रसिष्टाऽखिलम् ।।६२८।।

आसीत्प्रज्वलितोऽनलश्च पचनं जातं क्षणात्तत्पुनः
प्राप्ता तत्र पपाच भोजनमहो मन्येऽन्नपूर्णा स्वयम् ।
गौराङ्गो बुभुजे ततस्तदुभयोर्विश्रम्भवार्ताऽचलद्-
वार्ताश्रेयसि केवलं रहसि वै साध्वोः परस्यात्मनः ।।६२९।।

गौरो बद्धकरो जगाद 'भगवन्! कालो व्यतीतो महान्
वृत्त्या यापयतो हि जीवनमिदं तन्मेऽधुना बाह्यतः ।
तत्त्वं मे शरणं प्रदेहि कृपया पादाब्जयोश्चात्मनः
श्रीकृष्णाऽनुरतिं तथाऽल्पमहतीं दत्वाऽनुकम्पां कुरु' ।।६३०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुत्वा तद्वचनं जगाद स पुरी 'श्रीकृष्णरूपस्य ते
भक्तिं दास्यति कः, स्वयं हि जगतोः प्रेमप्रदाने क्षमः' ।
ऊचे 'वञ्चयतां प्रभो! नहि पुनः, स्वीकृत्य दीनार्थनां
प्रेमाभक्तिनिधेर्गुरुर्भवतु मे श्रीकृष्णमंत्रप्रदः' ।।६३१।।

सारल्येन पुरी जगाद 'वदति श्रीकृष्णमंत्रं भवान्
दातुं केवलमत्र, किञ्च कथनात्प्राणान्तथा ते ददै ।
जाने प्रेमरहस्यमल्पमपि नो वर्ते स्वयञ्चाधमः
किं स्यान्ते च कुलीनविप्रविदुषो मंत्रप्रदाने क्षमः' ।।६३२।।

सारल्यातिशयेन वाष्पनयनो गौरो ददौ चोत्तरं
'प्रेमश्रीप्रतिमो भवान् स्वयमहो सामर्थ्यवानीश्वरः ।
कर्तुं शक्ष्यति संसृतिञ्च निखिलां प्रेमामृतप्लावितां'
वैवश्यं पुनरेव तत्प्रकटयन् सारांशमूचे पुरी ।।६३३।।

'श्रीप्रेमाऽमृतसागरेऽखिलजगत्संप्लावनाभङ्गिमा
गौराङ्ग! त्वयि, केवलं परमहो दातुं गुरोर्गौरवम् ।
सौभाग्यं मम वाञ्छसि त्वमधुना वश्यस्तवाहं ततः
कर्तुञ्चास्मि समुद्यतो ननु तथा ते चाज्ञया सर्वथा' ।।६३४।।

दीक्षामंत्रकृते महाशयपुरी चोक्त्वा तथा प्रस्तुतो
दीक्षायाश्च शुभा तिथिर्हि नियता पञ्चाङ्गतस्तत्क्षणम् ।
प्राप्ता सा नियता तिथिः प्रमुदितो दीक्षाग्रहायोद्यतो
गौराङ्गो बहु सज्जितोऽत्र दिवसे दीक्षोत्सवः सङ्गिभिः ।।६३५।।

प्राप्तस्तत्समये पुरी, शिरसि तद्द्राक् पादधूलिं बुध-
श्चक्रे स्वस्त्ययनञ्च मङ्गलविधिं सुश्लोकपाठैः पुरी ।
कृत्वा भागवतं सुनाममधुरं सङ्कीर्तनं त''न्नमः
श्रीगोपीजनवल्लभाय'' विदधौ मंत्रोपदेशं श्रुतौ ।।६३६।।

(मंत्रोऽयञ्च दशाक्षरोऽत्र विहिता शोभा श्रियः पूर्तये)
मंत्रस्य श्रवणेन चैव पतितो गौरः क्षितौ मूर्च्छितः ।
ध्यानं नो वपुषोऽस्य सङ्गिसुजनैर्नानोपचारैरयं
गौराङ्गोऽवहितः क्षणेन बहुना लब्ध्वाऽल्पसंज्ञां बुधः ।।६३७।।

जाता तस्य दशाऽधुना त्वविषया वाचां विचित्रैव सा
दीर्घं स क्षणतो जहास विकलः प्राज्ञो रुरोद क्षणम् ।
'हा श्रीकृष्ण! पित'स्तथैव वचनाद् दीर्घन्त्वरावीद्रुदन्
'गन्ताऽहं व्रजकृष्णपार्श्वमधुना' चोक्त्वा दधाव व्रजम् ।।६३८।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धृत्वा तत्र पुनः पुनश्च निकटे कुर्वन्ति तं सङ्गिनो
देहं किन्तु ततो विमोच्य बहुशो मत्तो यथा धावति ।
उच्चैस्तत्प्रलपंश्च पूर्वसदृशं ब्रूते रुदन् 'हा प्रिय!
त्यक्त्वा कुत्र गतो (विरौति स पुनः) मे कृष्ण! सङ्गे नय' ।।६३९।।

ब्रूते बान्धवशिष्यसङ्गिनिकरञ्चार्तो रुदन् 'भ्रातरः
सर्वे यूयमतोहि गच्छत गृहं, यास्यामि नाहं परम् ।
वत्स्यामि त्वहमद्य कृष्णनिकटे गत्वा च वृन्दावने
माता मे प्रणतिं वद प्रणयतो मत्तो निमायी हि ते' ।।६४०।।

दृष्ट्वाऽलौकिकविस्मयावहदशां ते सङ्गिनो विस्मिता-
श्चक्रुस्तस्य बहु प्रबोधनविधिं मेने तु कस्यापि नो ।
प्राप्ता सा क्षणदा तथैव विधिना चाश्रुप्रलापे ततः
शिष्याः सङ्गिजनाः सुखेन शयिता, निद्रा वियुक्तस्य किम्? ।।६४१।।

संसारः सुखरूपमोहननिशि स्वप्तुं सुखी युज्यते
ज्वाला यत्र हृदि प्रभोर्विरहतो निद्रा कुतो लोचने ।
सुप्ते सर्वजने निशैव तरसा क्रन्दन् प्रतस्थे व्रजं
श्रीकृष्णं मिलितुं तदस्य विकलाः प्राणाः परं निर्भयाः ।।६४२।।

एकाकी तमलक्षितं पथमसौ घोरान्धकारेऽचलद्-
यातस्याल्पपथे त्वमुष्य हृदये दिव्येव वाणी श्रुता ।
'नायं ते समयोऽधुना व्रजगतेर्गन्ताऽसि काले व्रजं
भक्तप्रेमविधायकस्त्वमधुना द्वीपे स्वसङ्गाद्भव' ।।६४३।।

अलक्षितः कोऽपि जगाद मां तथा
'बधान धैर्यं समयं त्वमल्पकम्'।
विचार्य वाणीं नभसो निदेशनं
बुधो निवृत्तः पुनरेव चासने ।।६४४।।

नदियाप्रत्यागमनम्

६४. प्रियतम! दर्शनभिक्षां दत्वा जीवय भिक्षुकदृष्टिम् ।
नामप्रियताश्रवणस्वादं रसनाकीर्तनरागम्
रूपमधुरतासंस्मृतिवृत्तिं चेतोद्रवतां वितरतु ।
लोकव्रीडाबन्धनतमसा हसनं गानं लुप्तम् ।
स्वगतं याचकनर्तनरोदनभिक्षाऽऽहारं भोजय ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संसारे वरभागिनो ननु जनाः स्वप्नेऽपि पश्यन्ति ये
प्रेमोन्मत्तविशिष्टसाधुपुरुषान् संस्कारिणस्ते स्फुटम् ।
सौभाग्यञ्च निरन्तरं भुवि जनैस्तेषां पुनः सङ्गते-
र्लब्धं जाग्रति यैश्च, भाग्यगणनं तेषां कथं सम्भवम् ।।६४५।।

सङ्गो भागवतस्य वैष्णवसतश्चानन्ददो वस्तुतः
संसर्गः क्षणिकोऽपि तस्य जगतो दूरं नयत्यद्भुतम् ।
तेषां चिन्तनवर्णनं मधुमयं मुक्तिप्रदं दर्शनं
काम्यं तद्विदुरप्रियं हि भगवद्दासानुदासार्पणम् ।।६४६।।

दत्वा कुत्र पथा च केन गतवान् मंत्रं निमायीगुरुः
साधुर्भागवतस्तथेश्वरपुरी, नो वेद कश्चिच्च तत् ।
प्रायस्तेन विचिन्तितं 'गुरुमतिर्नन्ता निमायी हि मां
सह्यं नो मम लोकशिक्षणरतप्रेमावतारस्य तत्।।६४७।।

संसारे प्रकटं ततो ह्यनुचिता संन्यासिनो मे स्थिति'-
र्मत्वा तत्क्षणमेव कुत्र चलितो ज्ञातो न कुत्र स्थितः ।
श्रीमन्माधवमुख्यशिष्यफलितः साधुः पुरी श्रीश्वरः
श्रीगौराङ्गगुरुप्रभावरसितो लक्ष्यो महामानवः।।६४८।।

प्रातश्चात्र निमायिपण्डितवरं बुद्धं त्वपश्यन् जना
वाष्पक्लिन्नशरीरवस्त्रमखिलं रात्रावनिद्रं तथा ।
'हा श्रीकृष्ण! पितर्मम प्रियतम! त्यक्त्वा गतः कुत्र मा-
ञ्चार्तं' केवलविप्रयोगवचनैः क्रन्दन्तमेवं बुधम् ।।६४९।।

एवं चित्रदशां विलोक्य च गयावासोऽधिको नोचितं
मत्वा शिष्यजनाश्च तस्य वपुषः संलालनासंयुताः ।
चेलुर्द्वीपनवं स्वशिष्यकलितोऽचैतन्यवस्तूपमो
गौराङ्गश्चलितो नदेहकलनस्वल्पप्रतीतिस्तथा।।६५०।।

मध्ये क्वापि सचेतनः पुनरसावुच्चैश्च संक्रन्दति-
'श्रीमत्कृष्ण! गतोऽसि कुत्र पतितं मामुद्धर श्रीधर!
हे प्राणप्रिय! रक्ष सङ्गिसहित'श्चैवं प्रलापारतो
लेभे ग्रामकुमारहट्टतरणीं कृष्णप्रियोऽचेतनः।।६५१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दीक्षामंत्रमवाप कृष्णललितं यस्मादमुं पण्डितं
मत्तं यः कृतवांश्च सेश्वरपुरी ग्रामेऽत्र जन्माऽग्रहीत् ।
दूरादेव ननाम जन्मनगरीं साष्टाङ्गतोऽसौ गुरो-
र्माहात्म्यं नगरीरजः स्ववसने बध्नाति बोद्धुं जने।।६५२।।

ऊचे सङ्गिजनं 'कदापि चरणस्पर्शो भवेच्छ्रीगुरो-
र्बाल्ये श्रीतनुलुण्ठनञ्च रजसि प्रायोऽत्र तद्युज्यते ।
अत्यन्तं मम पावनं ननु रजश्चेदं त्रिलोक्यां नहि
श्रेष्ठं वस्तु ततोऽपरञ्च नगरीश्वा चापि वन्द्यो हि मे ।।६५३।।

भूमौ यत्र दधौ हि जन्म च गुरुश्चिक्रीड पूताङ्गणे
यत्राऽयं, मम लक्षतीर्थगुणिता भूमिर्वरा सा ध्रुवम्' ।
एवं श्रीगुरुदेवगौरवगिरा माहात्म्यसंदर्शको
गौराङ्गः पथिको दिनैः कतिपयैः पेदे नवद्वीपकम्।।६५४।।

श्रुत्वाऽमुष्य गयापथागमनकं वृत्तञ्च विद्यार्थिनः
सर्वे दर्शनलोलुपाश्च सुहृदः प्राप्ता सतो बान्धवाः ।
पादस्पर्शपुरस्सरं प्रणमति स्निग्धस्तथाऽऽलिङ्गति
श्रद्धालुः स्वजनश्च कण्ठमिलनात्तेभ्यः स मानं ददौ।।६५५।।

गौरो लाडयतेऽर्भकं निजकरं शीर्षेऽवरस्याऽऽदधौ
दत्ते शिष्यजनाय चाशिषमसौ श्रेष्ठाननंसीद् बुधः ।
आशीस्ते विविधं बुधाय ददति प्रीताश्च मान्या जनाः
श्रीमाता वनिता तथा प्रमुदिता लब्ध्वा सुतं श्रीपतिम्।।६५६।।

लोकानां निवहे च तत्र महति प्रीतिप्रकर्षान्विते
कोणे मौनतया गृहस्य जननी विष्णुप्रिया च स्थिते ।
प्रेम्णा तांश्च विसर्ज्य सम्मिलनतः स्नानाय यातः स्वयं
भावं देहदशां विलोक्य जननी नोचेऽपि चिन्तातुरा।।६५७।।

स्वस्थं संस्थितमागताः प्रियजना यामे तृतीये तदा
श्रीमान् पण्डितजी सदाशिवकविर्गुप्तो मुरारिस्तथा ।
अन्ये चापि तथान्तरङ्गसुहृदो ज्ञातुं गयावृत्तकं
जिज्ञासां सुहृदां विलोक्य सुमतिर्वक्तुं तथाऽऽरब्धवान्।।६५८।।

'मान्या! किं कथयामि सम्प्रति गयावृत्तं तु मत्तो गतो
माहात्म्यश्रवणक्षणे भगवतः श्रीमत्पदाम्भोजयोः ।
सत्यं श्रीप्रभुपादपद्ममहिमा तीर्थे गयायां श्रुतः
प्राणी पापतमोऽपि यस्य कृपया भक्तोत्तमो गण्यते।।६५९।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तिप्रेम तनोति सर्वहृदये श्रीपादपद्म प्रभोः
साहाय्यं भवतस्तरन्ति सहजं लब्ध्वाऽस्य पापा ह्यपि ।
यत्पादाम्बुजधौतजा भगवती भागीरथी पावनी
शान्तिं दृष्टमिदं तनोति हृदये, श्रुत्वैव मोहं गतः' ।।६६०।।

एवं तीर्थगयास्थमन्दिरगतं वृत्तं प्रभोः पादयो-
र्माहात्म्यश्रवणेन यच्च हृदये जातं स्वतश्चोक्तवान् ।
अत्राप्यन्तिमशब्दभाषणमपि स्थाने न सम्यग्गतं
तत्पूर्वं प्रभुपण्डितः प्रभुपदे स्मृत्वा तथा मूर्च्छितः ।।६६१।।

दृष्ट्वाऽमुं भुवि मूर्च्छया च पतितं लोकाः परं विस्मिताः
पश्यन्त्यत्र परस्परं, कथमहो गौरः स एवास्ति किम्?
यो मासत्रयपूर्वमद्य विकलः प्रेम्णा ह्यपूर्वो गत-
स्तस्यैवञ्च दशां विलोक्य सुहृदामाश्चर्यपारो नहि ।।६६२।।

दीर्घं दीर्घमसौ बुधः श्वसिति तत्स्वेदार्द्रदेहस्तथा
नेत्राश्रूणि पतन्ति तस्य सततं 'हा कृष्ण! मे वल्लभ!
प्रेष्ठो माञ्च विहाय कुत्र गतवां'श्चेदं ब्रुवन् पण्डित-
स्तद्दीर्घस्वरतो रुदन्नयमहो जातो निमायी द्रुतम् ।।६६३।।

कर्तुं शान्तमियेष बान्धवजनः साफल्यमत्राऽस्ति नो
'स्वस्थाऽद्य प्रकृतिर्न मेऽस्ति (तदयं रुद्धस्वरश्चोक्तवान्) ।
श्वश्चागत्य वदामि तच्च वसतिं शुक्लाम्बरस्य स्वयं
यात्रावृत्तमहं' निशम्य सकला लोकाः स्ववासं ययुः ।।६६४।।

भावस्यास्य च नूतनस्य सुमतेः सर्वत्र चर्चाऽधुना
द्वीपे, शंसति पण्डितो हि विहसन् श्रीवासभक्तादिकम् ।
'वक्ष्येऽहं भवतः प्रमोदविषयं श्रुत्वा भवेयुर्ध्रुवं
साश्चर्याः, परिवर्तनं ह्यभिनवं गौरे गयायात्रया ।।६६५।।

प्रेम्णा रोदिति विह्वलश्च, हसति श्रीकृष्णमुच्चारयन्
भूयो नृत्यति गायति प्रकटयन् वैकल्यमद्यात्मनः ।
आशा स्वप्नगतापि कस्यचिदतो नासीत्तथाद्यावधिं
श्रीगौरः परिवर्तितो हि युगपच्चैवं भवेज्जीवने' ।।६६६।।

श्रीवासश्चकितस्तथा प्रमुदितः श्रुत्वा जगाद द्रुतं
'सत्यञ्चास्ति, तथाहि वैष्णवसतां सद्भाग्यमेवोदितम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गौराङ्गे सति वैष्णवे सहृदये भक्तिः सनाथा पुन-
र्हास्यं किं कुरुषे, किमस्ति विषयश्चैवं यथार्थो न वा'? ।।६६७।।

ऊचे पण्डितजी पुनर्दृढतया 'हास्यस्य कार्यञ्च किं
गत्वा पश्यतु तत्स्वयं सशपथं वच्म्यत्र गौरोऽधुना ।
रोदित्यर्भकतुल्यविह्वलमना, वक्ता गयोदन्तकं
यात्रावृत्तमसौ सदाशिवमुखे श्वो ब्रह्मचर्याश्रमे' ।।६६८।।

सन्तुष्टाः परमं निशम्य वचनं श्रीवाससद्वैष्णवाः
सन्देहस्तु गदाधरस्य हृदये स्वल्पोऽधुना विद्यते ।
'कृष्णप्रेम हि वस्तुतः समुदितं (श्रोष्यामि) गौरे न वा?'
गुप्तस्तच्च गदाधरः परदिने पूर्वं गृहान्तर्हितः ।।६६९।।

साक्षाच्छ्रीप्रभुतो गयापथकथां श्रोतुं गृहे ब्रह्मणः
सर्वे ते प्रमुखाश्च भद्रपुरुषा गङ्गातटे सङ्गताः ।
श्रीमत्पण्डितजी सदाशिवयुतो गुप्तश्च नीलाम्बरः
काले वै नियते प्रभुः स्वयमपि प्राप्तः क्षणानन्तरम् ।।६७०।।

आरेभे च तदेव रागलपनं गौरोऽत्र चैवागतः
'कृष्णः कुत्र गतो मम प्रियतमो भ्रातोऽमुना योजय ।
दौर्भाग्यं मम कीदृशं विरहितः श्रीकृष्णचन्द्रस्तथा
त्यक्त्वा मां विलपन्तमेव' पतितश्चैवं वदन् मूर्च्छितः ।।६७१।।

दृष्ट्वाऽमुष्य दशां गदाधरबुधो लीनो गृहान्तर्गतः
प्रेम्णा विह्वलितः पपात धरणीपृष्ठे रुदन्मूर्च्छितः ।
कालानन्तरमस्य गौरसुमतेर्भग्ना च मूर्च्छा क्षणं
स्वस्थो वेदनया पुनस्तु विकलोऽरोदीच्च चीत्कारतः ।।६७२।।

दृष्ट्वा रोदनमस्य रोदिति तथा लोकोऽखिलोऽत्र स्थित-
स्तेषां क्रन्दनरोदनध्वनिभराच्छन्नं वियन्मण्डलम् ।
तस्थौ दर्शनकर्षितो बहुजनो जातोऽश्रुधारायुत-
स्तत्कोलाहलपूरितं गृहमिदं शुक्लस्य वै रोदनात् ।।६७३।।

पश्चात्स्वल्पतया स्थिरः प्रभुरयं बाह्याल्पबोधस्तथा
पप्रच्छ स्वयमत्र 'भोः गृहपते! कोऽस्त्यत्र गेहान्तरे?'
उक्तं तेन 'गदाधरोऽस्ति भवतः' शुक्लेन च प्रीतितः
श्रुत्वा तच्च गदाधरेति सहसा रोदित्यसौ विह्वलः ।।६७४।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऊचेऽसौ विलपन् 'गदाधर! सुहृत्त्वञ्चात्र धन्यः परं
याथार्थ्येन मनुष्यजन्म सफलं प्राप्तं त्वयैव ध्रुवम् ।
अस्माकं विफलं हि जन्म, रहितास्तत्त्वेन नूनं वयं
हा श्रीकृष्ण! गतोऽसि कुत्र शरण! ह्युद्धारकः पापिनाम्'।।६७५।।

उक्त्वा चैवमधीरविह्वलबुधो लोकस्य पादेष्वयं
शीर्षं स्वञ्च निधाय वक्तुमभवद् 'दीने दयन्तां मयि ।
दुःखं मे च हरन्तु, कृष्णमिलनं कुर्वन्तु मे भ्रातरः!
प्राणा मे व्यथिता हि केवलमिमे श्रीकृष्णसङ्गाप्तये'।।६७६।।

श्रुत्वा दैन्ययुतं प्रभोश्च वचनं दीर्णं जनानामुरः
प्रेमावेशतया रुदन्ति निखिला विस्मृत्य चात्मस्थितिम् ।
सायञ्चापतितं तथा विलपतां याता गृहं ते ततो
दीनस्य प्रभुरत्र तत्र शरणं स्थाने गुरुर्वत्सलः।।६७७।।

स्वस्थ्यः संश्च महाप्रभुः परदिने विद्यागुरोश्चात्मनो
गङ्गादासबुधस्य गेहमगमन्नत्वा तथाऽमुं स्थितः ।
तस्यालिङ्गनपूर्वकं गुरुरमुं पप्रच्छ यात्राकथां
'यातं मासचतुष्टयं तव गयायात्राप्रसङ्गेऽधुना।।६७८।।

शिष्यास्ते त्वतिदुःखितास्त्वयि गते पाठं बभूवुर्विना
कस्याप्यन्यबुधस्य पाठनमहो तेभ्यश्च नो रोचते ।
आसंश्चागमनस्य ते हृदयतः सर्वे प्रतीक्षारताः
स्थाने, चागतवानसि त्वमधुना कर्ता किमध्यापनम्'?।।६७९।।

'आम्, यत्नो भविता हि मे यदि कृपां कृष्णश्च कर्ता ततो
नूनं सर्वमिदं भविष्यति, यतः सर्वञ्च तत्राश्रितम्' ।
दत्वाऽऽश्वासनमत्र, तत्र गतवान् यत्र स्वविद्यालयः
प्राज्ञः सौम्यमुकुन्दसञ्जयगृहश्रीचण्डिकामण्डपे।।६८०।।

आनन्दातिशयेन सञ्जयगृही प्राज्ञं मिमेल प्रभुं
तत्पुत्रः पुरुषोत्तमः प्रभुपदे भक्त्या ननामाऽऽस्थया ।
तञ्चालिङ्गदयं तथा प्रभुदृशा प्रीतौ च पुत्रः पिता
तत्प्राप्त्या नगरस्त्रियः प्रमुदिता लेपुश्च नानाविधम्।।६८१।।

'सम्प्रत्यत्र निमायिपण्डितवरश्चान्यो यथा लक्ष्यते
भक्तिर्भागवती जनस्य महता भाग्येन वै लभ्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सौभाग्यं परमं निमायिसुदशो जातो बुधो वैष्णव'-
स्तासां संलपनं तथा मिलनतो यातो निमायी गृहम् ।।६८२।।

तथैव प्रेमोन्मादः

६५.व्यक्तिर्भगवत्प्रीतौ व्यक्तं, लोकोत्तरनिष्पत्तिः।

विषयासक्तिरिन्द्रियप्रीतिः सामान्या परिभाषा
बाह्यान्तःकरणस्य लक्षणं तुल्यं, लक्ष्यं भिन्नम् ।
हसनं गानं चिन्ता ध्यानं योगसुखं विरहार्तिः
निस्त्रपरमणं विषये भगवति लोकलोकेतरसदृशम् ।
श्रीनारायणनामाक्रन्दनमजया मिलिते चैकम्
श्रीशुकनारदहनुमद्गानं गौराऽऽक्रन्दनमन्यत् ।।

प्रीतिर्भागवती हि यस्य हृदये जाताऽस्य भूयः कथं
वार्ता जागतिकी प्रिया ननु भवेद्भक्तस्य शुद्धात्मनः ।
जिह्वा यस्य चखाद मिश्रिकरसं कस्माच्च सा वै पुन-
र्लोके स्वादयते गुडस्य विकृतिं सोल्लासतः स्वेच्छया ।।६८३।।

शुद्धे प्रेम्णि च सुस्थिरे ह्यधिगते मत्तायते वस्तुतो
लोक,रतस्य पुनश्च बाह्यजगतो नो वै प्रतीतिस्तथा ।
लोके वाऽत्र महानराऽनुकृपया पुण्यप्रदेशस्थितेः
प्रेमावेशकृता क्षणेन मुदिता प्रेम्णश्च साऽभासनम् ।।६८४।।

पान्थः पर्वतशीर्षमन्दिरशिरः स्वल्पप्रतीतिच्छविं
दूरस्थो हि विलोक्य नृत्यति मुदा 'लक्ष्यं मया लक्षितम्' ।
एवं तस्य दशा विमुग्धमनसो लोके क्षणप्रेमिणो
लक्ष्यं संसृतिदुर्गमे गिरिपथे दूराच्च दूरं परम् ।६८५।।

तत्प्रेम्णः पथि वस्तुतोऽऽनुगमने जाते हि वृत्तिः पुनः
संसारे विषये सतः सुमनसः शक्नोति गन्तुं नहि ।
मत्तः प्रेममदे समस्थितियुतः प्रेमी जनः सर्वदा
नोच्चैः स क्षणतो विभाति, न तथा नीचैः क्षणाद् वर्तते ।।६८६।।

६६. प्रेमी स्वगतं प्रेम निगूढं स्वयमपि वक्तुं ह्यपटुः।

मल्लो ब्रूते दर्शयतीह स्वबलं स्वस्थं देहम्
धनिको वित्तं बुधश्च बुद्धिं सेवा परन्त्वगम्या ।
क्षणे क्षणे यन्नवतां गच्छति तल्लौकिकरमणीयम्
प्रेमस्वरूपं क्षणे क्षणे च नहि निम्नोन्नतरूपम् ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिष्ठत्यत्र तु वस्तुतः समरसा प्रेमस्थितिः सर्वदा
प्रेमी स्वप्रियसङ्गमे प्रतिपलं चिन्तातुरव्याकुलः ।
तृप्तिर्नास्ति कदापि तस्य हृदये नास्त्यस्य चान्यः प्रिया-
त्प्रेयान् वाञ्छति तं न वेति सुमतेः स्वप्नेऽपि चिन्ताऽस्य नो ।।६८७।।

६७. रसिकः प्रमितिं प्रेम्णो निखिलं सङ्केतेन प्रथते।

दासकबीरः कविचेतयिता तत्पञ्जरगतमघटम्
प्रेमाऽलौकिकवस्तु ब्रूते क्रिया नात्र परिवृत्तिः।
कारणरहितं सदा समानं समरसमेकमनन्यम्
सर्वस्वं प्रियकेवलगणनं प्रेम्णो रसखनिमानम् ।।

श्रीचैतन्यमहाप्रभोश्च हृदयाद्भक्तिप्रवाहोद्गति-
र्मासश्रावणभाद्रयो ऋतुनदीधारेव नासीत्तथा ।
वर्षर्तौ सरति द्रुतं पुनरसौ ज्येष्ठाऽऽतपैः शोषिता
क्षुद्राऽल्पावधिलक्षिता जगति तत्प्राप्नोति लक्ष्यं न सा।।६८८।।

धारा तद्हृदयोद्गता प्रतिपलप्रेष्ठोन्मुखी माधुरी
प्रेमाम्भोनिधिलक्ष्यवारि मिलितुं नद्या रतिस्थायिनी ।
लोके केवलमत्र सा ह्यनुभवज्ञेया सतां प्रेमिणां
तस्या नास्त्युपमानमच्युतगते,स्तत्तोल्यते प्राकृतम्।।६८९।।

आयातश्च महाप्रभुर्ननु यतः कालाद् गयातीर्थत-
स्तस्मादेष सदा विचित्रदशया मत्तो यथा लक्ष्यते ।
मध्येभोजनमुत्थितश्च सहसा रोदित्यसौ नृत्यति
क्षीबाभः पथि 'कृष्ण! कृष्ण'! शयने चोक्त्वा तथाऽऽक्रन्दति।।६९०।।

वार्तायाः सहसाऽन्तरे सह जनैर्दीर्घं हसत्युच्चकै-
र्दण्डश्वासगतिर्वियोगभरितो रात्रौ न निद्राक्षणः ।
वाष्पं लोचनयोस्तथाऽस्य निपतत्क्लिन्नं करोत्यम्बरं
भीताऽमुष्य दशां विलोक्य वदति श्वश्रूं च विष्णुप्रिया।।६९१।।

दृष्ट्वा पुत्रदशां शची च जननी दुःखातुरा रोदिति
स्वास्थ्यं कांक्षति सर्वदेवनिकरे भोगप्रसादैस्तथा ।
साऽधीरा करुणामयी प्रभुपदे माता विधत्तेऽर्थनां
'दृष्टिं शक्तिविहीनदीनविधवापुत्रैकमात्रे कुरु।।६९२।।

दीनानाथ! धनञ्च भोगवसने नेच्छामि तद्भूषणं
स्वस्थो नेत्ररविर्ममैकशरणं तिष्ठेन्निमायी सुतः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवं केवलमत्र पूरय मनोभावं दयालो! प्रभो'!
माता पुत्रनिमायिमुग्धविकलाऽवस्थां विलोक्याऽऽतुरा ।।६६३।।

नो शक्नोति महाप्रभुः किमपि तत्कर्तुञ्च सम्प्रत्ययं
स्नानं सान्ध्यविधिं न भोजनमपि प्राज्ञो विधातुं क्षमः ।
आयाति प्रियसंस्मृतिश्च सततं कार्यं यतः कुर्वतः
संज्ञाशून्यतनुस्ततः पतति स स्मृत्वा वियोगं प्रभोः ।।६६४।।

संज्ञायाञ्च निरन्तरं सुमधुरश्रीकृष्णनाम्नां स्वतः
स्पष्टोच्चारणमस्य सम्प्रति मुखात्सञ्जायते धीमतः ।
गौराङ्गो वचनोत्तरं यदि पुनर्दत्ते स्वयं कस्यचि-
त्तल्लोकोत्तरवर्णनं भगवतो लीलान्वितं केवलम् ।।६६५।।

वार्ताञ्चेद्विदधाति केनचिदपि श्रीकृष्णमात्रान्विता-
मद्यत्वे फलितं न वेद तदसौ कृष्णातिरिक्तं परम् ।
श्रीकृष्णो ह्यसवस्तथा धनमपि श्रीकृष्णमात्रं ततः
सर्वस्वं ननु कृष्ण एव जगति प्राज्ञस्य चान्यन्नहि ।।६६६।।

प्राप्तो द्वीपनवं गुरुर्ननु गयातीर्थाच्च विद्यार्थिनः
श्रुत्वा ते क्रमशो बुधप्रभुगृहं द्रष्टुं गुरुञ्चागताः ।
शालाध्यापनहेतवे निजगुरुं ते प्रार्थयन्ति प्रभुं
तेषामाग्रहतश्च पाठभवनं यातो निमायी गुरुः ।।६६७।।

गत्वाऽप्यत्र गुरुश्च पाठयतु किं तद्विस्मृतं लौकिकं
शास्त्रं सर्वममुष्य कृष्णविषयं वक्तुं प्रभुः केवलम् ।
'भ्रातर्जागतिके हि शास्त्रनिवहे नास्त्यत्र तत्त्वं ध्रुवं'
तानध्यापयितुं प्रभुर्गुरुवरः पाठं तथाऽऽरब्धवान् ।।६६८।।

'सारः केवलकृष्णनाम मधुरं तत्त्वैकमात्राऽमृतं
पेयं तच्छ्रवसा तथा सुमनसा ध्येयञ्च गेयं गिरा ।
सृष्टिः पोषणमस्य तच्च विलयः कृष्णेच्छया केवलं
काले संभवतीति सर्वजगतः श्रीकृष्ण एवाश्रयः ।।६६९।।

आनन्दस्य स धाम मोदरसदस्तत्कृष्णसङ्कीर्तनं
नित्यं तस्य निरन्तरं सुमनसा गानं गुणानां तथा ।
कुर्यादार्ततया तदेव सरसं लक्ष्यं नराणां परं'
तत्रैवं कथयन् सुकीर्तनमसौ कृष्णस्य चारब्धवान् ।।७००।।

वार्तां तस्य निशम्य तां कतिपये मग्नाः प्रमोदाऽम्बुधौ
बाह्यज्ञानविहीनमानसतया ज्योतिः परं लेभिरे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वस्वं ननु पुस्तकी मतिमतां विद्या तथा मान्यता
भट्टाचार्यतया च शास्त्रिपदवी लक्ष्यं परेषां परम् ।।७०१।।

ऊचुस्तेऽत्र 'गुरो! भवान् वदति किं, लाभस्ततः को हि नः
पाठ्यं पुस्तकमत्र पाठय परं तद् वैष्णवानां वचः ।
नायाता वयमत्र पाठभवने भक्तिं तथा शिक्षितुं
न्यायव्याकरणादिशास्त्रविषयग्रन्थान् हि नो बोधय' ।।७०२।।

तेषां तद्वचनं निशम्य च गुरुर्गौरो जगाद प्रभु–
'भ्रातर्मे प्रकृतिस्तथाद्य विकला, पाठं स्वकञ्चाधुना ।
सर्वे तत्स्थगयन्तु पुस्तकभरं बद्ध्वा धरेयुस्ततः
स्नातुं गाङ्गतटं चलन्तु, भविता श्वः पाठवार्ता पुनः' ।।७०३।।

श्रुत्वा तन्निजपुस्तकानि निखिलाः शिष्या ह्यबध्नन् ततो
गङ्गास्नाननिमित्तकाः प्रभुयुताश्चेलुश्च विद्यार्थिनः ।
तेषां गाङ्गनदीजले विहरणं जातं ह्यनल्पावधिं
प्राप्तायां निशि स प्रभुर्निजगृहं शिष्याः स्ववासं ययुः ।।७०४।।

प्राप्तस्तत्र महाप्रभुः परदिने विद्यालये तत्पुन–
स्तस्मिन् स्वासनसंस्थिते स्वविषयप्रश्नक्रिया प्रस्तुता ।
शिष्यः पृच्छति कोऽपि कीदृशमपि प्रश्नं निजग्रन्थतः
सर्वस्योत्तरमस्य कृष्णपरकं श्रीकृष्णमग्नात्मनः ।।७०५।।

'कश्चित्पृच्छति 'सिद्धवर्णकसमाम्नायो गुरो! कथ्यतां'
'श्रीनारायण एव वर्णनिवहे सिद्धोऽस्ति वर्णः सदा' ।
'वर्णानां विधिना हि केन भवति स्पष्टञ्च सिद्धिर्गुरो'!
'श्रीकृष्णस्य च दृष्टिमात्रपतनात्सिध्यन्ति वर्णाऽऽकराः' ।।७०६।।

श्रुत्वा तस्य तथोत्तरं वदति तच्छात्रश्च कश्चित्ततो
'मुञ्चैतन्ननु भक्तिभाववचनं प्रासङ्गिकं ह्युच्यताम्' ।
'कार्यं केवलकृष्णनामरसनं सर्वप्रसङ्गोचितं'
श्रुत्वेदं निखिलाः परस्परमुखं पश्यन्ति विद्यार्थिनः ।।७०७।।

कश्चिद्द्वै चकितश्च पश्यति गुरोर्गौरप्रभोः श्रीमुखं
'मस्तिष्के ननु वर्धितोऽस्य सुमतेस्तापः' शनैः कस्यचित् ।
श्रुत्वोक्तिं प्रतिषेधनञ्च कुरुते चान्यस्तनुस्पर्शतो
मन्दं तद्वदतो विचार्य मनसा 'लोकस्थितौ नो गुरुः' ।।७०८।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुत्वा छात्रवरा वदन्ति च तथा व्याख्यां प्रभोरद्भुतां
'व्याख्या ते ननु कीदृशी बुधगुरो! शास्त्रानुसारं वद' ।
'शास्त्राणां ननु सारमेव भवतां ब्रूमोऽत्र पृच्छन्तु तद्
गत्वा सम्प्रति पण्डितं कमपि तत्सोऽप्यत्र वक्ता पुनः ।।७०६।।

सारः शास्त्रभरस्य कृष्णचरणप्राप्तिस्तथैवोत्तरं'
तस्यालौकिकभावखण्डनपटुर्नो कोऽपि शिष्यस्ततः ।
बद्ध्वा ते निजपुस्तकानि निलयं मौनञ्च सर्वे ययु-
र्गङ्गादासगुरोर्गृहं कतिपये छात्राः सुबोधास्तथा ।।७१०।।

नत्वा तं विनयेन तस्य निकटे सर्वे निषण्णा, बुधः
पृच्छत्यागमहेतुकञ्च कुशलप्रश्नक्रियानन्तरम् ।
आर्तास्ते कथयन्ति चा'त्रभगवन्! किं ब्रूमहे साम्प्रतं
नः प्राप्तस्य गुरोर्गयागमनतश्चित्रं विचित्रा दशा ।।७११।।

रोदित्यत्र पुनः कदापि हसति प्राप्तः स विद्यालये
पाठं पाठयितुं परञ्च भगवद्भक्तिं गुरुः श्लाघते ।
न्यायव्याकरणादिशास्त्रविषयप्रश्नान् वयं कुर्महे
तत्सर्वोत्तरमस्य कृष्णपरकं मेधाविनः केवलम् ।।७१२।।

प्रश्नः कोऽपि विधीयतां परमसौ दत्ते यदेवोत्तरं
पाठ्यग्रन्थविरुद्धमेव तदिदं विद्यार्थिनां सर्वथा ।
(कृष्ण! प्राणसरोजवल्लभरवे! मां पाहि राधाप्रिय!)
प्राज्ञः पाठनमध्यमेव वदति ह्युच्चै रुदन् कर्हिचित् ।।७१३।।

एवं नः पठनं भविष्यति कथं ब्रूहि त्वमेव प्रभो!
तद्विद्याऽध्ययनार्थमेव नदियामध्ये वसामो वयम् ।
त्यक्त्वा गेहसुखं परञ्च पठनं नास्माकमत्राऽधुना
सर्वं प्रत्युत विस्मृतं स भवतः शिष्यस्ततः शास्तु तम्' ।।७१४।।

गङ्गादाससुधीश्च पण्डितवरः ख्यातो महान् वस्तुतो
विद्या केवलपुस्तकी तु विदुषो, भक्तौ तटस्था ततः ।
ताटस्थ्यप्रकृतिः प्रतीश्वरमसौ संलक्षितः सर्वदा
किं कार्यं हि ममेश्वरेण, तदयं यद्यस्ति तद् विद्यताम् ।।७१५।।

शास्त्राध्यापनमत्र शिष्यनिवहे, काले कृतं भोजनं
पर्याप्तं त्विदमेव जीवनपथे, किं कार्यमत्रेश्वरात् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गङ्गादासगुरोर्विचारसरणिः किञ्चित्तथैवात्मनः
श्रुत्वा शिष्यमहाप्रभोः स्थितिमिमां प्राज्ञो जहासोच्चकैः ।।७१६।।

'भक्तः सोऽत्र गतोऽधुना पथि गयातीर्थे, मयापि श्रुतं,
कस्मात्तत्समपण्डिते कथमियं भूताधिरोहस्थितिः ।
एतत्कार्यमनक्षरस्य बहुधा मूर्खस्य, विप्रो बुधः
शास्त्राणां पठने च पाठनविधौ कालं नयेत्सर्वदा ।।७१७।।

अस्तु प्रापय तं मदीयनिकटे सर्वोऽपि गच्छाऽधुना
वासं, श्वः प्रतिबोधयामि, भविता सर्वं तथा शोभनम् ।
नासौ मे वचनं कदापि तुदते विज्ञो निषेधाक्षरै'–
गौराङ्गस्य गुरोर्निशम्य वचनं सर्वे समाश्वासिताः ।।७१८।।

'आचार्यो भवतां गुरुः स्वनिकटे चागन्तुमद्योक्तवान्'
गौराङ्गं कथयन्ति पण्डितगुरुं शिष्याः परस्मिन् दिने ।
'इच्छाऽग्रे भवतोऽस्ति गच्छतु तथा चाद्यैव वा चान्यदा'
लब्ध्वा तद्गुरुमंत्रणाऽऽगमवचः शिष्यैश्चचाल प्रभुः ।।७१९।।

गत्वा तत्र बुधो ननाम चरणौ गौरः स्वविद्यागुरो–
र्गङ्गादासबुधोऽपि शिष्यसुमतेश्चक्रे सुतालिङ्गनम् ।
गौरश्चासनसंस्थितो बुधगुरुः स्वाचार्यसङ्केततः
पश्चात्तत्र गुरौ स्थिते सहगताः शिष्या निषेदुर्भुवि ।।७२०।।

आसीनं सुखपूर्वकं गुरुवरः शिष्यं जगाद प्रभुं
वात्सल्येन 'निमायि! भोस्त्वमसि मे शिष्योत्तमः पण्डितः ।
स्थाने मे त्वयि पुत्रतुल्यममताप्रीति,स्तु शास्त्रोक्तितो
ह्यायुः क्षायति तत्प्रियस्य गुरुकृत्स्तुत्या तथा सम्मुखे ।।७२१।।

याथार्थ्यं ननु कथ्यते पुनरपि, त्वं पाठशालायशः
ख्यातिं तेनिथ मे तथा, गुरुरहं वर्ते प्रसन्नस्त्वयि ।
शास्त्राध्यापनकर्म मेऽत्र सफलं, शिष्योत्तमं त्वादृशं
लब्ध्वा, त्वं मुखमुज्ज्वलञ्च कृतवान् पाण्डित्यतो मे गुरोः' ।।७२२।।

आचार्यस्य मुखात्प्रशंसनमियच्छ्रुत्वा प्रभुः पण्डितो
व्रीडाऽधोमुखमौनभावसहितस्तस्थौ, ददौ नोत्तरम् ।
ऊचे तस्य गुरुः पुन'स्त्वमधुना ख्यातिं तथाऽध्यापयन्
प्राज्ञस्तत्र यथेष्टगौरवयुतां द्वीपे नवे लेभिषे ।।७२३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्याः पाठनपद्धतिञ्च सरलां शीलस्वभावञ्च ते
गायन्तो विचरन्ति सर्वविषये विद्यार्थिनः सर्वदा ।
सर्वे त्वामपहाय चात्र पठनं वाञ्छन्ति नो ह्यन्यत-
श्चात्रागत्य पुनर्द्दुर्गतदिने मे, ते ह्युपालम्भनम् ।।७२४।।

एतान् पूर्ववदद्य पाठयसि नो सम्यङ् मनोयोगत-
श्चान्येऽप्याहुरिदं विचित्रवचनं लोकास्तथागत्य माम् ।
भक्तो मूर्खनिरक्षरो भुवि यथा प्राज्ञः कथं गायसि
द्वीपे रोदिषि कूर्दषे, नहि तथाख्यातस्य शोभा गुरोः ।।७२५।।

मेधावी मतिमांस्तथा त्वमसि तत्ख्यातश्च विद्वानपि
ज्ञाता शास्त्रभरस्य मूर्खसदृशं कुर्वन् कथं शोभसे?
शास्त्रज्ञा न भवन्ति ते भुवि, ततः पाखण्डमेवंविधं
विद्याबुद्धिविहीनमूर्खनिवहे कुर्वन्ति मानाप्तये ।।७२६।।

मानाप्तिः सुतरां तवास्ति विदुषो नापेक्षिता दम्भता
विद्याबुद्धिविभावितास्तव जना मुग्धा महान्तस्तथा ।
पाण्डित्यस्य सतः प्रशंसनमहो कुर्वन्ति सद्भावतो
भूयः शास्त्रविरुद्धमाचरसि किं हेतुञ्च सत्यं वद' ।।७२७।।

श्रुत्वा सर्वमिदं तथापि सुमतिः शिष्यश्च मौनं प्रभु-
स्तस्थौ नोत्तरमस्य तत्र किमपि प्रादाद्गुरोः कस्यचित् ।
गङ्गादासगुरुः पुनः स्वकथनं शिष्याय चारब्धवान्
मौनस्य स्फुटमत्र तत्र हृदयं नो वेत्ति देवो गुरुः ।।७२८।।

'श्रीनीलाम्बरचक्रवर्तिविबुधः ख्यातश्च मातामह-
स्ते स्वर्गस्थपिताऽपि पण्डितवरो विप्रप्रतिष्ठान्वितः ।
पाण्डित्यं हि सनातनात्प्रवहितं मातुः पितुश्चान्वये
ख्यातः पण्डितवृन्दमानसमणिः प्राज्ञः स्वयं विद्यसे ।।७२९।।

वैदुष्यात्तव राजपण्डितधनी मुग्धः सुकन्यापिता
विप्रो मिश्रसनातनः स्वदुहितुश्चक्रे विवाहं त्वया ।
सम्मानञ्च यथेष्टमद्य कुरुते द्वीपस्य विद्वत्सभा
शिष्यास्ते गुरुताप्रियाः पुनरपि त्वं मूर्खताप्तः कथम् ।।७३०।।

वत्साऽध्यापनगौरवं हि महतो भाग्याद् बहोर्जन्मनः
पूर्वस्मान्मिलतीति भावय, पुनस्तत्र प्रमादक्रिया?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्तेनोचितमुत्तरं वद कथं दत्से न मौनस्थितः
सम्यक् सम्प्रति पाठयिष्यसि कथं' ? नम्रो जगाद प्रभुः ।।७३१।।

'आदेशस्य सुपालनञ्च भवतां कर्तुं, करिष्ये ध्रुवं
यत्नं, किन्तु मनो वशे नहि च मे, कुर्यां तथाहं हि किम्?
इच्छाम्यत्र तथान्यदेव गदितुं त्वन्यन्मुखाज्जायते'
प्रेम्णोवाच गुरु'र्भविष्यति पुनः सर्वं तथा शोभनम्।।७३२।।

चित्तं त्वं कुरु सुस्थिरं स्वयमहो प्रज्ञावतां प[ण्डि]तः
कुर्यास्तच्चपलं मनो निजवशे, सञ्चिन्त्य शिष्योत्तरम् ।
शास्त्रं पाठय सावधानमनसा विद्यार्थिनां, किं तथा'?
'यच्चाज्ञेति वदन् प्रणम्य च गुरुं मुक्तः सशिष्यो ययौ।।७३३।।

सर्वप्रथमसङ्कीर्तनम् – अध्यापनकर्मान्तः

६८.तुष्यति सज्जननिर्मलहृदयं श्रीहरितोषक्रियया।

हरितुष्टिः सम्पूर्णचराचरसन्ततितोषणमात्रम्
सकलचराचरहरिदर्शनतो विद्यामतिपरिशुद्धिः ।
वर्णाश्रमकुलधर्मकर्मणां स्वात्मतोषपरिसीमा
सकलप्राणिजगत्परितोषो . हरिकृतसंसृतिचक्रम् ।।

लोके यत्र विलोचने प्रियतमा प्रेष्ठच्छविर्वेशिता
श्रीकृष्णप्रतिमा च यत्र मधुरा हृन्मन्दिरे स्थापिता ।
भूयस्तत्र कुतोऽपरस्य विशतेः स्थानस्य संभावना
ज्योतिः काञ्छति दिव्यमेव भुवने मर्त्येन्द्रियं स्वात्मनः ।।७३४।।

श्रीकृष्णस्य कथां मनोमधुकरो यस्याऽऽपपौ चामृतं
चित्तं यस्य मुकुन्दचञ्चलदृशा चाकर्षितं स्वोन्मुखम् ।
तद्भिन्नस्य च दर्शनाय नयने चोत्क्षिप्य शक्तो न स
स्थाने दीव्यति सूर्यमण्डलजगत्क्रीडाङ्गणे लोचनम् ।।७३५।।

जिह्वा यस्य निरन्तरं पिबति तन्नारायणाख्यामृतं
वक्तुञ्चात्र न शक्यते भुवि तया वार्ताञ्च सांसारिकीम् ।
बुद्धौ तस्य तदेव कर्म मधुरं श्रीकृष्णसङ्कीर्तनं
विद्याबुद्धिविवेकवैभवपदं कृष्णः कथामात्रकम् ।।७३६।।

लोके चात्र महाप्रभोर्हि हृदयं नो वर्तते साम्प्रतं
जातं कृष्णमयं परञ्च तदिदं प्राणास्तथा तन्मयाः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तादात्म्यं मनसो मनोहरगुणैस्तस्यैव चित्तालय-
श्चाञ्चल्ये, नवनीतचौरसुहृदो दासी गुणानां गिरः ।।७३७।।

सम्प्रत्यत्र करोत्वपि प्रभुरयं कुर्यान्निमायी तु किं
तच्चित्तेन्द्रियवृन्दबुद्धिमनसां श्रीकृष्णमात्रे लयः ।
कार्यं जागतिकं तथा भवति वै तैरेव वश्यैः सदा
चेष्टा कृष्णमयी प्रभोश्च निखिला, गौरोऽप्रभुः स्वात्मनः।।७३८।।

वात्सल्यान्तरभर्त्सनाप्रणुदितो ह्याचार्यगङ्गागुरो-
गौराङ्गो बहु सावधानमनसा चाध्यापनार्थं ययौ ।
आगच्छन्तममुं निजं गुरुवरं दृष्ट्वा च विद्यार्थिन-
स्तत्पादप्रणतिं विधाय शिरसा सर्वे तथोपाविशन् ।।७३९।।

आरब्धं पठनञ्च पृच्छति ततः शिष्यश्च कश्चिद् गुरुं
कुत्रार्थे विहितश्च धातुरमुको, रूपं किमस्याशिषि?'
भावावेशगतः प्रभुर्झटिति वै प्रश्नं निशम्योक्तवान्
'श्रीकृष्णस्य हि सर्वधातुविलयो नाम्न्यैव संभाव्यते ।।७४०।।

देहे सप्त हि धातवो जगति ये चान्ये श्रुतौ वाचि ये
तत्सर्वस्य च मूलकारणमिह श्रीकृष्ण एवाखिलम् ।
श्रीकृष्णादतिरिक्तधातुरपरः शक्यो न कश्चित्तत-
स्तेषाञ्चात्र समानमेव भविता रूपं हि सर्वस्थितौ ।।७४१।।

''नीलश्यामलमस्ति तद्भगवतो रूपं नवाम्भोदव-
त्तच्छ्रीविग्रहकान्तिरस्ति धवलाऽत्यन्ताऽल्पनीला तथा ।
शाखाचन्द्रनयेन तस्य लसिता वैदूर्यमेघोपमा''
किं वा प्राकृतिकी भवेदुपमितिश्चाप्राकृतस्यात्मनः' ।।७४२।।

श्रुत्वा तस्य तथोत्तरं निजगुरोः शिष्यास्तथोचुः पुन-
'र्ब्रूते चात्र भवांस्तथैव, वदतु ह्यर्थञ्च धातोर्यथा ।
ब्रूयात्तत्खलु पुस्तके च लिखितं ' शीघ्रं जगाद प्रभुः
'सोऽर्थो यच्च करोमि चात्रभवतां धातोर्यथार्थस्त्वहम् ।।७४३।।

एतस्मादतिरिक्तमत्र किमपि स्मर्तुं न शक्तस्त्वहं
तस्यार्थश्च स एव मेऽत्र लगति त्वग्रे यथा जानताम्' ।
प्रेम्णोचुस्तु ततो निजां विवशतां विद्योतयन्तश्च ते
'तत्ते चित्रविचित्रमुक्तमधुना किं तत्स्मरामो वयम् ।।७४४।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवन्त्वध्ययतां भविष्यति कदा शास्त्रीयपाठक्रिया
विद्याप्राप्तिरतः कथञ्च भविता लक्ष्यस्य पूर्तिश्च नः' ।
प्रेमावेशतया जगाद 'सततं वस्त्वेकमेव स्मृतेः,
श्रीः श्रेयः, स्मृतिमात्रतोऽखिलनृणां श्रीकृष्णनाम्नां सदा ।।७४५।।

बालानां विषलेपितस्तनपयःप्राणापहर्त्रीमहो
क्रूरे कर्मणि पूतनामपि रतां चक्रेऽसतीं सद्गतिम् ।
सर्वत्र स्मरणीयमत्र सततं तस्यैव नामाऽमृतं
श्रीकृष्णस्य मनुष्यमङ्गलधरा लीलाकथासंस्मृतिः ।।७४६।।

श्रीकृष्णस्मरणन्तु दुष्टमनसा चाप्यत्र ये चक्रिरे
विद्वेषाद्रिपुभावतोऽस्य निकटे हन्तुं त्वमुं ये गताः ।
मुक्ताः संसृतिसागरात्क्षणमिताः सर्वेऽपि ते पापिन-
स्तच्छ्रीपावनदर्शनादघतृणावर्तादयस्तामसाः ।।७४७।।

यत्प्राप्त्यै यतिनश्च कोटिशरदो युक्ताः समाधिस्थिता
नानासाधनसंयुताः सुमनसो लोके यतन्ते तपः ।
तस्मात्किं भुवि चिन्तनीयमपरं वस्त्वस्ति तस्यैव हि
श्रीकृष्णस्य सुचित्तचारुचरितात्प्रेमास्पदश्रीधरात् ।।७४८।।

उद्धारो हरिकीर्तनाद्धि भविता, श्रीकृष्णसङ्कीर्तनं
सर्वेषामिह सर्वसिद्धिकरणं श्रेयोऽखिलं प्राणिनाम् ।
स्थाने शाश्वतशान्तिसाधनमिदं त्राणं समस्ताऽऽपदां
यूयं गच्छत माधवस्य शरणं तस्यैव कृष्णात्मनः' ।।७४९।।

श्रुत्वाऽमुष्य तथाऽत्र कृष्णविषयं विद्यार्थिनो भाषणं
कृष्णप्रेमपयोधिमग्नहृदयाः सर्वे रुदन्तः स्थिताः ।
तत्ते जागतिकं पदार्थनिवहं विस्मृत्य मत्वा तथा
श्रीकृष्णं निजमाश्रयं श्रुतिपथस्मृत्याऽश्रुभी रेजिरे ।।७५०।।

साध्यं तत्परमञ्च पुस्तकमयीं विद्यामभिज्ञानिन-
स्तेष्वेके जगदुश्च 'पुस्तकमतं ब्रूह्यत्र तन्नो गुरो!
स्वस्थः स्वल्पतयाऽत्र सम्प्रति गुरुर्बाह्यप्रतीतौ गत-
स्तेष्वेवं कथयत्सु चोत्तरमसौ प्रादान्निमायी रुदन् ।।७५१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'भ्रातर्मे प्रकृतिर्न चास्ति वशगा स्वस्था च कुर्यां हि किं
प्रायः सम्प्रति मे स एव जनितो वातप्रकोपः पुनः ।
नो जाने किमहञ्च वच्मि, नहि तच्चाध्यापनं सम्भवं
तद्गत्वाऽन्यगुरोः पठन्तु निखिलञ्चास्मि स्वतन्त्रो नहि' ।।७५२।।

श्रुत्वा तद्गुरुदेवतोऽतिविकलाश्छात्रा रुदन्तो भृशं
कारुण्यातिशयं विलापसहितां तत्प्रार्थनाञ्चक्रिरे ।
'याम क्वाद्य गुरो! त्वमेव शरणं नोऽनाश्रयाणां परं
वात्सल्यप्रतिमः परो नहि गुरुस्तुल्यस्त्वया सम्भवः ।।७५३।।

प्रेम्णाऽध्यापयितुञ्च कश्चिदपरो नो वै तथैवं क्षम-
स्त्वत्तुल्योऽखिलसंशयस्य तमसश्छेत्ता रविः पण्डितः ।
त्रैलोक्ये नहि मार्गणादपि गुरो! सच्चन्द्रबन्धुर्भवे-
ल्लभ्यः शीतलचन्द्रिकासरलताशिक्षाप्रदोऽऽध्यापकः ।।७५४।।

नो त्याज्या वयमत्र रोगशमने तत्कारयिष्यामहे
भैषज्यं, तव सेवनं निशि दिवा कर्ता तथा स्मः स्वयम्' ।
तेषामार्तवचो निशम्य सुमतेर्नेत्राश्रुधाराऽपतद्
'बाह्यप्राणसमा हि यूयमखिलाः' सोऽयं रुदंश्चोक्तवान् ।।७५५।।

'सम्बन्धस्य हि भेदनञ्च भवतां दुःखं परं कुर्वतः
स्थाने मे स्वयमत्र किन्तु विवशः कुर्याञ्च किं भ्रातरः!
शक्तिर्मे नहि पाठनस्य किमुत त्वत्तुल्यबन्धुप्रिय-
स्निग्धानां सहवाससौख्यविरतः सत्को भवेत्स्वेच्छया' ।।७५६।।

ऊचुर्दीनतया च ते 'विरमतु त्वध्यापनं साम्प्रतं
स्वस्थः पाठय नः परञ्च भवता त्याज्या न वा कर्हिचित् ।
स्थाने नो विनयेन चात्रभवतां श्रीपादयोः प्रार्थना
नौकाजीवनकर्णधार! रुदतस्त्यक्त्वा न लीनो भव' ।।७५७।।

ऊचे तत्र गुरुप्रभुः स्फुटमना रुद्धस्वरो 'भ्रातरः!
साध्यो नास्ति गदोऽयमत्र मम वै चाशा न मुक्तेरतः ।
वक्तव्यं परसम्मुखे नहि तथा यूयं निजात्मा परं
युष्माकं किमपीह गोप्यवचनं तस्मान्न मेऽन्तर्गतम् ।।७५८।।

सत्यं वस्तु तथाहि - सम्प्रति यदा यत्नं तथाऽध्यापने
भिन्ने कर्मणि वा करोमि, ननु मे साक्षात्तदा सम्मुखः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"एकः श्यामलवर्णसुन्दरशिशुर्व्यक्तस्तथोपस्थितो
वंशीं वादयति स्वरेण मधुरं रूपेण सम्मोहयन्" ।।७५९।।

तद्वंशीस्फुटविश्वमोहनरवं श्रुत्वा मनो व्याकुलं
संज्ञाशून्यदशा च मे भवति तद्बोधस्मृतिर्नश्यति ।
कर्तुं नो प्रभवामि मत्तसदृशो मंत्रेण मुग्धो यथा
कार्यं तत्किमपी'ति तद्वचनतश्चोच्चै रुरोद स्फुटम् ।।७६०।।

तस्यैवं शतशिष्यलोचनपथो वाष्पाम्बुधाराऽसर-
त्सार्धं रोदनयैव रोदनगता स्थाने तदुच्चस्वरात् ।
शिष्याऽऽरोदनतश्च सञ्जयगृहश्रीचण्डिकामण्डपे
श्रुत्वा तज्जनताऽऽगताऽत्र करुणाक्रन्दध्वनिं गुञ्जिते ।।७६१।।

दूरात्संघटिते सहस्रगुणिते वृन्दे नृणां योषितां
सोऽयं स्वप्रकृतिं गतोऽल्पमधुना स्पष्टं जगादाश्रुणा ।
'प्राणेभ्योऽतिशयप्रिया! मम सुहृच्छात्रा! निजं पुस्तकं
बध्नन्त्वद्य गुरुर्न वोऽहमधुना शिष्या भवन्तो न मे ।।७६२।।

श्रीकृष्णस्य च यूयमत्र नियतं सर्वे सखायोऽधुना
कृष्णप्रेम यथा भवेच्च सुलभञ्चाशीस्तथा दत्त मे ।
युष्माकं हृदये सदा मम कृते स्नेहस्तथा श्रेयसे
सन्नद्धाश्च पुरा, हि दीनहृदयो याचेऽद्य भिक्षां ततः' ।।७६३।।

शब्दं दैन्ययुतं निशम्य मुखतो गौरप्रभोः सद्गुरोः
शिष्यास्ते च विमूर्च्छिताः कतिपये भूमौ पतन्तो यथा ।
घृष्यन्तः स्वशिरस्तथा क्षितितले वाक्यं प्रभोश्चान्तिमं
'हातव्यं पठनं नहीति, तदितः कुत्रापि गत्वा क्रियात्' ।।७६४।।

'स्थानेऽध्यापयिता त्वदीयसदृशो वान्यत्र नो सम्भव-
श्चास्माकं पठनं पुनर्न भविता' सर्वे रुदन्तो जगुः ।
'आशीः सम्प्रति देहि तच्च किमपि त्वच्छ्रीमुखाद्यच्छ्रुतं
शास्त्रं तिष्ठतु सुस्थिरं तदिह वै मान्यप्रभो! नो गुरो! ।।७६५।।

जिज्ञासैव तथा भवेन्न पठने, पार्श्वे गुरोः कस्यचिद्
देहि श्रीचरणाश्रयं तमधुना स्वस्यैव नो सद्गुरो!
श्रीपादस्मृतिरत्र तिष्ठतु सदा देह्यन्तिमं तद्वरं'
साष्टाङ्गप्रणतिं तथावचनतः सर्वे गुरोश्चक्रिरे ।।७६६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रत्येकं प्रभुरत्र कण्ठमिलनञ्चक्रेऽपि तेषां गुरु-
र्धन्यास्ते वरभागिनोऽत्र फलिताः प्रीत्या तथाऽऽलिङ्गनात् ।
प्रीतास्ते हरिबोलकीर्तनपदव्यक्तिं तथाऽऽरेभिरे
दिव्यस्पर्शकृतप्रभावमहिमा लोकोत्तरं दीव्यति ।।७६७।।

ऊचे सम्प्रति सद्गुरुः प्रभुरयं प्रेमाकृति'र्भ्रातर-
श्चैतावद्दिवसान् वयं हि सुहृदः सम्भूय चात्रोषिम ।
सम्बन्धो भवतां तथा मम पुनर्जातो घनिष्ठः स्वत-
श्चात्मीयाः परमञ्च यूयमधिकास्तन्मे भवन्तस्ततः ।।७६८।।
अत्रैकस्वरतश्च मे शमयत श्रीकृष्णशीताम्बुना
सर्वे यूयमहो हृदो हि विरहज्वालां ज्वलन्तीं तथा ।
श्रीश्रीकृष्णरसायनं श्रुतिपथद्वारा च दत्वा पुन-
र्नीरोगं कुरुतैकवारमिलिताः श्रीकृष्णसङ्कीर्तनम्' ।।७६९।।
सर्वस्तामसमर्थतां प्रकटयन् स्पष्टं प्रभुञ्चोक्तवान्
'जानीमो गुरुदेव! कीर्तनमहं किं, नोऽत्र रीतिं तथा ।
तत्ते शिक्षय कीर्तनस्य कृपया प्रीतः प्रणालीं तत-
श्चादेशाद् भवतस्तथैव विधिना कर्तुं वयञ्चोद्यताः' ।।७७०।।
पूर्वं वाञ्छति शिष्यतः प्रभुरयं तस्यैव शिष्या गुरो-
र्द्वीपे श्रीहरिकीर्तनं प्रसरतु श्रीचण्डिकामण्डपात् ।
'मार्गोऽयं सरलो बहु श्रुतिमधु श्रीकृष्णसङ्कीर्तनं'
तच्चोक्त्वा स्वरतः स्वयं प्रभुगुरुस्तच्छिक्षणार्थं जगौ ।।७७१।।
६९. यादव! मनो नमः किं कुरुते राधाधाराऽपेतम् ।
मधुमधुसूदनदर्शनलब्धिः श्रीश्यामाकृतकृपया
इन्द्रकामगवीरसव्यक्तिर्गोविन्दप्रिययोगः ।
रामनामसुकुमारमुरारे! हरे! नमः श्रीहरये
व्रजगोपाल! भानुजाभारतविषकलिकृष्णसुदर्शन! ।।
'कृष्ण! श्रीमधुसूदन! प्रिय! हरे! गोविन्द! गोपाल! हे
हे श्रीराम! नमो नमश्च हरये श्रीयादवायाऽऽत्मने'
आरेभे स्वयमेव शिष्यपुरतस्तन्नामसङ्कीर्तनं
हस्ताभ्यां प्रियतालिकावितरणादारेभिरे ते ततः ।।७७२।।
निर्दिष्टं प्रभुणा तथैव विधिना सर्वेऽपि विद्यार्थिनः
कुर्वन्तः प्रियनामकीर्तनमहो लोकोत्तरं रेजिरे ।
सर्वेषां करतालिकाप्रियरवात्सङ्कीर्तनानादत-
श्चण्डीमण्डपगुञ्जनञ्च विपुलं सम्पूर्णलोकाद्भुतम् ।।७७३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वीपेऽस्मिन्नवमेव वस्तु तदिदं श्रीनामसङ्कीर्तनं
सम्भूय प्रथमं निमायिसुमतेश्चादौ हि विद्यालये ।
आरब्धं, बहुहस्तवाद्यसहितं पूर्वं पदाऽऽकीर्तनं
द्वीपे नामपदैस्तु तैः प्रथमतः सङ्कीर्तनञ्चोद्गतम् ।।७७४।।

भावावेशतयोच्चनादसहितं युक्तः प्रभुः कीर्तने
तेऽप्येकस्वरतश्च तत्सहयुताः सर्वेऽपि विद्यार्थिनः ।
सुप्रीता विदिशा दिशा सुमधुरैः सङ्कीर्तनस्य स्वरै-
रानन्दस्य महोदधिर्नु विततः श्रीचण्डिकामण्डपे ।।७७५।।

मोदाब्ध्यन्तरमज्जनाय मनुजा दूराद्विदूराद्द्रुतं
कार्तार्थ्यञ्च विधातुमत्र निजकञ्चायान्ति सङ्कीर्तने ।
आनन्दाम्बुधिमग्नमानसतया विस्मृत्य तैः स्वात्मनः
सत्तां तत्र मुदः प्लवे च मिलितैर्गीतं मुखेन स्वतः ।।७७६।।

'कृष्ण! श्रीमधुसूदन! प्रिय! हरे! गोविन्द! गोपाल! हे
हे श्रीराम! नमो नमश्च हरये श्रीयादवायाऽऽत्मने' ।
एवं सर्वदिशो ध्वनिर्हि भगवन्नाम्नां तथैषां स्फुटं
जातः पक्वगृहाकरप्रतिरवश्चोच्चैः श्रुतेः सौख्यदः ।।७७७।।

'कृष्ण! श्रीमधुसूदन! प्रिय! हरे! गोविन्द! गोपाल! हे
हे श्रीराम! नमो नमश्च हरये श्रीयादवायाऽऽत्मने' ।
मन्ये स्थावरजङ्गमाऽचरचरैः सर्वैर्मिलित्वा त्विदं
प्रेम्णा वै क्रियते कलेरघहरं श्रीनामसङ्कीर्तनम् ।।७७८।।

एवं तत्समयान्तरात्प्रभुहृदो भावाग्रहो मन्दतां
यातः स्वल्पतया ततः करतलस्फोटः शनैः कुञ्चितः ।
मौने तत्र महाप्रभौ हि जनता छात्रास्तथा मौनिनः
शान्ते सम्प्रति कीर्तनेऽपि निपतद्बाष्पो निमायी प्रभुः ।।७७९।।

कण्ठालिङ्गनमेकवारमधुना चक्रे पुनश्चोत्थितः
सर्वेषां सुहृदां प्रभुर्विलपतां विद्यार्थिनां तद्गुरुः ।
'अस्मत्प्राणनिधे! कथं कथमपि त्याज्या वयं नो प्रभो!
मध्ये जीवनसागरस्य भवता' कश्चित्तथा याचते ।।७८०।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

'यद्भाव्यं ननु लेखनञ्च पठनं, जातं तथा तत्परं
प्रार्थ्यं केवलमद्य तिष्ठतु हि नस्त्वच्चित्तकोणे स्मृतिः' ।
हस्तस्पर्शपुरस्सरं प्रभुगुरुर्भूयस्तथाऽऽश्वासनं
दत्ते, प्रत्युत वर्धते प्रभुकरस्पर्शेन साऽधीरता ॥७८१॥

शिष्यास्ते विकलाः प्रभोश्चरणयोर्भूयो लुठन्तस्तथा
याचन्ते विनयेन दर्शनमिदं वात्सल्यनिष्ठात्मकम् ।
सामर्थ्यञ्च तथा हिनस्ति, तनुतेऽस्थैर्यं दृशोः पश्यतां
वस्त्राच्छन्नमुखा रुदन्ति सरवं सर्वे ततो दर्शकाः ॥७८२॥

तत्तस्मिन् करुणातरङ्गनिकरे चाप्यायमाने प्रभुः
शेके नो बहुयत्नवानपि बुधः स्थातुं निमायी त्वपि ।
चण्डीमण्डपतो रुदन्नयमपि श्रीगाङ्गतीरोन्मुखः
पृष्ठेताननुगान्निवर्त्य निखिलान् संबोध्य यातः स्वयम् ॥७८३॥

शिष्यास्ते ते विकलमनसा भूयसा तद्वचोभि-
र्मन्दं याता निजनिजगृहं बोधिता वत्सलस्य ।
गङ्गाधारासमरसनवद्वीपशुद्धान्तरात्मा
कृष्णप्रेमी गृहमयमपि प्राप्तवान् तन्निवृत्तः ॥७८४॥

'गीतानन्तरसं' प्रभुस्तुतिपरं सौहार्दमात्रात्मकं
काव्याऽलङ्कृतिरीतिवस्तुविगुणं शब्दार्थसंयोजनम् ।
औचित्येन हि भावगुम्फनफलं दत्तप्रभोः सञ्चितं
श्रीगौराङ्गगुणाकरं सुमनसां भावद्रुमाऽऽसेचनम् ॥७८५॥

गौरो'ऽनन्तरसो'ऽत्र भावमधुरो हृद्गीतकैः संस्मृतो
लालानन्तबुधस्य सौम्यहृदयाल्लब्धात्मपथ्याम्बुना ।
हस्तस्पर्शपुरस्सरं द्विजवरः श्रद्धेयवृद्धो बुधः
कर्तुं काव्यमसौ यथा नुदितवान् तत्संस्मृता चेतना ॥७८६॥

वङ्गप्रीतिहृदा निमायिमनसा चैतन्यभावात्मना
दत्तब्रह्मचरस्य गौरचरितञ्चास्वाद्य मुग्धाऽऽस्थया ।
लालाऽऽदिष्टविधौ मतिश्च समयश्चापेक्षितौ, तन्मया
गीतोऽनन्तरसेन शीघ्रमधुनाऽनन्तो 'निमायी' रसः ॥७८७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आरब्धं करणं निमायिदिवसे राकातिथौ फाल्गुने
भाद्रेऽनन्तचतुर्दशीशुभतिथौ पूर्णो ह्यनन्तो रसः ।
"श्रीस्वप्नेश्वर"सन्निधेः कृतिरियं षण्मासमात्राऽवधौ
मेधासन्ततिसौहृदादपि गता ग्रीष्मावकाशेऽधिकम् ॥७८८॥

सारल्येन गता कृतिर्नियमतश्चौदार्यतो गृह्यते
निर्दोषा विगुणापि लोकनिवहे, चेदस्ति संस्कारिणः ।
संस्काराच्च्युतमानसः सहृदयैः क्षम्योऽपराधी करः
शम्बूको नहि हन्यते, दिवि कृतः श्रीरामहस्ताऽसिना ॥७८९॥

माता पिताऽवनितले सुतजन्मना, तौ
संजीवतः पथिकजीवशिवौ च दीर्घम् ।
वात्सल्यलालनतयाऽपि पितामही सा
संस्मर्यते पथि कृतज्ञतया वराकी ॥७९०॥

जयतु हरिः प्रभुगौरपण्डितो
जयतु सदा प्रभुदत्तसज्जनः ।
जयतु रसो भुवि गीतनन्दितो
जयतु कृती समभावमानसः ॥७९१॥

अनन्तचतुर्दशी
१५-९-९७ ई.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi